शास्त्रसंदेश-३०

# स्तोत्रसंदेशमाला

## श्रीपञ्चजिनेश्वर गणधराणां स्तोत्राणि



४

मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३०

# स्तोत्र संदेशमाला-४

## श्रीपंचजिनेश्वर-गणधराणां स्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્
વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી
પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન
પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,
આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

**સ્તોત્ર સંદેશમાલા-૪**

**श्रीपंचजिनश्वर-गणधराणां स्तोत्राणि**

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૧૯૪ + ૧૦

સ્તોત્ર : ૧૦૦ શ્લોક : ૧૪૧૪

**: પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

પૂ.મુ.શ્રી **વિરતેન્દ્રવિજયજી** મ.સા.

પૂ.મુ.શ્રી **કિરતેન્દ્રવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!  અનુમોદનીય...!  અનુકરણીય...!

**સ્તોત્ર સંદેશમાલાના**
**ભાગ ૪ ના**
**દ્રવ્ય લાભાર્થી**

વિ.સં. ૨૦૭૬માં
શ્રી મોનિકાસદન-મલાડ મધ્યે,
પૂ.મુ.શ્રી મતિરત્નવિ.મ.સા.ની નિશ્રામાં
પર્યુષણા મહાપર્વની આરાધના દરમ્યાન થયેલ
જ્ઞાનદ્રવ્યની ઉપજમાંથી
**શ્રી મોનિકાસદનના આરાધકોએ**
કરેલ શ્રુતભક્તિની
અમો હાર્દિક અનુમોદના કરીએ છીએ.



કાર્યકરગણના અમો
આભારી છીએ.

*શાસ્ત્રસંદેશ, સુરત*



**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | ऐश्वर्यं सदने सदैव वदने | पू.आ.श्री जिनकीर्तिसूरि | १ |
| २ | नवज्योतिः स्फातिः सकलक | पू.आ.श्री जिनकीर्तिसूरि | ५ |
| ३ | शब्दब्रह्माम्बुराशेः प्रसृमरलहरी | पू.आ. श्री जिनकीर्तिसूरि | १० |
| ४ | किर्तिःस्फुर्तिमियर्त्ति सर्वनिधयः | पू.आ. श्री जिनकीर्तिसूरि | १५ |
| ५ | स श्रीवीरजिनो [धिनो] तु– | पू.आ. श्री जिनकीर्तिसूरि | २० |
| ६ | गरीयोगुणश्रेणियरेणं प्रवीणं | पू.आ. श्रीमत्कुलमण्डनसूरि | २५ |
| ७ | रमाधार याताऽस्ते तारकान्ते, | पू.आ. श्रीमत्कुलमण्डनसूरि | २५ |
| ८ | सना नेमिमानौम्यकामं निकामं, | पू.आ. श्रीमत्कुलमण्डनसूरि | २६ |
| ९ | यमीशं शमीशाऽरिरंसानिरा– | पू..आ. श्रीमत्कुलमण्डनसूरि | २६ |
| १० | जनानन्द ! नीता अनीर्तिं | पू.आ. श्रीमत्कुलमण्डनसूरि | २७ |
| ११ | जय वृषभ ! वृषभवृषविहि– | पू.मु.श्री धर्मवर्धन वि. | २८ |
| १२ | स्तुवन्तु तं जिनं सदोपकारता– | पू.मु.श्री धर्मवर्धन वि. | २८ |
| १३ | जिगाय यः प्राज्यतरः | पू.मु.श्री धर्मवर्धन वि. | २९ |
| १४ | तवैश नामतस्त्वरा दरा | पू.मु.श्री धर्मवर्धन वि. | ३० |
| १५ | योऽचीचलद्दुश्च्यवनोरसि | पू.मु.श्री धर्मवर्धन वि. | ३० |
| १६ | जय जय जगदानन्दन ! जय | | ३१ |
| १७ | किं कल्पद्रुमसेवया यदि मया | | ३१ |
| १८ | परमान्नं क्षुधार्त्तेन तृषिलेनामृतं | | ३२ |
| १९ | अभिनवमङ्गलमाला–करणं | | ३२ |
| २० | कनकाचलमिव धीरं समुद्र– | | ३३ |
| २१ | गीर्वाणमालार्च्चितपादपद्मं | पू.मु.श्री सागरचन्द्र वि. | ३४ |
| २२ | समग्रध्वापरध्वान्त विध्वंस– | पू.मु.श्री सागरचन्द्र वि. | ३५ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २३ | श्री नेमिनाथं भविका भजध्वं | पू.मु.श्री सागरचन्द्र वि. | ३५ |
| २४ | संसारागाधविस्तार पारापार- | पू.मु.श्री सागरचन्द्र वि. | ३६ |
| २५ | श्रीमन्मुक्तिरमानाथं वीरनाथं . | मु.श्री सागरचन्द्र वि. | ३७ |
| २६ | ऋषभजिनमनन्तं नाभिभूतं | | ३८ |
| २७ | शान्तं कान्तं शिवपदगतं | | ३८ |
| २८ | रम्भारामा रुचिरतिलका चारु- | | ३९ |
| २९ | श्रीणां प्रीणातु दानैः प्रथम- | पू.आ.श्री जिनकीर्तिसूरि | ४० |
| ३० | श्रीमान् शान्तिजिनः पुनात्व- | पू.आ.श्री जिनकीर्तिसूरि | ४१ |
| ३१ | पारावारसमानसंसृतिसमुत्ता- | पू.आ.श्री जिनकीर्तिसूरि | ४२ |
| ३२ | भक्तिव्यक्तिप्रणमदमरस्वर्ण- | पू.आ.श्री जिनकीर्तिसूरि | ४४ |
| ३३ | विद्यानां जन्मकन्दस्त्रिभुवनभव | पू.आ.श्री जिनकीर्तिसूरि | ४५ |
| ३४ | श्रीनिर्वृतिकमलदृशः कर- | पू. पं.श्री हर्षकुलगणि | ४६ |
| ३५ | श्रेयः सदङ्कमलयोन्नतिमेघनाद- | पू.पं.श्री हर्षकुलगणि | ५२ |
| ३६ | कनककेतककेसरदीधिर्ति, | पू.आ. श्री जिनचन्द्रसूरि | ६६ |
| ३७ | शुक्लध्यानसुधारसेन निभृतः | | ६७ |
| ३८ | श्रीनाभिसंभवविभुं भवसंभव- | | ६८ |
| ३९ | श्रीनाभिनन्दनविभोर्वदनं मुदे- | पू.आ.श्री बालचन्द्रसूरि | ७० |
| ४० | श्रियं विश्वत्रयत्राणनिष्ण | | ७१ |
| ४१ | परमात्मनमाद्यं त-मर्हंकार- | पु.मु. श्री शीलशेखरगणि | ७२ |
| ४२ | शान्ति शिवाय सर्वज्ञं, मुद्य- | पु.मु. श्री शीलशेखरगणि | ७६ |
| ४३ | यं श्रिता गुप्तयस्तिस्रः, श्रीनेमिं | पु.मु. श्री शीलशेखरगणि | ८० |
| ४४ | अर्हन्तं नौऽमि तं पार्श्वं, हेतुं | पु.मु. श्री शीलशेखरगणि | ८५ |
| ४५ | वीरं स्तौमि तिरस्कृत-मानं | पु.मु. श्री शीलशेखरगणि | ८९ |
| ४६ | यस्याब्धिदुहितुर्दात्री, भेहिन्! | पु.मु. श्री शीलशेखरगणि | ९३ |
| ४७ | स्तोष्ये सुरासुरैः सेव्यं, परमेश | पु.मु. श्री शीलशेखरगणि | ९६ |
| ४८ | श्रीवीरं स्तौमि तं शक्ति-क्षमे | पु.मु. श्री शीलशेखरगणि | ९९ |

| क्र.नं. | स्तोत्र | कर्ता | पेज नं. |
|---|---|---|---|
| ४९ | स्याद्वादरावी गुणवृद्धिकारी, | पु.मु. श्री शीलशेखरगणि | १०३ |
| ५० | यस्ततान सुकृतान्यशिश्रियत्, | पु.मु. श्री शीलशेखरगणि | १०७ |
| ५१ | सिद्धिं करोति स्म वृणोति | पु.मु. श्री शीलशेखरगणि | १११ |
| ५२ | जिणंदे पढमे लोए, नामेणं | पू.आ.श्री जिनरत्नसूरि | ११६ |
| ५३ | संतिनाहे महासीले, पत्त- | पू.आ.श्री जिनरत्नसूरि | ११७ |
| ५४ | विस्सर्चितामणी नेमे, विस्स- | पू.आ.श्री जिनरत्नसूरि | ११८ |
| ५५ | जगनाहे जिणे पासे, महा- | पू.आ.श्री जिनरत्नसूरि | ११८ |
| ५६ | जय जयपईव कुंतलकलाव | | १२० |
| ५७ | वीससेण-अइरादेविनंदण ! | | १२१ |
| ५८ | पंचजन्नि आउरिय संख जिणि | | १२१ |
| ५९ | सामि सामलय तणु कंति | | १२२ |
| ६० | जयउ सो सामी वीर जिणंदो | | १२३ |
| ६१ | स्वर्णाष्टाग्रसहस्रपत्रकमले | पू. श्रीवज्रस्वामिजी | १२५ |
| ६२ | अब्धिर्लब्धिकदम्बकस्य | पू.आ.श्रीजिनेश्वरसूरि | १२७ |
| ६३ | जयश्रियां सेवधिमेधमानसमग्र | पू.आ.श्रीमुनिसुन्दरसूरि | १२८ |
| ६४ | श्रीमन्तं मगधेषु गौर्वर इति | पू.आ.श्री जिनप्रभसूरि | १३२ |
| ६५ | ॐ नमस्त्रिजगन्नेतुर्वीरस्या- | पू.आ. श्रीजिनप्रभसूरि | १३५ |
| ६६ | आगमत्रिपथगा हिमवन्तं | पू.आ.श्री जिनप्रभसूरि | १३६ |
| ६७ | त्वां प्रत्यक्षविदां बोधैरप्यबुद्ध | पू.आ.श्री जिनसेनसूरि | १४० |
| ६८ | श्री वर्धमानस्य विनेयरत्नम्, | पू.आ.श्री कनकरत्नसूरि | १४३ |
| ६९ | श्रीवर्धमानशिष्याग्रणीर्महिम- | पू.मु.श्री नन्दिधर्मगणि | १४५ |
| ७० | गौतमं गोत्ररत्नं पवित्रं यद- | मुनिप्रवरश्रीधर्महंसगणि | १४६ |
| ७१ | गुणपुङ्गव ! गौतम ! गोतम- | पू.पं. श्री गुणसागरगणि | १४९ |
| ७२ | नमोऽस्तु श्री-ह्री-धृति-कीर्ति- | | १५० |
| ७३ | श्रीइन्द्रभूतिं वसुभूतिपुत्रं पृथ्वी- | | १५२ |
| ७४ | ॐ नमः सकलकल्मषच्छिदे, | | १५३ |

| क्र.नं. | स्तोत्र | कर्ता | पेज नं. |
|---|---|---|---|
| ७५ | कलाकेलिमातङ्गमातङ्गशत्रु | | १५५ |
| ७६ | श्री-इन्द्रभूतिं पृथिवीसुपुत्रम- | पू.आ.श्री देवानन्दिसूरि | १५७ |
| ७७ | श्रीशत्रुञ्जयशैलराजशिखरा- | आ. श्रीलक्ष्मीसागरसूरि | १५९ |
| ७८ | पुण्डरीकोज्ज्वलश्लोकलीला- | मुनिप्रवरश्रीधर्महंसगणि | १६१ |
| ७९ | जिनेभ्य: सर्वसिद्धेभ्य: | | १६४ |
| ८० | उसभाइ-जिणिंदाणं सव्वेसिं | पू.आ.श्री.जयसिंहसूरि | १६८ |
| ८१ | जयसिरिविलासभवणं वीर- | पू.आ.श्री मुनिसुन्दरसूरि | १६९ |
| ८२ | अक्खीणमहाणसिचारुचारप्प- | पू.आ. श्रीजिनेश्वरसूरि- | १७० |
| ८३ | जम्मपवित्तियसिरिमगहदेस | पू.आ. श्रीजिनप्रभसूरि | १७१ |
| ८४ | अट्ठ छंद दस दूहडा छपदु | पू.उपा. श्रीमेरुनन्दनगणि | १७४ |
| ८५ | पुहविवसुभूइतणयं, वंदे सिरि- | | १७७ |
| ८६ | गोयम गणहर गोयम गणहर | | १७९ |
| ८७ | वीर जिणेसर पय पणमेवि, | | १८२ |
| ८८ | प्रहि ऊठी प्रभु प्रणमीइ ए, | | १८३ |
| ८९ | जय जय जिणसासण उदय- | | १८४ |
| ९० | प्रणमुं प्रभु परगट वर्द्धमाण, | | १८४ |
| ९१ | सरसति सरसति अति घणी ए, | | १८५ |
| ९२ | श्री जिनशासन अवतरिउ एह, | | १८५ |
| ९३ | वंदुं गणधर सार, पामिउं | | १८६ |
| ९४ | प्रहि ऊठी प्रणमुं बहु भाविइं, | | १८७ |
| ९५ | वंदिय वीर जिणंद, अचलभाय | | १८७ |
| ९६ | समरी सकल जिणेसर तु, | | १८८ |
| ९७ | श्री जिनशासनि अवतर्या ए, | | १८९ |
| ९८ | पणमिय पढमजिणिदं सीसं | पू.मु.श्री पद्मनाहवि. | १९० |
| ९९ | जय पणमिरविज्जाहरदेविंद- | | १९१ |
| १०० | तं जयउ जए तित्थं, जमित्थ | पू.आ.श्री जिनदत्तसूरि | १९२ |

पू.आ.श्री जिनकीर्तिसूरिविरचिताः

# ॥ श्रीपञ्चतीर्थीस्तवाः ॥

## १. (१) श्रीऋषभकुन्तलस्तवः

(शार्दूलविक्रीडित)

ऐश्वर्यं सदने सदैव वदने वाचाम्पतिर्देवता,
शौर्यं दोर्युगलेऽवलेपरहिता बुद्धिर्विशुद्धा हृदि ।
कीर्तिः खेलति विष्टपे च भविनां यस्य प्रसत्तेर्वशात्,
श्रीनाभेयजिनं प्रणष्टवृजिनं प्रव्यक्तभक्त्या स्तुवे ॥ १

श्रीब्रह्मोपनिषन्निषण्णधिषणैर्विज्ञेयसम्यक्स्थितेः,
स्वामिन् ! कस्तव वास्तवस्तवमलं कर्तुं भवोन्मानवः ? ।
त्वामामन्त्र्य पुनः पुनस्तदपि हि स्तोत्रच्छलेनामुना,
जिह्वां स्वामधुना पुनामि मलिनामास्तुत्यसङ्कीर्तनात् ॥ २

मग्नं धर्मरथं युगादिसमये मिथ्यात्वपङ्कोच्चयात्,
कृष्ट्वा सर्वसुखावहं यदवहः श्रेयःपुरीप्रापकम् ।
तेनाऽसौ किणसन्ततिः शिततरा स्कन्धे तवालोक्यते-
ऽद्याऽपि श्रीवृषभप्रभो ! नवघनश्यामालकव्याजतः ॥ ३

लावण्यातिशयादतीवसुभगां श्री - भारतीदेवते,
त्वन्मूर्तिं दृढमालिलिङ्गतुरमू अत्यन्तरागान्विते ।
तेनांसस्थलयोस्तव स्तबकिता लोलालिकालिच्छलात्,
कस्तूरीद्रवपत्रभङ्गरचनेऽवाऽसौ तदङ्गच्युता ॥ ४

श्रीनाभिक्षितिपालपुत्र ! भगवन्नैताः तवांऽसस्थले,
दीव्यन्नीलरूचिच्छटाः किल जटाः सर्वज्ञचूडामणे ! ।

किं त्वेताः परमर्द्धिसिद्धिनगरीमोहार्गलदुर्गम-
ब्रह्मद्वारकपाटसम्पुटतटप्रोद्घाटने कुञ्चिकाः ॥ ५

अत्यन्तं निभृतं भवद्गुणगुणैः सङ्ख्यातिगैः प्रागपि,
त्वत्कीर्त्या त्वधुनाऽभवं स्फुटदिवामास्या तदेनां क्वचित् ।
दूरे प्रेषय नाभिराजतनय ! व्योमेति विज्ञप्तिकां,
प्राप्तं कर्तुमिव त्वदन्तिकमिदं दम्भाज्जटानां प्रभो ! ॥ ६

भक्तिव्यक्तिविनम्र [शिर्ष] जनताऽभिष्टार्थकल्पद्रुम !,
स्वामिंस्तेंऽसयुगे सुगेयशितिरूक् नैतज्जटामण्डलम् ।
किं त्वेतच्चपलस्वभावकमलाबालप्लवङ्गप्रिया-
बन्धाय प्रबलं त्वया प्रगुणितं प्रोद्दामदामाऽऽयसं ॥ ७

यद् विज्ञाः प्रबलप्रतापविभवश्रीनाभिराजाङ्गज !,
त्वां गन्धद्विपमामनन्ति पुरुषश्रेणीषु तत् साम्प्रतम् ।
राग-द्वेषगजान् पराभवसि यद् बम्भङ्क्षि मोहद्रुमं,
धत्से यन्मदवारिवारितमदोप्युद्यज्जटाव्याजतः ॥ ८

सौभाग्येकनिधे निधेहि हृदये स्नेहं चिरस्नेहल-
स्वान्तां स्वां दयितामिमां त्वमधुना सम्भावयैहि प्रभो ! ।
इत्याख्याय शिवश्रिया निजगृहे त्वां नेतुमायोजिता,
नीलीरागभृतेव रज्जुरपि हि श्यामा जटायाः छलात् ॥ ९

पीयूषद्युतिमण्डले प्रतिकलं पीयूषयूषं पिबन्,
देवैस्त्रासित एष लेखभवनाद् राहुः पलाय्य स्थितः ।
पातुं वागमृतं त्वदीयवदनासन्ने प्रसन्ने जटा-
व्याजेन त्रिजगत्यपि त्वदपरो नास्ति शरण्यो यतः ॥ १०

धर्मायादा भुवनविभुतां देहि तन्नोपि किञ्चिन्,
मित्रे शत्रावपि सममना योगिभिर्गीयसे यत् ।
याञ्चामेवं रचयितुमिदं दम्भतः कुन्तलाल्याः
स्थानभ्रष्टं दुरितमिह किं त्वत्समीपे जिनागात् ॥
(मन्दाक्रान्ता) ११

सततं भगवंस्तवांशदेशेन जटानां पटलं विभाति किन्तु ।
विधृतं तदिदं त्वया तमोऽस्त्रं
जगदास्कन्दपरस्मरच्छिदायै ॥ (मालभारिणी) १२

परममहिमदीव्यन्मातृकाव्यक्तवर्णं,
फणियुगलनिषेव्यं व्याजतः केशपाल्याः ।
मुखमिह कुरूकुल्लायन्त्रवन्मन्त्ररम्यं,
सृजतु भुवनरक्षां श्रीयुगादीश्वरस्य ॥ (मालिनी) १३

इयं न ते कुन्तलमालिकांऽसयो-
र्विनीलकान्तिः प्रविभाति किन्त्विदम् ।
तुभ्यं क्षमाभृद्गुरवेऽञ्जनक्षमाधरैः
स्वकान्तेः पटलं तु ढौकितम् ॥ (उपजाति) १४

त्वया सितध्यानबलप्रवासितं दुर्नीतिकारीति मनःपुरान्तरात् ।
अंसस्थलीलोलविनीतकुन्तल-
च्छलेन दुर्ध्यानिमिवाययौ बहिः ॥ १५

इयं न ते नीलजटाकदम्बकं, विराजतेंऽसस्थलयोस्तव प्रभो ! ।
असौ पुनर्नम्रसुराङ्गनेरिता कटाक्षलक्षस्तबकावली किल ॥१६
(वंशस्थ)

श्रीमद्युगादीश ! तवांसयोः स्फुरत्पदः कदम्बं न जटाघटारूचाम्।
क्षारत्व-निम्नत्व-जडत्वदूषण-
क्षयेच्छया किन्तु समागतोऽम्बुधिः ॥ (उपजाति) १७

परापरब्रह्ममयी सरस्वती, लक्ष्मीश्च निर्वैरमुभे इह स्थिते ।
इतीव वेधा विदधे तवाऽऽनने
जिनेन्द्र ! रेखायुगलं जटाङ्कतः ॥ (उपजाति) १८

विर्निजितौ गीष्पति-भार्गवौ त्वया,
ततः प्रपन्नौ तव तौ विनेयताम् ।
इमे तयोरध्ययनाय पट्टिके,
कृते विधात्रा भगवन् ! जटोपधेः ॥ (वंशस्थ) १९

श्रीनाभेय ! त्वदंसस्थलयुगलतटे नीलमालोक्यते यद्,
दक्षा आहुर्जटाऽसाविति भुवनपते ! किं तु मन्येऽहमेवम् ।
एषा च्छायैव देव ! भ्रकृटियुगभवा नापरं किञ्चिदेतन्-
मूर्तौ पारङ्गतानां किमपि न घटते वैकृतं यज्जटाद्यम् ॥ २०

(स्रग्धरा)

(शार्दूलविक्रीडित)

अप्रेक्ष्येक्षणतीव्रतापतपनोत्तप्ताङ्गभव्याङ्गिना-
मश्रान्तं पिबतां स्वलोचनपटैर्लावण्यपुण्यामृतम् ।
त्वद्वक्त्रादमृतह्रदान्निपतितैस्तद्बिन्दुभिः पार्श्वतः,
स्वामिन् ! पङ्क इवाऽभवत् किल जटाव्याजात् तवांसद्वये ॥२१

राग-द्वेषगजेन्द्रयोस्त्रिभुवने स्वैरं चिरं भ्राम्यतोः,
श्रीधर्मद्रुमकाननं दलयतोर्नित्यं मदोन्मत्तयोः ।

देवैरप्यविषह्ययोः किल वशीकराय सारायस-
प्रोद्दामाङ्कुशयामलं शितिजटाव्याजादधार्षीः प्रभो ! ॥ २२

श्रीमद्धर्मनरेश्वरः सृजति किं यद्देहगेहाङ्गणे,
भावद्वेषिभटानतीवविकटान् जेतुं कृपाणीश्रमम् ।
लोलन्नीलजटाघटातिकपटाद् देवः स वः प्रार्थितं,
नित्यानन्दपदप्रदः प्रददतां श्रीमान् युगादीश्वरः ॥ २३

एवं श्रीगुरुसोमसुन्दरयशः प्राग्भारगौरस्फुरत्,
कान्तिस्मेरितविष्टपत्रय ! नयश्रीकेलिलीलालय ।
भक्तिव्यक्तितरङ्गरङ्गिमनसा स्वामिन् ! मयाऽसि स्तुतः,
श्रीनाभेयविभो ! प्रसीद् भगवन् ! बोधिप्रदानेन मे ॥ २४

## २. (२) श्रीशान्तिकान्तिस्तवः ॥

(शिखरिणी)

नवज्योतिः स्फातिः सकलकमलाकेलिसदनं,
कलालीलाशाली पृथुतमतमःस्तोमशमनः ।
मृगाङ्कः श्रीशान्तिः कुवलयसमुल्लासनपरः,
स्फुरत्कल्लोलं मे रचयतु स वाग्ब्रह्मजलधिः ॥ १

कलङ्कं नो धत्ते न च भजति दोषोदयमयं,
न चाप्नोति भ्रान्तिं कलयति कलानां न विलयम् ।
अताड्यं नो जाड्यं प्रथयति न वाप्यस्तसमयं,
नवीनः श्रीशान्तिर्हरतु मृगलक्ष्मा भवभयम् ॥ २

जगन्नाथः पाथःपतिवदतिगम्भीरहृदयो,
दयोल्लासात् पूर्वं स्वतनुपिशितैः सात्त्विकपतिः ।

ररक्ष श्येनाद् यो भयविधुरपारापतमसौ,
जिनः शान्तिः पायाद् भव-भवभयाद् भक्तभविनः ॥ ३

यदीयाङ्गाच्छङ्गाद् दिशि-दिशि पिशङ्गद्युतिरियं,
वियत् सर्वं व्यापाऽप्रतिहतगतिः खेलतितमाम् ।
दृढस्पर्द्धाबन्धादि भगवतो ज्ञानमहसः,
स शान्तिं श्रान्तिं वो भववनभवामुद्विदलतात् ॥ ४

स वः शान्तेः कान्तिव्रज उरुरजस्तक्षतुतमां,
तमांसि च्छिन्दानः कनककमलच्छेदकपिशः ।
सरोजानां राज्या निरुपमसुखश्रीविजितया,
पदे दण्डस्याऽयं कृत इव परागः स्वविभवः ॥ ५

त्वया छिन्ना दोषास्त्रिभुवनमनोदाहजनना,
ममाप्येतांश्छिन्द्या इति भजति यं दीपकततिः ।
निजं तेजःपुञ्जं पुरत उपदीकृत्य सहजं,
मिषाद् यत् कान्तीनां प्रथयतु स शान्तिः सुखमतीः ॥ ६

स शान्तिः सन्तापं हरतु भविनां शान्तिनिलयो,
विरेजुर्यद्देहप्रभवरुचयः स्वर्णशुचयः ।
वपुर्भित्त्वा ध्यानानलविमलकीला इव बहिः,
समुल्लासं प्राप्ता दिनकरमहो ! जेतुमनसः ॥ ७

अभीप्सुः सौरभ्यं निजवपुषि गाङ्गेयनिकरः,
स सेवाहेवाकी सृजति वसतिं यस्य सविधेः ।
पिशङ्गाङ्गव्याजादिव सुदिवसं वः प्रथयताद्-
यतात्मा श्रीशान्तिः स भुवनजनाभीष्टफलदः ॥ ८

रुचिः शान्तेर्व्याख्यासदसि वपुषः स्वर्णरुचिरा,
समन्तात् दन्तांशुप्रकरखचिता नेयमपि तु ।
असौ श्वेताम्भोजा तदुरुरजसा पीतसलिला,
जिता पावित्र्येण त्रिदशतटिनी संश्रितवती ॥ ९

अयं मोक्षापायं प्रथयतु सतां शान्तिवपुषः,
स्फुरज्ज्योतिःपुरो दृगधररदांशुस्तबकितः ।
दृढस्नेहावेशात् सरभसमिलज्ज्ञानललना,
वपुर्लग्नश्चीनांशुकपट इवाऽनेकरचनः ॥ १०

विराजन्ते शान्तेर्दिशि-दिशि वपुःकान्तिनिकरा,
नखज्योतिर्जालस्तबकखचित्ताः सृत्वरतराः ।
स्मरे ध्वस्ते रत्या निजतनुलतातः परिहृताः,
सुवर्णालङ्कारा इव नवमणिश्रेणिरुचिराः ॥ ११

स वः शान्तिः शान्तं सृजतु भवतां येन सहसा,
बहिश्चक्रे नित्यं स्वहृदयपथाद् राजसगुणः ।
ततो देहोद्गच्छद्द्युतिततिपरीवेषमिषतः,
स ईप्सुः स्वस्थानं किमनुनयनायाऽऽगत इह ॥ १२

सहेलं खेलन्त्या धृतिललनया येन युतया,
विकीर्णोऽयं वासः सघुसृणलवश्चान्दन इव ।
समन्तात् सर्पन् यत् तनुरुचिभरो राजतितरां,
तरांसि द्विष्टानां क्षपयतु स शान्तिर्जिनपतिः ॥ १३

श्रिये स श्रीशान्तिः प्रणमदमरीभिः प्रगुणितैः,
कटाक्षाणां लक्षैः स्तबकितमिदं यद्वपुरभूत् ।

जनुः स्नात्रारम्भे कनककमलभ्रान्तिविवशै-
र्दलन्नीलीनीलैर्भ्रमरपटलैराश्रितमिव ॥ १४

यदीयाङ्गोद्गच्छत्किरणपटलैः स्वर्णविमलै-
र्द्विजश्रेणी-चक्षुः करतल-नखाऽभीशुशबलैः ।
नभोभित्तौ चित्रं कृतमिव शिवश्रीरतिकृते ।
प्रभुः स श्रीशान्तिर्भवतु भवतां भ्रान्तिहतये ॥ १५

जनानामानन्दं नयनयुगयोः स्वर्णविशदः,
करोतु श्रीशान्तेस्त्रिभुवनपतेः कान्तिनिकरः ।
सितध्यानेणाक्ष्याः सरभसपरीरम्भसमये,
विलग्नः काश्मीरद्रव इव तदङ्गाद् विलुलितः ॥ १६

स्वगन्धं कस्तूरी वितरतितरां यद्यनुपमं,
मृदुत्वं चाऽम्भोजं विधुरपि तदाह्लादकगुणम् ।
तदा जात्यस्वर्णं भवति सदृशं यस्य वपुषः,
स देवो देवानां विरचयतु शान्तिः शिवसुखम् ॥ १७

त्वया त्यक्तं कृष्णात्रयमतिकटु स्वादमधुरं,
परं मा मा त्याक्षीरिति गदितुमागादुपयदम् ।
असौ लेश्या पद्मा किमु तनुरूचिव्रातमिषतः,
स देवः श्रीशान्तिर्वितरतु शिवं विष्टपपतिः ॥ १८

औन्नत्य-स्थिरता-सुवर्णमयता-सन्नन्दनाद्यैर्गुणै-
रस्माकं विभुना जितोऽपि किमसौ स्तब्धो न धत्ते नतिम् ।
मृष्यामस्तदमुं न विद्विषमिति ज्योतिर्भरा यत् तनो-
र्जेतुं मेरूमिवोत्पतन्ति सततं शान्तिः स वस्त्रायताम् ॥ १९

(शार्दूलविक्रीडित)

नम्राणां हृदये भुजासु करयोः कण्ठे च कर्णद्वये,
मौलौ मौक्तिकपङ्क्तियुक्तकनकालङ्कारभावं गताः ।
व्याख्यायां दशनांशुमिश्रितवपुर्भासां भरा निर्भराः,
श्रीशान्तेर्भविनां भवन्तु सततं सर्वार्थसम्पत्तये ॥(शा.वि.) २०

सेवे देवेशमीशं प्रतिदिनममृतैर्निर्जरान् भोजयामि,
प्रीणामि श्रीप्रदानात् कुवलयमगमन्नोकलङ्कस्तथापि ।
नाथानन्यापनेयं तमपनयनमेतीव विज्ञप्सयैण-
श्चन्द्रेण प्रैषि लक्ष्मच्छलत उपयदं स श्रिये शान्तिनाथ ॥ २१
(स्रग्धरा)

विश्वाप्यायकगो विलाससदनं सद्वृत्तताभाजनं,
तारस्फारकलालयः कुवलयश्रीहासवैहासिकः ।
तन्वन् वैबुधमण्डलेऽमृतरसास्वादप्रसादं सदा,
देवः श्रीमृगलाञ्छनः प्रथयतु श्रेयःश्रियः शाश्वतीः ॥ २२
(शार्दूलविक्रीडित)

यन्नामधेयस्मरणात्प्रयान्ति, शान्तिं भवभ्रान्तिजतान्तिसङ्घाः ।
श्रीआचिरेयः प्रभुरेष देयात्,
सताममेयाः शिवसौख्यलक्ष्मीः ॥ (उपजाति) २३

स दिशतु भगवान् कुरङ्गलक्ष्मा, सुखलक्ष्मीर्जगतां गतान्तरायाः।
यदतुलमहिमोपजीवनेन, द्युमणिमुखा भुवने प्रसिद्धिमापुः ॥२४
(पुष्पिताग्रा)

एवं देवनरेन्द्रवन्दितपदो नीतः स्तुतेर्गोचरं,
बाह्याभिः किल कल्पनाभिरपि यः प्रव्यक्तभक्तेर्वशात् ।

नित्यं श्रीगुरुसोमसुन्दरपदध्यानैकलीनात्मनां,
भूयाद् वाञ्छितसिद्धये स भवतां श्रीवैश्वसेनिर्जिनः ॥ २५

(शार्दूलविक्रीडित)

## ३. ( ३ ) श्रीनेमिरूपस्तवः

शब्दब्रह्माम्बुराशेः प्रसृमरलहरीकोटिभिर्निप्लुतं यद्,
रूपातीतं स्वरूपं तदतिमतिमतां योगिनामेवगम्यम् ।
तस्मादर्वाग्दृशामप्यधिगमविषयं सुस्तवं बाह्यरूपं,
रूपस्थध्यानसिद्ध्यै किमपि भगवतः स्तौमि नेमीश्वरस्य ॥ १

(स्रग्धरा)

(शार्दूलविक्रीडित)

रक्ते राजीमतीहृदि प्रतिदिनं वासानुभावादिव,
प्राणिद्रोहकमोहकण्टकहतौ प्रोद्भूतकोपादिव ।
भर्तृप्राणितयाचनार्थविलुठद्रत्यङ्गरागान्नु वा,
श्रीनेमेः पदयामलं विजयते जाग्रज्जपापाटलम् ॥ २

पञ्चानुत्तरमुख्यदेवपदवीभोगे न मां त्यक्तवां-
स्तत्किं मुञ्चसि साम्प्रतं शिवपुरी साम्राज्यभोगे विभो ! ।
एवं प्रार्थनया यदीयपदयोर्लग्नः सदा शोणिम-
व्याजात् राग इव श्रियेऽस्तु स शिवासूनुर्जिनो भाविनाम् ॥ ३

पूर्वं वृत्ततरौ पुरश्च पृथुलौ पञ्चाङ्गुलीमञ्जुलौ,
श्रीमन्नेमिजिनेश्वरस्य चरणौ दत्तां सतां सम्पदः ।
पञ्चेषोर्भुवनत्रयैकसुभटस्याच्छिद्य सद्यः क्रुधा,
तूणीरावुररीकृताविव शरैर्युक्तावमू स्वामिना ॥ ४

विश्वाऽऽस्कन्दकंदर्पदर्पकमहावीरं निहन्य क्षणात्,
कौसुम्भांशुकयामलं गतमलं तद्भार्ययोः कोपतः ।
आछिद्य स्वपदाब्जयोः किल तले चिक्षेप यः पाटल-
ज्योतिर्जालमिषात् स नेमिरवताद् वीराधिवीरः प्रजाः ॥ ५

गत्या यद् विजिता मतङ्गजघटा नष्टा दिगन्ताटवी-
प्रान्तं प्राप तया स्वसन्धिविधये स्वालङ्कृतिः प्राभृतम् ।
चक्रे यद् पदयोः सुशोणिममिषात् सिन्दूरपूरः किल,
श्रेयःसम्पदमातनोतु भगवान् श्रीनेमिनाथः स वः ॥ ६

वेल्लच्छोणमरीचिवीचिदहनव्याप्तावधः कज्जल-
श्यामाङ्गद्युतिधूम्रधूमपटलावूर्ध्वप्रदेशे पुनः ।
नम्राणां भविनां दुरन्तदुरितश्रेणीः सदा जुह्वतः,
श्रीमन्नेमिविभोः पदौ विजयदौ स्तां यज्ञवेदीसमौ ॥ ७

चिन्तातीतफलप्रदानकलया यस्य प्रभोर्निर्जिताः,
कल्पक्षोणिरुहा दशाऽपि धरणीं त्यक्त्वा सुमेरुं गताः ।
स्वस्थानं पुनरीप्सवश्चरणयोः स्वान् पल्लवान् प्राभृतं,
कुर्वन्ति स्म दशाङ्गुलिच्छलवशान्नेमिः स वः श्रेयसे ॥ ८

यस्य प्रोल्लसत्ता प्रतापमहसा जिग्ये सहस्रद्युति-
स्तन्नूनं बहुधा स्वभक्त्यतिशयप्रादुष्कृति कृत्यवित् ।
यत्पादौ दशधा विनिर्मिततनु भेजे नखानां मिषात्,
स श्रेयः पदसम्पदः प्रददतां देवः शिवानन्दनः ॥ ९

विष्णोर्वीर्यमदज्वरप्रशमने वैद्याविव स्वर्गिणां,
विश्वध्यापकदर्पदर्पकगिरौ दम्भोलिदण्डाविव ।

कल्पक्षोणिरुहाविव प्रणयने नम्रेप्सितार्थावले-
र्दोर्दण्डौ भवतां शिवाय भवतां श्रीनेमिनः स्वामिनः ॥ १०

भजति सुरमणिश्चेद् बीजतां कामकुम्भैः,
सरसनिजपयोभिः सिञ्चते कामधेनुः ।
तदपि भवति नेमेर्नैव हस्तस्य चिन्ता-
ऽतिगशिवसुखदातुः कल्पवृक्षः सदृक्षः ॥ (मालिनी) ११

आदर्शा नवपद्मरागघटिताः श्रीसाधुधर्मश्रिया-
मिष्टार्थान् दशदिग्नृणां प्रथयितुं चिन्तामणिश्रेणयः ।
नम्राणामसमाधिभेदशलभाऽऽप्लोषाय दीपाङ्कुराः,
श्रीनेमेः करजा दशापि सुदशां पुष्णन्तु भावस्पृशाम् ॥ १२

शुक्लध्यानमृगाधिपस्थितिकृते निलाविशाला शिला,
सङ्ख्यातीतगुणालिखेलनविधौ किं वा चतुष्कावनिः ।
अप्रक्ष्येक्षणवारिधौ निपततां द्वीपौ जगच्चक्षुषां,
श्रीशैवेयजिनेश्वरस्य विपुला वक्षःस्थली पातु वः ॥ १३

वाह्यालीयुगलीनिभौ भुवनदृग्वाहावलीखेलने,
श्री-वाग्देवतयोर्मणीमयवरादर्शाविव प्रोज्ज्वलौ ।
राग-द्वेषजितोः स्फुराविव लसद्-ध्यानाह्वयोर्वीरयो-
रानन्दोदयसम्पदं प्रदिशतां नेमेः कपोलौ सताम् ॥ १४

श्री-भारत्योर्युवत्योरिह सह वसतिं संसृजन्त्योः किमेते,
भ्रूपाली सद्वनालीपरिकरिततटे क्रीडनार्थं सरस्योः ।
किं वा द्रोण्यौ तरीतुं भवजलधिमिमं कुर्वतामेव मूहं,
भव्यानां दर्शयेतां शिवपथमचिराल्लोचने नेमिभर्तुः ॥ (स्रग्धरा) १५

मोक्षद्वारकपाटसम्पुटतटप्रोद्घाटने कुञ्चिके,
राग-द्वेषमतङ्गजद्वयवशीकाराय साराङ्कुशौ ।
नृणां दुर्गतियायिनामशकुनीभूते भुजङ्ग्यौ किमु,
श्रीकर्यौ वदनस्थवाक्कमलयोर्नेमेर्भुवौ वः श्रिये ॥ १६

मोक्षाऽध्वन्यध्वगानां विषमतमतमःस्तोमसंहारचन्द्रः,
केलीगेहं कलानां त्रिभुवनविजयश्रीवशीकारपुण्ड्रः ।
ब्राह्मीक्रीडातडागं मणिमयमुकरः केवलज्ञानवध्वाः,
सान्द्रानन्दं प्रजानां जनयतु वदनं श्रीशिवायाः सुतस्य ॥ १७
(स्रग्धराः)

विकचकमलकोशे दाडिमीबीजपङ्क्तिः,
शशभृति यदि वा स्यान्मौक्तिकश्रेणिपङ्क्तिः ।
किमपि तदुपमानं स्यात् तदा यन्मुखस्य,
प्रथयतु स शिवानि श्रीशिवासूर्जनानाम् ॥ (मालिनी) १८

जन्मस्नात्रमहे महेन्द्रनिवहाः क्षीरार्णवाम्भः पतत्-
कुम्भेभ्यः शिरसि प्रभोः शबलितं यस्याङ्गभासां भरैः ।
शेवालभ्रमतः पुनः पुनरहो हस्ते क्षिपन्त्यन्यतः,
सोऽयं यच्छतु भाविनां नवशिवानन्दं शिवानन्दनः ॥(शा.वि.)१९

प्राकारत्रयवेष्टितं सुरवरश्रेणीभिरासेवितं,
दीव्यन्नादकलं कलङ्कविकलं नीलीदलश्यामलम् ।
मायाबीजमिवानवाऽघनिकरप्रोच्या(च्चा !)टनाय स्फुटं,
यद् ध्यायन्ति ऋषीश्वराः स भवतान्नेमीश्वरः सिद्धये ॥ २०

लालान्दोलयुगं नु कर्णयुगलं तद्वत् तनौ कुण्डल-
व्याजस्वर्णमयासनं विजयते विश्वत्रयीस्वस्तरौ ।
ज्ञानध्यानकलाविलासललनाप्रेङ्खोलनाकेलये,
स श्रीनेमिजिनः समग्रवृजिनप्रध्वंसनः पातु वः ॥ २१

मुक्त्वा मामनुरागिणीं सुभग ! हे ! त्वय्येकचित्तां सदा-
सिद्धानन्तभुजङ्गसङ्गमकरीं मुक्त्यङ्गनां यासि किम् ।
एवं राजमतीमतीव य उपालम्भान् प्रयच्छत्तरा-
मप्यौज्झत् तृणवच्छ्रियेऽस्तु भगवान् नेमिः स योगीश्वरः ॥२२

पावित्र्योज्वल्यसम्पन्मम सदतिशया श्लाघनीयश्च शब्दः,
किन्तु व्यर्थीभवन्ति ध्रुवमखिलगुणा मध्यकौटिल्यदोषात् ।
एवं ध्यात्वेव यस्य क्रमकमलयुगं तद्व्यपोहायकम्बु-
र्लक्ष्मव्याजेन भेजे स दिशतु भगवान् श्रीशिवासूः सुखानि ॥२३
(स्रग्धरा)

प्रणमदमरनाथस्वर्णकोटिररोचिः-
शबलिततनुकान्तिर्नेमिदेवः श्रिये वः ।
सकनकमृगनाभीपत्रभङ्गीसुरङ्गी-
कृत इव शिवलक्ष्म्याऽऽश्लिष्टसर्वाङ्गयाऽसौ ॥ (मालिनी)२४

भुवनविभुरसौ शिवाख्यलक्ष्मीर्दिशतु
सतां भगवान् शिवाङ्गजन्मा ।
प्रतिफलति यदीयसंविदन्तः
समसमयं सकलः पदार्थसार्थ ॥ (पुष्पिताग्रा) २५

भक्तिप्रह्वमहेन्द्रपूजितपदाम्भोजः स भोजाङ्गजा,
जाग्रन्मानसहंस एवमखिलत्रैलोक्यनाथः स्तुतः ।
सिद्धानन्तचतुष्टयस्थितिमयः शैवेयदेवः सतां,
दत्तां श्रीगुरुसोमसुन्दरकरप्राग्भारगौरं यशः ॥ २६

## ४. (४) श्रीपार्श्वनाथफणास्तवः

कीर्तिःस्फुर्तिमियर्त्ति सर्वनिधयः श्रीगेहमध्यासते,
क्रीडामाकलयन्ति ताः करतले चाऽष्टौ महासिद्धयः ।
यन्नामस्मरणैकतानमनसां पुंसां निरस्तैनसां,
स श्रीपार्श्वजिनो धिनोतु भविनो ज्ञानश्रियां दानतः ॥ १
(शार्दूलविक्रीडित)

सप्तद्वीपसमुद्रमुद्रितमहीपीठप्रतिष्ठान्यमी,
जेतुं सप्तमतानि दुर्नयभवान्युत्तम्भिता रेजिरे ।
यात्रालञ्छनदण्डका इव फणाः सप्तापि यस्य प्रभोः,
श्रेयः सम्पदमातनोतु भगवान् श्रीपार्श्वदेवः [स वः] ॥ २

दुःखौर्वानलतप्तसप्तनरकक्षारार्णवान्तः पतज्-
जीवानामवलम्बहेतव इमे किं सेतवः प्राञ्जलाः ।
नित्यानन्दमहोमहोदयपुरीसम्प्रापणप्रत्यलाः,
श्रीमत्पार्श्वफणा नृणामविपदः पुष्पन्तु सत्सम्पदः ॥ ३

गाम्भीर्यादिगुणैर्जितास्तत इमे सप्तापि रत्नाकरा,
यस्य स्नात्रविधित्सयेव युगपत् स्व-स्वप्रवाहैः पृथक् ।
पुष्पैः संवलितैः फणामणिमिषादीयुः स्फुरद् - भावनाः,
स श्रीपार्श्वजिनेश्वरः कलिमलप्रक्षालनायाऽस्तु वः ॥ ४

भृत्यैरस्माभिरेव प्रगुणितमतुलं स्वर्ग्यसौख्यं त्वयाप्तं,
तीर्थेश ! त्वं तथैतत् तदुपकृतवतो हन्सि किं नः कृतज्ञ ! ।
कर्माण्यष्टौ शिरोंह्रिस्थितिभुजगमिषाद् यस्य विज्ञप्तिमेवं,
कर्तुं साक्षादिवासन् स भवतु भगवान् पार्श्वदेवः श्रिये वः ॥५
(स्रग्धरा)

कुक्षिक्षिप्तत्रिलोकं हरिमपि धरते यः फणाग्रैककोणे,
पृथ्वी पृथ्वी समेरूक्षितिधरजलधिर्माल्यवद् यस्य मौलौ ।
सोऽयं नागाधिराजः क्रमकमलयुगे लक्ष्मदम्भान्निलीन-
श्छत्रीभूतश्च शीर्षे वदति सुविभुतां यस्य पार्श्वः स जीयात् ॥६
(स्रग्धरा)

येनैकेन भटेन मोहकटकं विश्वत्रयीकण्टकं,
विस्फुर्जत्वपटं स्मरादिसुभटं प्रौढप्रतापोत्कटम् ।
जित्वा तद्विजयध्वजा इव फणाव्याजात् समुत्तम्भिताः,
श्रेयः श्रीभुजगध्वजः स जगतां दत्तां गताङ्हस्ततिः ॥(शा.वि.)७

अग्राऽऽलम्बितरत्नकान्तिलहरीवेल्लत्पटैः सप्तभिः,
कूपस्तम्भवरैः समाश्रिततनुः स्फुर्जत्फणादम्भतः ।
रङ्गच्चङ्गगुणप्रथाऽश्लथमहाकाष्ठान्वितः संसृति-
क्षाराब्धौ भविनां फणिध्वजजिनः पोतायमानः श्रिये ॥ ८

रत्नश्रेणियशःप्रशस्तिसहिता यस्य त्रिलोकेशितु-
र्जेतुः सप्तभियां विभान्ति विजयस्तम्भा इवामी फणाः ।
सप्ताप्युच्चतमास्तमालसरला सप्ताश्वतेजोजयि-
ज्योतिर्द्योतिदशां तनोतु सुदृशां श्रीपार्श्वनाथः प्रभुः ॥ ९

एकस्मै प्रददे त्वयेन्द्रपदवी सर्पाय तन्नोऽपि तां,
देव ! प्रापय यत् त्वदीयकरुणा सर्वेषु साधारणा ।
अष्टावष्टकुलैः प्रधानपुरुषा विज्ञीप्सयेतीव यत् –
पार्श्वेऽमी प्रहिताः शिरोंह्रिभुजगव्याजात् स पार्श्वः श्रिये ॥१०

व्यामोहप्रबलान्धकारपटलीछन्ने कुतर्कावली–
तद्‌तद्‌दुर्गमहेतुगर्त्तविषमीभूते च मोक्षाध्वनि ।
पुंसां सञ्चरतां फणामणिगणा दीप्राः प्रदीपा इव,
भ्राजन्ते किल यस्य शस्यकमलालम्भाय देवः स वः ॥ ११

उत्कृष्टायाः प्रणतभविनां मोहनीयस्थितेर्यः,
कोटाकोटीर्दश–दश पृथक् सागराणां क्षणेन ।
चूर्णीकर्तुं फणिपतिफणाव्याजतः सप्तदण्डान्,
धत्ते चण्डान् स भवतु सुतां भूतये पार्श्वनाथः ॥ १२
(मन्दाक्रान्ता)

सद्‌ध्यानानिलवृद्धदुस्तपतपोदावानलज्वालया,
दुष्कर्मौघवनेऽमितान्तगहने दन्दह्यमाने सति ।
ब्रह्मद्वारविनिगता मणिगणस्फुर्जत्स्फुलिङ्गान्विता,
श्रीवामेयफणा जयन्तु सततं धूमोग्रलेखा इव ॥ (शा.वि.)१३

धत्ते सन्ततमुन्नतिं मलिनतापूरेण दूरे कृतो,
नित्यं जीवनदानदस्त्रिजगतां स्वामी न चाऽमी ततः ।
सेवां कर्तुमुपागता जलधराः सर्वे फणाव्याजतो,
यत्पार्श्वं स शिवश्रियेऽस्तु भगवान् श्रीअश्वसेनाङ्गजः ॥ १४

गम्भीरध्वनिबन्धुरः फणिमणिश्रेणीतडिद्‌डुम्बर–
ज्योतिर्भासुरिताम्बरः शमरसप्राग्भारपूर्णान्तरः ।

प्राप्तानन्दविवेकिकेकिनिकरः श्यामाङ्गरोचिर्धरः,
पार्श्वोऽम्भोधरसोदरः स तनुतां शस्यश्रियः शङ्करः ॥ १५

शुक्लध्यानकलाकलापमतुलं पीयूषयूषोज्वलं,
पातुं यस्य समुद्यतस्य विधृतं चारित्रलक्ष्म्या किल ।
मेघाडम्बरमातपत्रमतुलं वेल्लत्फणामण्डल-
व्याजात् पार्श्वजिनः स वः शिवरमा देयादमेया रयात् ॥ १६

क्षेत्रोपाधिजमुख्यदुस्सहमहादुःखोर्मिसंवर्मितान्,
मग्नान् सप्त सुसन्ततान्धतमसश्वभ्रान्धकूपेष्वमून् ।
उद्धर्तुं युगपत् समस्तभविनः सप्तापि रज्जूपमा,
रेजुर्यस्य फणाः पराणयतु मां वामाङ्गभूर्मङ्गलम् ॥ १७

सद्ध्यानप्रथमानवायुपटलैरत्यर्थमुद्वेलितान्,
कारुण्याम्बुनिधेः सदा निरवधेः क्षीरोज्ज्वल ! त्वं दधेः ।
कल्लोला इव रेजिरे बहिरिता देहांशुभिः श्यामला,
एते यस्य फणाः पृणातु स नृणां श्रीपार्श्वदेवः शिवम् ॥ १८

नम्राऽनेकसुरासुराधिपनृणां यस्सेव नाकारिणां,
चापल्य-प्लवगीसमानकमलास्वैरित्वविच्छित्तये ।
एता आयसश्रृङ्खला इव फणा यस्य प्रभो रेजिरे,
प्रेष्यत्वप्रतिपन्नपन्नगपतिः पार्श्वः स वस्त्रायताम् ॥ १९

एताः सप्तनयश्रियां मणिसुमश्रेणीभिरुद्भासिताः,
क्रीडाकल्पलता इवोरगफणाः सप्ताऽपि यस्याबभुः ।
सप्तद्वीपधरानरावलिमनोऽभीष्टार्थसार्थप्रदाः,
श्रीवामातनयो नयोज्वलपथं स प्रापयत्वङ्गिनः ॥ २०

विश्वेऽत्र सप्तव्यसनोदयश्रियां, व्याषेधनार्थं किल धूमकेतवः ।
अमी समीहां भविनां परीप्रतु,
श्रीपार्श्वनाथस्य फणाः स्फुरद्गुणाः ॥ (उपजाति) २१

सरभसपरिरम्भोत्कण्ठया सिद्धिवध्वा,
निजगृहनयनार्थं रज्जवोऽमी विमुक्ताः ।
किमिति हृदि विकल्पा भाविनां सन्दधाना,
ददतु शिवसुखं वः पार्श्वभर्तुः फणास्ते ॥ (मालिनी) २२

उद्दामस्थामधामक्रमकमलनमत्सर्वगीर्वाणवृन्दः,
कामान् वामाङ्गजन्मा स सृजतु सफलान् भाविनां भूर्भुवःस्वः ।
यन्माहात्म्यं महेभ्यं वणिज इव सदैवोपजीव्योपजीव्य,
प्राप्ताः ख्याति द्युकुम्भ-द्युमणि-
सुरतरु-स्वर्गवी-स्वर्गताढ्यः ॥ (स्रग्धरा) २३

प्रथयतु धरणोरगेन्द्रलक्ष्म्या जिनपतिरेष विशेषमुखीर्वः ।
यदमलनखमण्डली विरेजे
तम इह हर्तुमिव प्रदाय पङ्क्तिम् ॥ (पुष्पिताग्रा) २४

उत्प्रेक्षोपमिति प्रवर्त्तितफणास्तोत्रप्रणीताध्वना,
श्रीपार्श्वः कथमप्यहो ! क्षणमसौ नीतः स्वचितं मया ।
मिथ्यानेकविकल्पजालजनितं निर्नाश्य घोरं तमः,
कुर्यान् मे गुरुसोमसुन्दरवरस्वात्मावबोधं महः ॥(शा.वि.) २५

## ५. (५) श्रीमहावीरगुणस्तवः

(शार्दूलविक्रीडित)

स श्रीवीरजिनो [धिनो] तु भविनोऽभीष्टार्थसार्थार्पणान्,
नव्यः कोऽपि सुरद्रुमः क्रमनमद्वृन्दारकग्रामणीः ।
त्रैलोक्यादरसङ्गिनः सममहा एकोप्यनेकाङ्गिनस्-
तूर्णं पूर्णमनोरथान् प्रथयति ध्यातः श्रुतो वापि यः ॥ १

यद्रूपं परमार्थसन्न वचसां तद्गोचरः कर्हिचिद्-
यच्च स्यात् तदऽवस्तु सत्सुरततिः शक्या न यस्य प्रभोः ।
स्तोतुं वीरजिनं व्यवस्यति तमप्येषोऽनुरागेरितः,
शक्याशक्यविचारणे चतुरता प्रायो न यद्रागिणाम् ॥ २

यं वक्तुं प्रखरीभवेद् भगवती नो वैखरी भारती,
नै वा सावपि मध्यमा कलयितुं प्रागल्भ्यमभ्यस्यति ।
पश्यन्त्याविषयः पुराणपुरुषः स ब्रह्मलक्ष्मीमयः,
श्रीवीरस्तनुतां जिनस्तनुमतां स्वात्मावबोधं महः ॥ ३

प्रत्यूह प्रलयस्त्रिलोकविजयः सौभाग्यभाग्योदयः,
श्री-ह्री-धी-धृति-कीर्त्तयः स्ववशगाश्चाऽष्टौ महासिद्धयः ।
यद्भक्तेर्भविनां भवन्ति भुवनस्वामी स चामीकर-
द्योतिर्द्योतिवपुः प्रपुष्यतु सतां श्रीवर्धमानः श्रियम् ॥ ४

स्वर्गिभ्यो नारकाणां स्थलजलख[च]रप्राणिनां वा नृणां वा,
सौख्याऽद्वैते प्रवृत्ते त्रिजगति विलसत्सान्द्रहर्षप्रकर्षे ।
भेदं नो वेद विद्वानपि निपुणमतिर्यस्य जन्मोत्सवेऽसौ,
लक्ष्मीः श्रीवर्धमानः प्रथयतु भगवान् भाविनां वर्धमानाः ॥५

(स्रग्धरा)

प्रह्वेन्द्राणीगणानि स्फुटपटहरवव्याप्तविश्वाङ्गणानि,
क्रीडद्देवाऽसुराणि श्रवणसुखसुरीगीतिभिर्भासुराणि ।
वीरस्याऽनर्गलानि त्रिजगदधिपतेर्मङ्गलानि क्रियासु-
ज्योर्तिः स्फीताम्बराणि त्रिदशगिरिवरे मज्जनाडम्बराणि ॥ ६
(स्रग्धरा)

क्षुभ्यत् क्षारार्णवार्णः प्रसृमरलहरीप्लाव्यामानक्षमाभृत्-
प्राग्भाराक्रान्तभूमीभरनमितफणः प्राप मूर्छां फणीन्द्रः ।
ब्रह्माण्डस्फोटशङ्काभयचकितहृदः कम्पमापुः सुरेन्द्रा-
यस्याऽङ्गुष्ठप्रयोगाच्चलति सुरगिरौ वर्धमानः श्रियेऽसौ ॥७
(स्रग्धरा)

तन्वानो बालकेलीस्तरुवरशिखराद् व्यालमालाः कराला-
दूरं बाला मृणालीरिव बलजलधिर्लीलयोत्कीर्णवान् यः ।
कुब्जं मुष्टिप्रहारात् सुरममरनगोत्तुङ्गमप्यादधानः,
स्तादन्वर्थाभिधानः स भवभयभिदे श्रीमहावीरदेवः ॥ ८
(स्रग्धरा)

अत्यासन्नमपि स्वचित्तसचिवं गुप्तोऽक्षिपत् स्वैरिणं,
मूलादुत्खनकुन्तलांश्च कुटिलान् शीघ्रं स्वकीयानपि ।
स्वायत्तं करणव्रजं विरचयत्येकातपत्रं सृजन्,
साम्राज्यं भवतां शिवाय भवताद् वीरः क्षमाभृद्वरः ॥ ९

यस्याज्ञामुररीचरीकृति सहस्त्राक्षा भुजिष्या इव,
ब्रह्मेशाननरायणप्रभृतयो देवाश्च सेवाकराः ।
कामः सोऽपि विगोपितत्रिभुवनो येन क्षणान्निर्जितो,
देवानामपि देवता स भवतात् श्रीवर्धमानः श्रिये ॥ १०

दीर्यन्ते हृदयानि यैः स्मृतमपि प्राप्तैरपि स्वर्गिणां,
तान् गोपासुरपामरादिरचितान् दुर्गोपसर्गव्रजान् ।
सम्यग् यः परिषह्य मोहनृपतिं जित्वाऽऽसदत् केवल-
ज्ञानं ध्यानपथं प्रयातु भगवान् श्रीवीरदेवः स वः ॥ ११

तूर्णं जीर्णसुचीर्णपूर्णनियमाद्यष्टाङ्गयोगौषधैः,
प्राग् स्वात्मानमबीभवच्छमरसैर्यः पारदैर्लोहवत् ।
सद्ज्ञानाऽनलदग्धकार्मणमलं कल्याणरूपं व्यधात्,
दीव्यत्केवलचिन्मयं स जयतु श्रीवीरयोगीश्वरः ॥ १२

गौरीभूतकलापतिर्गणभृता तन्तन्यमाना नति-
र्हेला निर्जितसर्वदैवतमहः कन्दर्पदर्पापहः ।
उत्पत्ति-स्थिति-संहृति त्रयपदप्रस्तावकः स त्रयी-
मूर्तिः शम्भुरिव श्रियेऽस्तु भगवान् श्रीवर्धमानः प्रभुः ॥ १३

यद्वेदज्ञैर्न भिन्नं न हि सुरगुरुणा नो सहस्राक्षलक्षै-
र्नापि श्रीभारती ये महसि च हसिताऽऽदित्यकान्तौ विलीनम् ।
तद्भिन्दानः सभायामसुर-सुर-नराधीश्वराणां समक्षं,
सन्देहध्वान्तजातं सकलगणभृतां सोऽस्तु वीरः शिवाय ॥ १४

(स्रग्धरा)

नित्यं यो जागरूकप्रकृतिरविकृतिर्दग्धकन्दर्पहव्यो,
जात्यस्वर्णाङ्गवर्णो दुरितभरहरः स्वर्गसौख्यस्य दाता ।
वाक्-चेतः- कायकुण्डत्रय इह निहितो वेदविद्या विधिज्ञै-
र्भक्त्या संसेव्यमानो वितरतु स शिवं श्रीमहावीरदेवः ॥ १५

(स्रग्धरा)

श्रीमद् वीरस्य वाणी द्व्यधिकदशभिदां पर्षदां हर्षदात्री,
दात्री सन्देहपङ्क्तेः समसमयमहो ! भुर्भुवःस्वर्जनानाम् ।
संसारापारपाथःपतिपतितजनोत्तारणे यानपात्री-
भूता भूतावलीनां दिशतु शिवरमाः सारमाधुर्यपात्री ॥ १६

(स्रग्धरा)

गामेकां त्रिपदीं भजद्द्विजवरव्राताय गाढार्थिने,
यो दत्ते स्म परःसहस्रगणना गा बिभ्रदप्यन्वहम् ।
दातृणां प्रथमस्तथापि कुतुकं जेगीय्यते योगिभिः,
स श्रीमान् भुवनातिशायिचरितः श्रीवद्र्धमानः श्रिये ॥ १७

(शा.वि.)

प्राग्भारैर्भगवान् गवां प्रसृमरैर्मोहान्धकारोच्चय-
प्रध्वंसं रचयश्च यः कुवलयप्रोल्लासमापादयन् ।
पापव्यापविपाकतप्ततनुभृत्सन्तापनिर्वापणः,
श्रीवीरो जिनचन्द्रमाः सुमनसां देयाददेयारमाः ॥ १८

यस्यैव द्वादशाङ्गात् त्रिदशतरुवनात् सूक्तिपुष्पैर्गृहितै-
र्ग्रन्थं ग्रन्थं स्वबुध्या बहुविधरचना ग्रन्थमाला विशालाः ।
मालाकारा इवापुः सकलमतगता ग्रन्थकाराः प्रसिद्धिं,
स श्रेयस्त्रैशलेयः प्रथयतु भुवनध्येयसन्नामधेयः ॥ १९

गौर्यस्यैकाप्यचिन्त्यप्रसृमरमहिमा गोतमानामवाप्या-
ऽऽश्लेषं प्रासूत तास्ताः समसमयमहो ! विश्वकुक्षिम्भरीर्गाः ।
पायं पायं व्यपायं मधुमधुररसान् भव्यजीवा यदीयां-
स्तापं निर्वापयन्ते भवदवथुभवं स श्रिये वद्र्धमानः ॥ २०

व्यापी लोकाग्रगोऽपि प्रतिसमयजनि-ध्वंसवान् शाश्वतोऽपि,
ज्योतिरूपोप्यरूपो व्यपगतकलुष-ध्यानगम्योप्यगम्यः ।
सङ्ख्यावानप्यसङ्ख्यः सकलगुणमयोऽप्यग्रणीर्निर्गुणानां,
श्रेयः स्याद्वादरूपः प्रथयतु भगवांस्त्रैशलेयः प्रजानाम् ॥ २१

लक्ष्मीं वीरः स दिशतु सतां यत्पदौ वन्दमानाः,
सङ्क्रामन्तः क्रमनखमणीदर्पणान्तर्भवेयुः ।
लोको एकादशतनुधरा ईश्वरा एव सर्वे,
नित्यं मृत्युञ्जयपदभृतः श्रीशिवाश्लेषभाजः ॥ (मन्दाक्रान्ता) २२

श्रीमान् योगधुरन्धरस्थितिधरः सन्नन्दनश्रीभरः,
सौवर्णद्युतिभासुरः प्रतिदिनं मध्यस्थतासुन्दरः ।
ज्योतिश्चक्रधरः सुपर्वनिकरस्थानं श्रियां सङ्करः,
कुर्यान्मन्दरसोदरः शिवसुखं श्रीवीरतीर्थङ्करः ॥ (शा.वि.) २३

देवः सेवकवत्सलस्तनुमतां दत्तां प्रमत्तांऽऽतराऽऽ-
रातिस्फातिभरप्रपातिजनतात्राता स वीरः श्रियम् ।
चित्रं यस्य कपोलयोः प्रतिफलद् वीक्ष्य स्वचक्षुर्जना,
भृङ्गभ्रान्तिभृतश्चरीक्रति मुहुश्चेलाञ्चलैर्वीजनम् ॥ २४

श्रीसिद्धार्थनरेशवंशकमलाशृङ्गारचुडामणि-
र्मूर्छन्मोहमहान्धकारहरणप्राभातिकाहर्मणिः ।
एवं किञ्चिदपि स्तुतस्तनुधिया श्रीवर्धमानो मया,
स्ताल्लब्धोदयसोमसुन्दरगुरुश्री-ह्री-धृति-स्फीतये ॥ २५

पू.आ. श्रीकुलमण्डनसूरिकृताः

# ॥ श्रीपञ्चजिनहारबन्धाः स्तवाः ॥

## ६. (१) श्री आदिनाथस्तवः

गरीयो गुणश्रेण्ययरेणं प्रवीणं परार्थे जगन्नाथ ! धर्मे धुरीणम् ।
धराधारमादिप्रभो ! रङ्गरम्यं स्तुवे त्वां बुधध्येयं धौतारिवारम्॥१

जनेनार्जवेनास्तमायाऽप्रमेयामलज्ञानजन्मादिहीन ! प्रदेयाः ।
नमन्नेकनाकिन्नमन्दप्रमोदममानं जनं मुक्तिलक्ष्मीविनोदम् ॥२

श्रीमन्नाभेयानन्दकन्दे पयोदं, सद्राज्यादिश्रीराश्रयं सम्प्रपेदे ।
वल्लीवारामं त्वां विभो ! सुप्रभावं,
निर्वाणे मावद्वेषिवन्ध्ये यियासुम् ॥ ३

दयोदारसंसारतीरस्थितारं, छितारम्भदम्भो विभो ! वैरिवारम् ।
सुरासेव्य ! मे देव ! भिन्दन्निषीद,
ध्रुवानन्दसुस्थे हृदि त्वं प्रसीद ॥ ४

## ७. (२) श्रीशान्तिनाथस्तवः

रमाधार याताऽरते तारकान्ते, रजोमारसंहारकावैर ! शान्ते ! ।
सुधासार ! तापौघतासे यतेऽहं,
प्रभावैर्महान्तं स्तुवे त्वामितोऽहम् ॥ १

क्रमादुत्तमक्षेमधामन्निकामं, महामोहक्रव्यादकाल ! प्रकामम् ।
कदा त्वामहं विश्वराजत्वराजं,
भजेयं विकल्पापह ! ज्ञानभाजम् ॥ २

जुषन्ते सुरेशाः सयोषा विशेषात्,
तथा त्वामृजुप्रज्ञ ! लोका अशेषाः ।

सृतं मे सुभोगैरतोऽष्टप्रकृष्ट-
द्विषच्छेदसृष्टौ श्रये त्वामकष्टम् ॥ ३

पुरा येन गीस्तेऽनतीचारपञ्चाश्रवासिन् प्रपन्नाऽप्रपञ्चप्रपञ्चा ।
रिरंसाऽऽरसेऽस्मिंस्तमोऽहा समोहा-
पहाः स्युर्नरि ज्ञानपुण्यप्ररोहाः ॥ ४

## ८. (३) श्रीनेमिनाथस्तवः

सना नेमिमानौम्यकामं निकामं,
परब्रह्म संसाधकब्रह्मकामम् ।
सरङ्गं श्रितानां समस्तं प्रशस्तं,
प्रसादेन सञ्जायते यस्य शस्तम् ॥ १

वन्दन्ते त्वां धीरताया अगारं, रङ्गाद्गङ्गागौरकीर्त्तेऽपहासम् ।
संहारायाधीश ! पापस्य तज्ज्ञा, ज्ञातज्ञेयानन्तचिद्धाकदम्बम् ॥२

रङ्कं हीनं दीनमेतं कृताशं, रक्ष स्वामिन् ! मानसे त्वां धरन्तम् ।
कष्टच्छेदे दक्ष ! मां विश्वनेता, तायिन्नन्तर्वैरवद्भ्यो वराकम् ॥३

रम्यः श्रेयः श्रीरसाबद्धरङ्गो, रङ्गद्भाग्याभोग ! तं रक्षकं त्वाम् ।
मोहश्यामारम्भभानो ! भजेऽयं, रक्षेरेतं तेन रक्षैककामम् ॥ ४

तरीतुं भवाम्भोधिमेतं दुरन्तं, तरण्डायितं तात ! मन्ये लसन्तम्।
मिषातीतमेकं तवैव प्रभावं,
प्रभावन्ध्यमिथ्योर्मिमाविःस्वभावम् ॥ ५

## ९. (४) श्रीपार्श्वनाथस्तवः

यमीशं शमीशाऽरिरंसानिरासाऽनिशं संश्रयन्तीष्टनिर्वाणवासाः।

रसादस्ति वामेय ! तं हारिदेहारिद !
त्वां वरज्ञान ! नन्तुं ममेहा ॥ १

रणादौ मुदा येन ते विश्वपावि, स्मृतं नाम रक्षाकरं विघ्नलावि।
भदन्तास्य विश्वानि कीर्त्तिः पिपर्त्ति,
प्रदत्तारिभङ्गं च तं श्रीरियर्त्ति ॥ २

निरीहेन ! येनापराजेय ! भेजे, भवानीश ! नित्यं वतंसः स रेजे।
हृताज्ञान ! सत्यार्थवादिप्रवादिव्रजे
बुद्धिहृद्योऽस्तवैशेषिकादिः ॥ ३

भयालीभसिंहाभमनाभमायं, भवन्तं भजन्ते भदन्ताभवायम् ।
अलीकापहापेतलोपं श्रयन्ते, मतज्ञानतेजोयुता आश्रयन्ते ॥ ४

## १०. (५) श्रीमहावीरस्वामिस्तवः

जनानन्द ! नीता अनीतिं सुनीतिं, भवन्तं भजन्ते पराभूतभीतिम्।
सुखं वर्धमानप्रभो ! भग्नलोभं,
लभन्ते वसुभ्राजि ते भूरिशोभम् ॥ १

गभीराशयासारसंसारवासारसः पारगं तारताराङ्गभासा ।
नमन्मानवानन्दसन्दर्भकन्दं, श्रये त्वामिनं दीनतप्तावमन्दम् ॥२

तनु स्वप्रसादाशनैः सद्व्रतंस !, द्रुतं सर्वतश्चूर्णमीशारिरंस ।
ममानादिकर्माष्टकग्रन्थिमुग्रं, समग्रं शमग्रन्थभेदैरुदग्रम् ॥ ३

शिवाशैर्भवान् भव्यभावेन देवेश्वरैर्यः शशिश्वेतकीर्त्तिः सिषेवे ।
दिशामीश ! मे मोहवीराः
सवीराव्ययानन्ददिग्धा धियो धर्मवीराः ॥ ४

इतिश्रीमहावीरस्तवः ।

गणधरजयानन्दश्रीदेवसुन्दरसुन्दर-
क्रमकजजुषा सृष्टं पञ्चारिहासमसंस्तवम् ।
सततमिव यः सारं हारं बिभर्त्ति निजे हृदि,
भजति सुभगं सानन्दं तं समग्रशिवेन्दिरा ॥ ५

गर्जदूर्जितगजं न समीहेऽभङ्गभोगभरमिष्टद ! किन्तु ।
राहि मे शुभमकृतमनन्तं, तं दयैकपर ! पारग बोधम् ॥ ६

पू.मु.श्री धर्मवर्धनविजयविरचितानि

## ॥ श्रीपञ्चजिनस्तोत्राणि ॥

### ११. (१) श्रीआदिनाथस्तोत्रम्

(पद्धडिका)

जय वृषभ ! वृषभवृषविहितसेव !
सेवकवाञ्छितफल फलद देव ! ।
देवा(व)देवार्च्चितपादपद्म !, पद्मानन ! पूरितभूरिपदम् ! ॥१

पद्माङ्गजमदगजगजविपक्ष ! पक्षीकृतजगदुपकारलक्ष ! ।
लक्षितसमलोकालोकभाव !, भावितसूनृत ! सुगुणस्वभाव !॥२

भावारितमोभरतरणिरूप ! रूपस्थित ! रूपातीतरूप ! ।
रूपितसदुपज्ञसुधर्मशील ! शीलितशाश्वतशिवसौख्यलील ! ॥३

### १२. (२) श्रीशान्तिनाथस्तोत्रम्

(पञ्चचामर)

स्तुवन्तु तं जिनं सदोपकारतालताघनं,
स्वदेहदानतो यको ररक्ष रक्तलोचनम् ।

प्रसूदरस्थितेन यत् शुभंयुता प्रयुञ्जिता,
त्वरा निजाः प्रजाव्रजा रूजा विवर्जिताः कृताः ॥ १

अवाप्य जन्म येन चक्रवर्तिता प्रवर्तिता,
जगत्प्रभुत्वमाप्य कीर्तिनर्तकीव नर्तिता ।
अभीष्टदा दिवस्तरुर्घटो मणिस्त्रयोप्यमी,
अनुत्वकान्तकांस्तु सेवते सना सनाभु(भ्र)मी (?) ॥ २

स्वकीयसेवकाय यः सुखं ददाति सत्वरं,
ततो मुदा तमाचिरेयमाचिरेयमीश्वरम् ।
नमो नमोस्तु ते त्वया समो न कोप्यहो ! प्रभुः,
सुधर्मशीलने भवे भवेस्त्वमेव मे विभुः ॥ ३

## १३. (३) श्रीनेमिनाथस्तोत्रम्

जिगाय यः प्राज्यतरः स्मराजीं, तत्याज तूर्णं रमणीं च राजीम्।
राजेव योगीन्द्रगणे व्यराजीद्,
देयात्स नेमिर्बहु सौख्यराजीः ॥ (उपजाति) १

निजकुलकुलरत्नं वाञ्छितार्थद्युरत्नं,
तमसि गगनरत्नं चित्कला रात्रिरत्नम् ।
नमितसकलदेवः क्रोधदावैक देवः,
प्रभवतु समुदेवः सन्ततं नेमिदेवः ॥ (मालिनी) २

मानं मानं मानिनीमानमिन्नं, मीनं नानै नोमनोनेन नूनं ।
नामं नामं नेमिनामानमेनं, नो नोमीनं नामनामामनामि ॥ ३
(शालिनी)

## १४. (४) श्रीपार्श्वनाथ स्तोत्रम्

(प्रमाणिका)

तवेश नामतस्त्वरा दरा भवन्ति गत्वराः ।
प्रसृत्वरा रवेः करास्ततो यथा तमोभराः ॥ १

अथोत्कराश्च नश्वरा, धरेश्वराद्धि तस्कराः ।
स्थिराः स्युरिन्दिराभराः, स्वमन्दिरान्न हीत्वराः ॥ २

विभोः स्तवेषु तत्पराः नरा जगत्सु जित्वराः ।
तकेषु तत्परा दरा दरातयोपि किङ्कराः ॥ ३

विधीयतां जिनेश्वराऽऽशु पार्श्वदृक्कृपापरा ।
प्राद्यतां तरा त्वरा, ममापि धर्मशीलराः ॥ ४

## १५. (५) श्रीमहावीरस्तोत्रम्

(उपजाति)

योऽचीचलद् दुश्च्यवनोरसि स्थितः,
क्रमाङ्गुलीतः किल कर्णिकाचलम् ।
स्वनामचुञ्चुश्च चरिक्रियादयं,
स श्रीमहावीरजिनो महोदयम् ॥ १

अर्कः शुभोदर्कमतर्कितश्रियं, जैवातृकः प्रातिजयं यशःक्रियम् ।
भौमो भिनत्तीतिमनीतिजाम्भयं,
बुधो ददातीह बुधोचितां धियम् ॥ २

गुरुर्गुरुं ज्ञानगुणं विधत्ते काव्यः कलां काव्यकलां च दत्ते ।
शनिः शुभं राहुरयं शिखीशं, नुः सेवितुर्यच्छति वीरमीशम् ॥३

एवं सेवां दधतः पञ्चजिनानां कथां प्रपञ्चन्ते ।
ते सौख्यानि लभन्ते, भव्य श्रीधर्मशीलभृतः ॥ (आर्या) ४

## ॥ श्रीपञ्चजिनस्तोत्रम्॥

### १६. (१) श्रीऋषभजिनस्तोत्रम्

जय जय जगदानन्दन ! जय जय वरनाभिनन्दन ! जिनेन्द्र ! ।
जय जय करुणासागर ! मनोरथा अद्य फलिता मे ॥(आर्या)१

अद्य मे सफलं जन्म-म(चा)द्य मे सफला क्रिया ।
प्रयासः सफलो मेऽद्य दर्शनादादिमप्रभोः ॥ (अनुष्टुप्) २

प्रातरुत्थाय येनाय-मादिदेवो नमस्कृतः ।
हेलया मोहभूपाल-स्तेन नूनं तिरस्कृतः ॥ ३

सुकृतं सञ्चितं तेन दुष्कृतं तेन वञ्चितम् ।
येन प्रथमनाथस्य चरणाम्मोजमञ्चितम् ॥ ४

त्रिभुवनाभयदानविधायिने त्रिभुवनाद्भुतवाञ्छितदायिने ।
त्रिभुवनप्रभुतापदशालिने भगवते ऋषभाय नमो नमः ॥ ५
(द्रुत.)

### १७. (२) श्रीशान्तिजिनस्तोत्रम्

किं कल्पद्रुमसेवया यदि मया शान्तिः श्रितः सर्वदः
किं कर्पूरशलाकया नयनयोर्जातोऽतिथिश्चेदसौ ।
किं पीयूषपिपासया यदि पपे त्वत्कीर्तिवार्तारसो
यद्वान्यैरपि चेन्द्रियप्रियतमैः पर्याप्तमर्थागमैः ॥ १

सर्वाङ्गसुभगाकारं-कारणं सुखसम्पदाम् ।
शान्ते ! तव मुखं दृष्ट-मिष्टलाभो बभूव मे ॥ (अनु.)२

भुवनानन्दविधात्री यत्र श्रीः कापि निर्भरं वसति ।
तज्जिनपतिपदकमलं भवे भवे भवतु मे शरणम् ॥(आर्या)३

दानिनां परमो दानी मुनीनां परमो मुनिः ।
ज्ञानिनां परमो ज्ञानी शान्तिः कस्य न शान्तये ॥ (अनुष्टुप्)४

स्वामिनामपि यः स्वामी गुरूणामपि यो गुरुः ।
देवानामपि यो देवः सेव्यतां शान्तिरेष सः ॥ ५

## १८. (३) श्रीनेमिजिनस्तोत्रम्

परमान्नं क्षुधार्त्तेन तृषितेनामृतं सरः ।
दरिद्रेण निधानं वा मयाप्तं नेमिदर्शनम् ॥ (अनु.)१

निस्सीमसौभाग्यमसीमकान्तिं निस्सीमलावण्यमसीमशान्तिम्।
निस्सीमकारुण्यमसीमरूपं नेमीश्वरं रैवतके नमामि ॥ २
(इन्द्रवज्रा)

आलोकने(केन) जिनेन्द्रस्य जि(दि)नेन्द्रस्यै(स्ये)व सेवने (रेवते)
तमोमयी निशा नष्टा जातं सुदिनमद्य मे ॥ (अनुष्टुप्)३

कुलेषु यादवकुलं श्लाघ्यं मेरुरिवाद्रिषु ।
नेमिः कल्पद्रुमः पुंसां यत्रास्ते सर्वकामदः ॥ ४

य एकवारं गिरनारहारं,
नमामि(मति) (स्तवीति) नेमिं शिरसा स धन्यः ।
मुहुर्मुहुस्तं प्रणमन् विशेषादहं कथं धन्यतमो न गण्यः॥(उपेन्द्र)५

## १९. (४) श्रीपार्श्वजिनस्तोत्रम्

अभिनवमङ्गलमाला-करणं हरणं दुरन्तदुरितस्य ।
श्रीपार्श्वनाथचरणं प्रतिपन्नो भावतः शरणम् ॥ (आर्या) १

आयासेन विना लक्ष्मी–र्विना क्षेपेण वैभवम् ।
विनैव तपसा सिद्धि–र्जपतां पार्श्व ! नाम ते ॥ (अनुष्टुप्)२

पार्श्वजिन ! शासनं ते निबिडमहामोहतिमिरविध्वंसि ।
मयि रत्नदीपकल्पं तनोति तेजो विवेकाक्षम् ॥ (आर्या)३

त्वरेथां चरणौ ! जिह्वे ! कुरु स्तोत्रं शिरो ! नम ।
हर्षाश्रु मुञ्चतां दृष्टे ! आ एष परमेश्वरः ॥ (अनुष्टुप्)४

भवे भवान्तरे वाऽपि दुःखे वा यदि वा सुखे ।
पार्श्वध्यानेन मे यान्तु वासराः पुण्यभासुराः ॥ ५

## २०. (५) श्रीवीरस्वामिस्तोत्रम्

कनकाचलमिव धीरं समुद्रमिव सर्वदाऽपि गम्भीरम् ।
लब्धभवोदधितीरं नमामि कामं महावीरम् ॥ (आर्या)१

दुरितदवानलनीरं नीरागं भीतिभूमिकासीरम् ।
सिद्धिसहकारकीरं करोमि निजमानसे वीरम् ॥ २

प्रमोदेन मनो नृत्यद् रोमाञ्चैर्वपुरुल्लसद् ।
चिरादुन्मीलितं नेत्रं ननु वीरवरोऽग्रतः ॥ (अनुष्टुप्)३

अजन्मदायिने पित्रे, बान्धवायाऽविरोधिने ।
अद्रोहिणे च मित्राय श्रीवीर ! भवते नमः ॥ ४

श्रीवीरसद्ध्यानमयाग्निमग्नं सङ्क्लिष्टभावार्जितकर्मकक्षम् ।
भस्मीभवत्वाशु विरागिणो मे यथा तथा नित्यसुखी भवानि ॥५
(उपजातिः)

इति जिनपतिपादाः पञ्च चञ्चद्विचारैः

सुललितसुगमार्थैर्नव्यकाव्यैः कथञ्चित् ।
कृतसमुचितसेवाः सेवकानां जनानां
जनितमधुरबोधा बोधिलाभाय सन्तु ॥ (मालिनी)६

पू.मु.श्री सागरचन्द्रविजयविरचिताः

## ॥ श्रीपञ्चजिनस्तुतयः ॥

### २१. (१) श्री ऋषभजिनस्तुतिः

(उपजाति)

गीर्वाणमालार्च्चितपादपद्मं नाभेयमाप्तं किल लब्धवर्णाः ।
यूयं नुतश्रीभवनैः समस्तैः यथा प्रणूयन्त अपार सारम् ॥ १

मयात्र विश्वे भ्रमता जिनेश ! नाकर्णितं ते वचनं श्रुतिभ्याम् ।
अमी अतः कर्मगणाः सुदुष्टा मां हन्तुमुद्यन्ति वराकमात्रम् ॥२

कृपां विधायाशु ततश्च तेभ्यः मां मोचयस्वाहितदेवसेव ।
जगज्जनानन्दकरश्च नाभि ! नरेन्द्रसूनो ! मरुदेवमात ! ॥ ३

त्वया प्रभो ! लब्धश्रिया स्वकीय–मात्रेपि दत्ता शिवमुक्तिलक्ष्मीः।
न त्वत्समः कश्चिदभूज्जिनेशः सुवर्णवर्णाङ्ग ! जिताङ्गमार ! ॥४

आद्यो भवत्तीर्थकृतां य आद्यो धात्रीपतीनां प्रथमो मुनीनाम् ।
सत्केवलज्ञानभृतां धुरीणः समुद्रगम्भीरिमतां दधानः ॥ ५

यस्य प्रधानं परमं निरीक्ष्य वक्रं कुमुद्बन्धुरयं मृगाङ्कम् ।
मन्ये विभिन्नं किमिति प्रकर्तुं धत्ते श्रियानिर्जितशुद्धकान्तिः ॥६

पृथुजघनधरा निशेशाननाः कुचकलशभराः सुबिम्बाधराः ।
भजति वरजनो लभेयुर्वराः प्रमुदितवदनाः स्त्रियस्तं नरम् ॥७
(प्रमुदितवदना)

इत्थं श्रीवृषभश्शंभुः स्तुतः सागरसाधुना ।
दददातु भूरि शं देव ! वृषलक्ष्माजिनेश्वरः ॥ (अनुष्टुप्)८

## २२. (२) श्रीशान्तिजिनस्तुतिः

(अनुष्टुप्)

समग्रध्वापरध्वान्त-विध्वंसननभोमणे ! ।
मुक्तिवामां प्रधानं च शान्तिनाथ ! प्रयच्छ माम् ॥ १

विश्वसेनमहिनाथ ! गोत्रोदधिनिशाकर ! ।
अचिरोत्सङ्गसंक्रीडाततत्पराद्वैतभूषण ! ॥ २

पारापतो विवेकश्च त्वया त्रातो हि श्येनकात् ।
मां कथं त्रायसे न त्वं विवेकं तव सेवकम् ॥ ३

भवद्रूपञ्चतुर्दिक्षु प्रस्थितंव निरीक्षितुम् ।
चतुर्मुखो भवद्धातास्त्वं च मेने कृतार्थताम् ॥ ४

मुमुक्षुवक्तचण्डस्य शिष्यः सागरसञ्ज्ञकः ।
प्रणाथति परंब्रह्म नास्ति यत्र जराभयम् ॥ ५

## २३. (३) श्रीनेमिजिनस्तुतिः

श्रीनेमिनाथं भविका भजध्वं तमालनीलच्छविमूर्तिधारकम् ।
यदीयपादाब्जरजः प्रमर्शान्नरो लभन्ते किल भूरि सौख्यम् ॥१
(उपजाति)

यदीयसद्देशनया जडोपि लभेत नीरागमशोकवृक्षः ।
यश्चेतनावान् खलु कायधारी किं तस्य वर्ण्येत नरासुरस्य ॥२

भूपालचारु विजयान्वयसूरभूतः
राजीमतीस्तनविशालविशालहार ! ।
मां पाहि मोहचरटस्य भयाज्जिनेश !
शेवैय ! नाकिनरवन्द्यपदारविन्द ! ॥ (वसन्ततिलका) ३

श्रीरामकृष्णावपि त्वत्प्रसादाद् भविष्यतस्तीर्थकरौ विशुद्धौ ।
उदारसम्यक्त्वधरौ बलिष्ठौ महाभुजौ गौरविनीलवर्णौ ॥ ४
(उपजाति)

यो वीतरागस्तवधर्मनिष्ठः प्रयाति सिद्धिं किमु चित्रमत्र ।
सुरागयुक्तोपि तव क्रमाब्ज द्वन्द्वे नरो वैति परम्पदं वै ॥ ५

इत्थं श्रीनेमिनाथस्य स्तवं कुर्वन्मुमुक्षुकः ।
सागरो लभतां देव ! परमानन्दजं सुखम् ॥ (अनुष्टुप्) ६

## २४. (४) श्रीपार्श्वजिनस्तुतिः

(अनुष्टुप्)

संसारागाधविस्तार-पारापारभयङ्करात् ।
मां पाहि त्रिदशश्रेणि-सेवितानघपत्कज ! ॥ १

अश्वसेनोद्भवोद्दाम वामकामानलं प्रभो ! ।
विधेहि शमनं नामा-कर्णनाम्बुधरेण ते ॥ २

रागद्वेषादयो दुष्टास्तस्करा मुक्तिवर्त्मनि ।
मां प्रयातं प्रमुष्णन्ति ततो रक्ष जगत्प्रभो ! ॥ ३

दुष्टाष्टकर्मसमिधः प्रदह्य भगवन्नगाः ।
शुक्लध्यानाग्निना सिद्धिं केवलाद् दृष्टविष्टप ! ॥ ४

जय स्वामिन् ! भवद्धर्म-प्रभावात्सागरो यतिः ।
अलभत्परमानन्दमेदुराङ्गः सुखव्रजम् ॥ ५

## २५. ( ५ ) श्रीमहावीरजिनस्तुतिः

(अनुष्टुप्)

श्रीमन्मुक्तिरमानाथं वीरनाथं नुवीतभो ।
यदि सिद्ध्यङ्गनोरोज-बाढालिङ्गनमिच्छत ॥ १

यद्रूपं वीक्ष्य पञ्चेषुः सुरस्त्रीभिरपीप्सितम् ।
लज्जयानङ्गतां प्राप त्रिलोकविजयी किमु ॥ २

जन्माभिषेकसमये प्रेङ्खोलितइलाधरः ।
तस्य किं वर्ण्यते वीर्यं मानवैरेकजिह्वया ॥ ३

यस्यानेकान् गुणान् वक्तुं गीःपतिः शतजिह्वया ।
न शक्नोति ततो मन्दोऽहं कथं वक्तुं शक्नुयाम् ॥ ४

एवं स्तुतः प्रभुर्वीरः सागरेण मुमुक्षुणा ।
अनारतं स्वभक्तेभ्यो ददातु परमं सुखम् ॥ ५

## ॥ श्रीपञ्चजिनस्तुत्यन्तर्गते त्रयः स्तुतयः ॥

### २६. (१) श्रीआदिजिनस्तुतिः

(मालिनी)

ऋषभजिनमनन्तं नाभिभूतं द्विधाऽलं,
कृतसकलविनीतं सद्वृषश्रीविशालम् ।
कनकरुचिशरीरं विश्वविश्वावतंसं,
प्रणमत मरुदेवीकुक्षिकासारहंसम् ॥ १

प्रणतसुरनिकाय ध्वस्तनिःशेषमाय,
निहतनमदपाय प्रोज्वलच्छायकाय ।
निखिलजनहिताय श्रीयुगादीश्वराय,
ऋषभजिन ! नमस्ते सिद्ध ! विश्वे समस्ते ॥ २

विमलविमलशैलेऽष्टापदे श्रीअयोध्या-
पुरि गुरुनगरे श्री अर्बुदे गूर्जरे च ।
गजपदवरवीणाग्रामकासद्रहादौ,
जिन ! वृजिनविमुक्त ! त्वां नमस्यं नमामि ॥ ३

### २७. (२) श्रीशान्तिजिनस्तुतिः ॥

(मन्दाक्रान्ता)

शान्तं कान्तं शिवपदगतं शान्तिदुःखाग्निजातं,
कल्याणाभं गुणगुणनिधिं विश्वसेनाङ्गजातम् ।
विश्वश्रीणां कुलगृहं महाशान्तिदं शान्तिनाथं,
कल्याणाय प्रणमत जिनं शान्तिलक्ष्मीसनाथम् ॥ १

सौम्यः श्रीमान् कृतकुलवयाऽत्यन्तबोधो विमुक्तः,
दोषावन्ध्य सत[त] मुदितो निष्कलङ्कः स्मरारिः ।

राजापूर्वः परिहृतभवो निस्तमाः पापताप-,
शान्ति शान्तिर्दिशतु लुठतां पादपीठे जनानाम् ॥ २

आप्ते यस्मिन् सुचिरमचिराकुक्षिमाप्ते क्षमाया-
माधिर्व्याधिः क्षयमुपगता किन्त्वनीत्याश्रितेऽपि ।
नीतिः पुष्टाजनिकृततमस्तान्तिशान्तिर्नितान्तं,
स श्रीशान्तिर्भुवि विजयते सत्यनामा जिनेन्द्रः ॥ ३

## २८. ( ३ ) श्रीनेमिनाथस्तुतिः

रम्भारामा रुचिरतिलका चारुजातिसुवंस्या,
स्निग्धच्छाया वरतर-लसन्मेखलाऽशोकपूर्णा ।
भूमीभृद्भूर्मदनगहना येन मुक्ता श्रिता च,
स श्रीनेमिर्जयति जिनपोऽपूर्वसौभाग्यभाग् यः ॥
(मन्दाक्रान्ता)१

एतां श्यामां सकूटां श्रितजलनिवहां सेव्यमानां भुजङ्गै-
र्मातङ्गैः पूरिताशां बहुलधवपरां स्थूलताभृत् कुनाभिम् ।
स्वामिन् भूभृन्महेलां श्रयसि कथमथो नेक्षते दोषमद्धी-
त्येतां रागार्त्तभोज्यागिरमवगणयन् नेमिनाथः श्रियेऽस्तु ॥ २
(स्रग्धरा)

आबालब्रह्मचारिन् ! सुगतिपथरथ ! च्छिन्नमोहप्ररोह !
शङ्खाङ्क ! श्रीशिवादेव्युदरवरसरः पङ्कजाऽपङ्कजात ! ।
कामं कामाग्निवारे ! यदुकुलति [ल]क ! श्यामलाङ्गाऽपवर्ग-
गामिन् ! स्वामिन् ! नमस्ते दुरिततितिलतानेमये नेमयेऽस्मै ॥३
(स्रग्धरा)

पू.आ.श्री जिनकीर्तिसूरिविरचितानि

## ॥ षड्भाषामयानि श्रीजिनपञ्चकस्तोत्राणि ॥

### २९. (१) श्रीऋषभदेवस्तवनम्

श्रीणां प्रीणातु दानैः प्रथमजिनपतिर्नाभिभूर्भूर्भुवःस्वः-
सेवाहेवाकिनाकिप्रभुमुकुटतटस्पृष्टपादारविन्दः ।
भूतो भावी भवन्वाऽनणुरणुरपि वा भावराशिः समस्तो
यज्ज्ञाने तुल्यकालं प्रतिफलति यथा स्वस्वरूपव्यवस्थम् ॥ १

(संस्कृतम्)

जेणं भारहखित्ति झत्ति ववियं सद्धम्मबीयंतया
एगेणावि तहा पसंतहियओ सो पुंडरीओ कओ ।
जो अट्ठावयपिट्ठिसंठियतणू पत्तो परं णिव्वुइं
देवाणं पढमं अपुव्ववसहं भत्तीइ वंदामि तम् ॥ २

(प्राकृतम्)

जो जोइंदणरिंदवंदियपदो तेलुक्कचिंदामणी
जं आलिंगदि रागसंगदिमदी सा मुत्तिलीलावदी ।
जादा णिव्वुदिदीविआ गदमला विज्जापसूदी जदो
सो सामी रिसहो जिणिंदवसहो दिज्जा सुविज्जामु(सु)हं ॥ ३

(शौरसेनी)

तावुत्तिन्नसुवण्णवण्णलुइले यश्शंशदेशे जडा-
पंदी लायदि इंदनीलफलिणी तापिश्चगुश्चय्युदी ।
लम्मा कप्पलदा यथा सुलगिलिस्कंधंमि तुंगे स्तिदा
शेपस्कालदु णाभिरायतणए मे वय्ययंबाल यं ॥ ४

(मागधी)

धारिंतो पकटं अनुक्कटजटाजूटच्छटाडंबरं
तं निंतो मतनं कतंतसतनं तिंतो भवानीहितम् ।
सव्वञ्ञू गननाथवंतितपतो तेवाहितेवो सतां
भव्वानं वसदद्धजो जिनपती तिज्जा पतं सासतं ॥(पैशाची)५

सप्फूतप्फालफावप्पकटितलफसुप्फूतलोमंचलाची
सोफालाचं ततेहा सुलसुललचितोतालपूचोपचालो ।
खोलाखोखप्पचालप्पपलहुतवहुच्छंपनो मेखसंखो
भोतु त्तेलुक्कपंथू कसटफल्लहलो मारुतेवो चिनिंतो ॥ ६
(चूलिकापैशाचिकम्)

वाणिज्जवव्वहारपाणिगहणग्गामागराइड्ढिई
धम्माधम्मविचारु सारु कहिओ जेणं जए साहुवि ।
अम्हे आण वहंतडा तसु तणी सीसल्लडे अप्पणे
पाए आदिजिणेसरस्सु नमहुं आणंदेनच्चंत्तया ॥(अपभ्रंशः) ७

## ३०. (२) श्रीशान्तिजिनस्तवनम्

श्रीमान् शान्तिजिनः पुनात्ववृजिनः सर्वान् स भव्याङ्गिनः
सन्त्यक्तोपरमा वितीर्य परमानन्द.... संविद्रमाः ।
गौर्यस्य त्रिपदी जगत्त्रयवने स्वैरं चरन्तीतरां
चित्रं त्रासयति स्फुरत्तरमदान् दुर्वाहिसिंहानपि ॥ १
(संस्कृतम्)

रज्जं रज्जंगणाओ वियडगयघडादाणसित्तंगणाओ
अक्खोहाणेगजोहा तह य हयमहासत्तुरंगा तुरंगा ।
उज्झित्ता सव्वमेयं तणमिव भयवं जोऽणवज्जं पवज्जं
निव्विण्णो संपवण्णो दिसउ सिवसुहं हेमकंती स संती ॥ २
(प्राकृतम्)

कुज्जा कुज्जावलेवुम्मदमदनरिऊ मत्तमातंगगामी
सामी चामीकराभज्जुदिरुइरतणू निव्वुदिं संतिनाधो ।
एदे राजंदि जस्स क्कमकमलवहा धम्मलच्छीण तासिं
झिल्लंतीणं दसण्हं दसपवरसरा कुंकुमम्मीसिदव्वा ॥ ३

(शौरसेनी)

संयादा धलणीयलंमि शयले शंदीयणाहं तदा
ओइण्णे निववीशशेणशदणे यम्मिप्पभावब्भुदे ।
शंशाल्लाडविभंदि तंदिहलणे शेशंति तिस्तंकले
कुज्जा मे दुलिदो वशंदिमसमं देवासुलेहिं स्तुदे ॥(मागधी) ४

तेहे जस्ससरंमि कंतिसलले वंतारुतेवंगना-
तिट्ठीओपतिबिंबिता अचवला रंगंतताराजुता ।
रेहंतिब्भमरप्पसंगसुभगं भोजावलीओ विव
तं संतिं नमह प्पसंतहितयं कंतप्पतप्पापहं ॥ (पैशाची) ५

अनंतआनंतनमंतइंतमहंतचोकिंतनरिंदपुच्चं ।
तं संतिनाथं कतमोहमाथं नाथामि मुक्खस्स पथं अपाथं ॥ ६

(चूलिकापैशाची)

जसु पयनमणेणं मोहरायस्सु केरा-
दडवडयद्रवक्का रो विनासंति दूरा ।
हवइ दुरियसंती एत्तहे नत्थिभंती
स दिशतु शिवकेरी वट्टडी संतिनाहो ॥ (अपभ्रंशः) ७

## ३१. (३) श्रीनेमिनिजिनस्तवः

पारावारसमानसंसृतिसमुत्ताराय नारायणः
सेवासूर्यचरीकरी दृढतरी तुल्यां स यस्यादरी ।

देवानामपि देवता स परमब्रह्मस्वरूपः प्रभुः
शब्दब्रह्मविदाऽप्यगम्यमहिमा नेमीश्वरः पातु वः ॥(संस्कृतम्)१

मेरुव्वुत्तममाणवुव्वणिवईप्पासायचित्तं व वा
सुग्गामुव्वणरायणुव्ववणिणं गेहुव्वमेहुव्व वा ।
उज्जाणुव्व सुवण्णभासुरतरो वाणीविलासो जए
जस्सेसो सहए सुहं दिसउ मे सो णेमितित्थंकरो ॥ (प्राकृतम्)२

जेणं बंभसदक्कदुप्पभिदिणो सव्वे सुरा णिज्जिदा
ईसो जेण कराविदो पदिदिणं अट्टं उमाअग्गदो ।
जेण ज्झाणहुदासणंमि मदणो सोवि क्खयं पाविदो
सो नेमि सिवदायगो भवदु मे देवाहिदेवो सदा ॥(शौरसेनी)३

शुक्लज्झाणदवानलेण शयले कम्मिंधणे जालिदे
तद्धूमेण युदेव्वकय्यलयुदी राजमदीवल्लहे ।
विज्जानं पलमस्तशस्तविशयं नेमीशले भाविणं
दिय्या शय्यअवय्यवय्यिदमहावियामहं दालए ॥(मागधी) ४

लीलाए तितसाचलस्स करती गोवद्धणो तोलितो
तेलुक्कं धरितं च जेण सततं तेहेक्कतेसे सुहम् ।
जेनं सोविहरी हरिव्व सभुजासाहाइं हिंडोलिओ
तिज्जानंतबलो समोक्खपतविं तेवो सिवानंतनो ॥(पैशाची) ५

कालिंती चलकच्चलाचलशिला पालितनीलप्पफो
नेमी यातवलाचवंसतिलको सो फोतु फत्तंकलो ।
धारिंतुव्व पफामि शेनकसिनं लोहस्स सन्नाहयं
सव्वंकेसु अनंकवीलविचए वीलावलीग्गामनी ॥(चूलिका) ६

जगजमडणुजेवं कामउद्दामु धामुं
हयगयरहसज्जं रज्जलच्छिं चएप्पि ।
तिडुयणि विणु जेणं कोवि अन्नो न सक्को
सिवसुहु महु नेमी देवहं देवु देउ ॥ (अपभ्रंशः) ७

## ३२. (४) श्रीपार्श्वजिनस्तवः

भक्तिव्यक्तिप्रणमदमरस्वर्णकोटीरकोटी-
प्रेङ्खज्ज्योतिः प्रचलदचिरः कज्जलश्यामलद्युत् ।
श्रेयोवल्लीरुपचयमयं प्रापयंस्तापहर्ता
भूयात् पार्श्वः शमितदुरितोऽम्भोदवन्मोदकर्ता ॥(संस्कृतम्) १

फणिफणमणिमाला रेहए जस्स सीसे
तमतिमिरपणासे दीवपंतिव्व दिव्वा ।
परममहिमवासो पावराईवराई-
घणतमहिमवासो देउ सुक्खं स पासो ॥ (प्राकृतम्) २

बोलिज्जंत कुलाचलाहि पलयंभोदप्पभाहिं तदा
वुट्ठीहिं कमठासुरस्स भरिदब्बंभंडभांडाहिवि ।
जस्स ज्झाणहुदासणो पजलिदो सित्तोवि हीमाणहे
सामी पासजिणो स भोदु भगवं तेलुक्कसुक्खप्पदो ॥(शौरसेनी)३

चोला अस्तातिलोला तिहुयणगशणी शाइणी डाइणी वा
यश्कालश्कातुलश्का पलपललसिका खित्तवाला अबाला ।
दुस्टा अन्ने विनस्टा यणयणिदभया यस्स नामप्पभावा
शे मे वामेयदेवे भवदु भवदुह श्शेणिविद्धंसकाली ॥(मागधी)४

मंता तंतावि जंता गतमहिमकहा नो तहा विप्फुरंती
सेवाहेवाकिनावि प्पचुरफलभरं तिंति तेवा न तेवा ।
भावा हीनप्पभावा मनिगनमपुहा जम्मि सव्वेवि जाता
काले एतम्मि पासो जयति जगगुरू जागरूकप्पभावो ॥ ५
(पैशाची)

दुरियभरपलाइं दूरओ घंघलाइ
खलभलइं खलाइं विग्घसंघादलाइं ।
न हि जिणहियडल्लइ सोगसंतावु सल्लइ
जसु पयनमणेणं सो सुहं पासु देउ ॥ (अपभ्रंशः) ६

## ३३. (५) श्रीवीरजिनस्तवः

विद्यानां जन्मकन्दस्त्रिभुवनभवनालोकनप्रत्यलोऽपि
प्राप्तो दाक्षिण्यसिन्धुः पितृवचनवशात्सोत्सवं लेखशालाम् ।
जैनेन्द्रीं शब्दविद्यां पुरत उपदिशन् स्वामिनो देवतानां
शब्दब्रह्मण्यमोघं स दिशतु भगवान् कौशलं त्रैशलेयः ॥ १
(संस्कृतम्)

जो जोईसरपुंगवेहिं हियए निच्चंपि ज्झाइज्जए
जो सव्वेसु पुराणवेयपभिइग्गंथेसु गीइज्जए .
जो हत्थट्ठियआमलं व सयलं लोकत्तयं जाणए
तं वंदे तिजयग्गुरुं जिणवरं सिद्धत्थरायं गयं ॥ (प्राकृतम्) २

देविंदाणवि वंदणिज्जचलणा सव्वेवि सव्वन्नुणो
संजादा किर गोतमा अवि तया जस्स प्पसादादु ते ।
सो सिद्धत्थभिहाणभूवदिसुदो जोगिंदचूडामणी
भव्वाणं भवदुक्खलक्खदलणो दिज्जा सुहं सासदं ॥ ३
(शौरसेनी)

दुस्टे शंगमके शुले भयकले घोलोवसग्गावलिं
कुव्वंतेवि न लोशपोशकलुशं येणं कदं माणसं ।
इंदे भत्तिपले ण णेहबहुलं योगीशलग्गामणी
शे वीले पलमेशले दिशतु मे नेउन्नपुन्नत्तणं ॥ (मागधी) ४

कंपंतक्खितिमंडलं खडहडप्फुट्टंतबंभंडयं
उच्छल्लंतमहन्नवं कडयडत्तुट्टंतसेलग्गयं ।
पातग्गेन सुमेरुकंपनकरं बालत्तलीलाबलं
वीरस्स प्पहुनो जिनान जयतु क्खोनीतले पायडं ॥(पैशाची) ५

इंद्रो वंदणरेसि जासु महया हल्लोहलेणागओ
जं ज्झाई मुणिहंसडा हियडए अक्खे निरुंभेविणु ।
साहु ब्रोप्पिणु जासु कोइ महिमा नो तीरए माणवो
पाए वीरजिणेस्सुतासु नमहुं सीसल्लडे अम्महे ॥(अपभ्रंशः) ६

॥ इति श्रीवीरजिनस्तवः ॥

एवं पञ्चजिना निरस्तवृजिनाः सद्भक्तिविभ्राजिना
षड्भाषामयसंस्तवेन मयका नीतः स्तुतेर्गोचरम् ।
त्रैलोक्यस्पृहणीयसिद्धिरमणीशृङ्गारणप्रत्यला
देयासुर्गुरुसोमसुन्दरकरप्राग्भारगौराः श्रियः ॥ ७

(पू.आ.श्री हेमविमलसूरिकृतम् ?)
पू. पं. श्री हर्षकुलगणिकृतम्
कमलपञ्चशतिका

## ३४. ॥ श्रीपञ्चजिनस्तोत्रम् ॥

श्रीनिर्वृतिकमलदृशः करकमलक्रीडनैककलहंसम् ।
प्रणतापूरितकमलं प्रातःसमये सुदृष्टमुखकमलम् ॥ १

जिनपं सश्रीकमलं सुरनायकसेव्यमानपदकमलम् ।
प्रतिपादं कमलपदैः पृथगर्थैः स्तौमि वरकमलम् ॥ (यु.) २

अक्षीणलक्ष्मीकमलङ्घनीयवाचं भवामे कमलाभिधानम् ।
दीनोल्लसत्शूकमलब्धदोषं पङ्कप्रणाशे कमलस्वभावम् ॥ ३

युगादिनाथं कमलाङ्कवक्त्रं गीतप्रतापं कमलाननाभिः ।
संसारदुष्टाऽकमलप्रमुक्तं स्तवीमि निःशङ्कमलास्यरङ्गम् ॥ ४

अनन्तसंवित्कमलं भजे विभुं
स्वपाणिदीप्त्या कमलाऽपलापिनम् ।
अचाल्यचित्तं कमलाविलासतो
नश्यत्तमःशोकमलक्ष्मविग्रहम् ॥ ५

मात्राधिकत्वात्कमले न तुष्यसि प्रियप्रदः सत्कमलोपलक्षितः ।
जिनेन्द्रमुक्ताङ्कमलक्ष्यदर्शनः पदं न नम्रं कमलम्भयः शुभम्॥६

बाह्यं तथान्तरमसौ कमलं भिनत्ति
मात्राधिकं कमलवं न दधाति माने ।
एनोगतांशकमलम्बपरप्रभाव-भूभृद्वराकमलसेतरतुल्यसेव्यम् ॥७

पश्यन्तमेकमलकाधिपतीभ्यपूज्यं
सेवे शिवार्पकमलक्तकरक्तपादम् ।
क्षोणीविशेषकमलङ्कपदाब्जसक्त-
सच्चञ्चरीकमलकोच्चयवृद्ध्यपेतम् ॥ ८

व्याख्याक्षणे कमलभूश्चतुराननत्वात्
ख्यातस्तथा कमलबन्धुरिव प्रतापी ।
पद्मापतिः कमलनाभिरिव प्रभुस्त्वं
ध्यानं करोषि कमलासनमाश्रितः सन् ॥ ९

सङ्क्षिप्तशोकमलयाद्रिजशीतवाक्यं
विस्तार्यशोकमलपन्तमद्यवाचम् ।
मात्रोल्लसत्कमलसंसृतिकल्पवृक्षं
सत्पुण्यतोकमलवद्भिरनाप्यमीडे ॥ १०

मानाह्यशोकमलमुक्तपरित्यजन्तं
संस्तौम्यभीकमलयुक्वनिताङ्गरत्नम् ।
क्षिप्तार्यनीकमलघुप्रशमोपसेव्यं
त्वां मात्रिकाधिकमलं श्रयतां दविष्टम् ॥ ११

सम्भूषितान्तकमलर्कसमं घनाप्तौ
त्यक्तातुलांशुकमलज्जमपीशरम्यम् ।
सत्सेवितान्तिकमलव्रजदत्तदुःखं
श्रेयोलतासु कमलं किल मात्रयाढ्यम् ॥ १२

अंहस्तमोऽर्कमलपूज्यसमात्रिकत्वे
निर्नाशितान्तकमलक्ष्मिकृतानुकम्पम् ।
श्रेयःकुलाङ्कमलयोचलकैरगम्यं
सङ्क्षिप्तकल्कमललन्तमिनं वशाभिः ॥ १३

नष्टान्तरायकदलर्कमलाभमद्र-
मेघः समात्रिकतयाकमलाढ्यदेहम् ।
त्यक्त्वा सुराङ्कमलषन्नपि मे समेतो
मोक्षं निरङ्कमलभापगमं विधेहि ॥ १४

अनेकार्थान् जल्पन्नकमलमुखान् शब्दनिवहाँ-
स्तथैवाचक्षाणः कमलवमुखान् वर्णनिकरान् ।

क्रियाकाण्डे सम्यक्क्रमलकलितं तारयसि नो
मयि श्रेयोलक्ष्मीकरशुकमलस्वार्द्रनयनम् ॥ १५

जयश्रीमन्नेतः कमललमहामान्यमहिमा
प्रबोधं तन्वानः कमलसदृशाऽमित्रजनयोः ।
तुषारस्फारश्रीकमलतुलनामेति जिनवाक्
चरित्रश्रीकर्णे कनकमलवद्भाति भगवान् ॥ १६

भवं व्यापद्वाद्र्धेः कमलति भवान् शोषकरणे
यशःप्राञ्चत्पुष्पस्तबकमललान्तङ्कहरणे ।
सुराधीशाभ्यर्च्यः कमलसदृशत्वेन विदितः
सदारिष्टाघाते जयति कमलाधीशमहिमा ॥ १७

गिरीशः श्रीसार्व्वप्रकटकमलाङ्गोद्भवहृतौ
गभीरः श्रीपार्श्वः कमलनिधिवत्सद्गुणमणिः ।
जनान्तर्बाहीकाभयकमलकारः कलिमलं
मम च्छिन्द्यादीश ! कमलरिपुवद्विश्वविपिने ॥ १८

ददानः सद्बोधं कमलजनतानामपि विभो !-
ऽद्वितीयत्वे पूर्णः कमलश इव प्रीतिकरणः ।
परिस्फूर्जत्कीर्त्ति स्फुरति कमलाभृद्द्युतिसिता
क्रियाणां पुण्यानां तवककमलापं प्रवदतः ॥ १९

प्रतीक्ष्यः स्वर्गाधीश्वरकमलनाथादिमसुरै-
महातेजस्त्वेन त्वमसि कमलः कर्मदहनः ।
सतां विघ्नव्यापव्यपगमविधौ भूषकमल-
स्तव श्लोकः पूर्णं कमलभवमप्याशु जितवान् ॥ २०

तमोदैत्यध्वंसे कमलशयवद् भाति भुवने
नमत्पुंसामीशो भविकमल(ला)लीनिर्मितिचणः ।
परिक्षिप्तन्यक्षाऽहितकमललः पावनगति-
र्जगत्प्रौढावासाङ्गणकमललीभूतसुयशाः ॥ २१

चिरञ्जीयात्सार्वः कमलरुहपाणिक्रमयुगः
स्वयम्भावात्सेवाऽणुकमललगीर्वाणनिकरः ।
सदा सम्यग्निर्नाशितनिजयशःस्तावकमलः
चलन्मायुर्दुष्टज्वरकमललाद्यामयहर(:) ॥ २२

यदाऽहं त्वत्सेवां चकमलभिकर्मीकृतसुख-
स्तदास्यां सत्पुण्यात्कमलऽसि वधत्याजनकृते ।
चरित्रस्वीकारे कमलऽयमलोसीन्द्रियदमे
ममत्वान्निर्मुक्तः कमलपि यथा नैव भवसि ॥ २३

शरप्रासप्राञ्चत्कमलमुखशस्त्राङ्कितकरो
गृहस्थत्वे स्वामी कमलकरणो नैव चरणे ।
मदक्रोधव्यापत्कमलभरनिर्नाशनचणः
प्रणम्यः श्रेयः श्रीयुवतिकमलस्त्वं तनुमताम् ॥ २४

यथावर्णज्येष्ठः कमलनलमर्वत्यनुदिनं
सुरज्येष्ठं स्पष्टं कमलनिशमाशंसति यथा ।
यथा चाहर्नाथं कमलति नयादर्कयति वा
त्वदेकत्राणस्त्वामणुकमलहं स्तौमि च तथा ॥ २५

युवापि त्वं स्वामी सुमकमलधिक्कारनिपुण-
स्तनः ख्यातो गौरीकमल इव दुष्टान्धकहरः ।

नवव्याख्याकाले कमलधरविस्तारिनिनदः
स्वयं पूज्यः स्वामी ननु कमलया भक्तिवशतः ॥ २६

निर्निक्तीकृतसत्सहस्रकमलः स्वांह्रिद्वयस्पर्शनैः
पूज्यस्त्वं कमलप्रभादिभिरभूत्त्वद्वाग्रहस्यं विभो ! ।
जानानः कमलप्रभोप्यपलपत्संसारचक्रभ्रमी
श्रीपालं कमलप्रभेव सुषुवे त्वामीश ! वामोत्तमम् ॥ २७

प्रस्फूर्जत्कमलप्रभावजलधिख्यातप्रतापोदयः
श्रीसार्वः कमलस्वरामृतवरद्वीपानुगच्छद्यशाः ।
ध्वस्ताऽनीकमलप्रभः प्रथयतात्सन्तापनिर्वापणे
सौख्यं जन्मनि निःकलङ्कमलले पूर्णेऽपि शान्तिप्रदः ॥ २८

अद्धैर्णाङ्कविभास्यऽलीकमलयस्युर्वीतलं पत्कजैः
सञ्जातः किल निःकलङ्कमललाधीशान्वये त्वं जिनः ।
त्वद्वाचं कमलव्रजा निजगिरा शृण्वन्ति हर्षोन्नताः
पार्षद्येषु कृतान्ततर्कमललप्रादुष्कृतिप्रत्यलः ॥ २९

संसारश्रान्तलोके कमललवति यः पापतापापनोदा-
दग्रे संवाद्यमानानकमललवदुद्दामतेजाः सुरौघैः ।
नम्रीभूतक्षमाभृद्गणकमललभृन्निर्मलश्लोकराशेः
निर्हाराधःकृतश्रीपिकमललभृदायासमे सेवकास्ते ॥ ३०

क्षोणीपावित्र्यहेतोः कमललवदिदं पादपद्मद्वयं ते
नैवाज्ञानप्रवृत्तैः कमललुधरणैः श्रीयते सौख्यदायि ।
भक्तप्रत्यूहनाशाम्बिकमलनमिव ब्रह्मलक्ष्म्यास्तमौघे
सर्पालोकप्रवृत्ताम्बिकमलनजनासेव्यपार्श्वोऽसि पार्श्वः ॥ ३१

क्षोणीविख्यातकीर्त्त्यानकमलयमुखानेकदेशस्थलोकान्
स्वव्याहारेण लक्ष्मीजलधिरनुदिनं बोधयन्बोधिसाधुः ।
इत्थं स्पष्टार्थमाद्यन्मधुकमलभरैः पूज्यपादारविन्दः
श्रीपार्श्वो हेमशुद्धाभरणधरतनुः श्रेयसे संश्रितानाम् ॥ ३२

## ३५. ॥ 'कमल'यमकमयजिनस्तवनम् ॥

॥ इत्येकं श्रीपार्श्वस्तोत्रम् ॥ शतार्थी (र्थि)

श्रेयः सदङ्कमलयोन्नतिमेघनाद-
मुत्सर्पिदर्पकमलोपमयाऽक्षिपन्तम् ।
वाचापि काकमलजं प्रतिबोधयन्तं
वीरं गतान्धिकमलं जिनराजमीडे ॥ १

सम्पूर्णशान्तिकमलासिविमुक्तपाणिः
सोढुं सुदुःशकमलासनमेः प्रभञ्जन् ।
मिथ्या सतां वदसि लोकमलप्रभूतं
कुर्वन्जगत्कमलधारिवशाभिरर्च्यः ॥ २

कुर्व्वन्समृद्धमिह निष्कमलं स्वभक्तं
मात्राधिकत्ववशतः कमलङ्घनाद्यः ।
तुल्यीकृतस्फुरदशोकमलाजमाष-
मानव्यथासु घनकल्कमलाकवेऽसि ॥ ३

क्षेमैरभीकमलवन् विषयाम्बुशोषे
प्रातर्निभाल्यकमलोऽसि यमध्यमत्वे ।
धन्यो जिनेश कमलासिच यत्र दृष्टः
सारो भवेऽत्र कमलामखिलामवैषि ॥ ४

सर्वस्फुरत्कमलनं प्रवहद्गुणानां
को वेत्ति ते कमलनं नयनन्दितेश ! ।
प्रौढप्रभावकमलावदभिष्टुतस्य
शीतद्युतेश्च कमलाशुचिकीर्त्तिभाजः ॥ ५

वीक्षेऽविपक्षकमलाभृदपूर्ववक्त्रं
सिद्धान्तनिर्मितिकृते कमलाभृदाभ ! ।
संस्मर्यकार्यविधये कमलाविदादौ
धीरश्रिया रुचिर ! ते कमलाधिपाङ्क ! ॥ ६

मात्राधिकत्ववशतः कमलम्भनाय
सामर्थ्यभाक्कमललाभसमः क्षमायाम् ।
सङ्गुप्तसत्कमललद्गुणराशिरीशः
सार्वः सपापकमलाभमभाषमाणः ॥ ७

मुनिर्मात्राधिक्यात्कमललतिलीलाशमरतो
वदन् जन्तूत्पत्तिं नरकमलवे कालवशतः ।
शुभे लग्ने जातः कमलगजसद्योगकलिते
श्रयन् रेखाः पाणौ कमलहरिहंसाकृतिधरा ॥ ८

बाभास्यमध्यमतया कमलङ्कमुक्तः
पर्षद्गतः कमलमीशवचस्तनोषि ।
देवासुरैः कमलगीतयशाः प्रशस्यो
बाल्यस्थितः कमलभायितविग्रहस्त्वम् ॥ ९

दुर्वादिनां कमलहं वचसा भिनत्सि
शास्त्रोद्भवं कमलधौतशरीरकान्तिः ।

धान्ये यथा कमलमोसि नरेषु मान्य-
स्तद्वद्विभुः कमलहंसगतिः प्रतीतः ॥ १०

स्वामिन्नशोकमलगर्ददघव्यपाये
संसारदुःखकमलाघयुतं रिपूणाम् ।
निर्नाशने कमलघोषसमानघोषं
भावामये कमलहारिसमं समात्रम् ॥ ११

जन्तोस्तपःस्फुरदशोकमलप्रणाशे
ताम्रस्य चम्पकमलन्दसुगन्धिवस्त्रः ।
उल्लास्यनूकमलशङ्कमुपास्तिकारी
यः स्यात्तव स्वकमलाञ्छनमातनोति ॥ १२

हृन्मेध्यताककमलवत्प्रतिपक्षमात्रा-
धिक्यादलीकमलसि प्रशमात्प्रहन्तुम् ।
उल्लास्यलीकमलवत्तनुसाधुनम्यः
क्षिप्तव्यलीकमलवन् स्थिरतागुणेन ॥ १३

दुष्टामचन्द्रकमलन्ननुवेलमीश-
स्पष्टं सिताकमलपातकतापलोपे ।
सद्गोस्तनीकमलतुल्यवचःप्रपञ्चः
निर्मोघमाघकमलः सदरिष्टकुष्टे ॥ १४

पादावनम्रकमलाङ्गमुखग्रहौघः
साधूभवत्कमलभाजनधारिविप्रः ।
विध्वस्तदुःकमलसम्भवभीतिरीतिः
प्रत्यूहसञ्चयतमःकमलस्वभावः ॥ १५

त्यक्तव्यलीकमलसे भुजगेश्वरे च
राशीँश्च मध्यकमलप्रमुखान्वदन्तम् ।
संवर्द्धितार्द्धिकमलादिजनस्य धन्यो
यस्त्वत्पदान्तिकमलार्यत एव भक्त्या ॥ १६

अम्बोदरान्तरतटाकमलालशान्ति-
वल्लीबलाङ्गकमलङ्गमरङ्गतुल्यम् ।
पूर्णाङ्गितर्कमलवत्कलितं कराब्जे
सम्यग्वितर्कमलयप्रियनादमीडे ॥ १७

निस्तीर्णपातकमलादिह संयमं यः
संसारशोषकमलोचकवैरिवारः ।
पङ्केरुहाङ्कमलयोमुदमाप्ययद्व-
द्यान्तीश तावकमलम्बरिणो मतं तत् ॥ १८

जनुष्यासीत्तेऽमःकमकलल(कमलकल ?) राशिर्महमयः
क्षमामध्ये क्षान्तः सपदिकमलाकेलिकरणा ।
वदन्वेदार्थौघं जिनकमलहंसाङ्कसदृशः
भवाब्धेः संशोषे कमलशभवः शम्भवचणः ॥ १९

कमलमुखविपक्षो मध्यमाऽभावतस्त्वं
कमलमुखकुरङ्गैः सेवनीयो वनान्ते ।
कमलचरणभक्तैर्नैव लक्ष्यस्वरूपः
कमलभयविमुक्तः प्राणमत्कन्धराणाम् ॥ २०

कमलजनकतेजाः सौख्यसम्पत्प्रदाता
कमलजननरोव्यागेऽपि सन्तापहारी ।

कमलमितमनन्तं मुक्तिसातं भवन्तं
कमलमुखसमस्तव्यन्तरेन्द्रार्च्यमीडे ॥ २१

सकलकमलयातप्राज्यलब्धिप्रपञ्चः
सुमृदुकमलणश्रीन्यक्कृतस्वर्णवर्णः ।
विशदकमलकान्तस्थायिसन्नीरभाषः
प्रसृमरकमलङ्कोपद्रवद्रावकोऽसि ॥ २२

सरुचिकमलबालव्यालरौद्रे प्रघाते
निशितकमलपत्रच्छिन्नवीरोद्धजाते ।
हरिभरकमलेणुव्याप्तरूपे जयन्ते
विश इह कमलाले नामभाजो लभन्ते ॥ २३

अरुणकमलशाखः कल्पशाखीव विश्वे
दधिकमलबकाभव्याहृतिः शान्तिदाता ।
कुरुबककमलञ्जोद्यानवासी व्रतस्थो
गृहपतिकमलोटन्यादकारी सकृच्च ॥ २४

कमलमिव दिनेशः प्राप्य दत्ते कुयोगं
तदिव कमलपूजां वामदेवो जनानाम् ।
कमलभमिव पूर्णं पूर्णिमासीसु योगं
त्वमपि कमलरम्यो भक्तिभावं नतानाम् ॥ २५

कमलमिव खगेनाब्जेन युक्तं सुकालं
जनजनकमलेखं वर्क्षमाख्याति सिद्धिम् ।
कमलभवकृतं सद्दुर्व्यवायं क्षिणोति
तदिव कमलजातप्रायधीरैः श्रितस्त्वम् ॥ २६

सङ्क्रीडतीव उषया कमलाङ्क ईश !
त्वं वीरसिद्धिरमया कमलाभिरामः ।
तद्वच्चिरं कमलमाधिकसद्गुणः सन्
दद्यान्महांसि कमलाङ्करुचिप्रतापः ॥ २७

विश्वत्रयीकमलनप्रतिमान्तिमार्हन्
गर्ह्येतराम्बकमलद्युतिकिण्वहारी ।
संसारतारकमलेखकपुष्यमुख्य-
नक्षत्रपेटकमलाजकमीश विश्वम् ॥ २८

राज त्वदम्बकमलस्तनुषे वदँस्त्वं
अंहःपुलाकमलवन्नघनिम्नगानाम् ।
विद्वच्चकोरकमलक्षणमुक्तदेह-
सन्देहहारकमलस्य वचोविलासः ॥ २९

वरतनु तारकमलणः सत्यान्धकमलणभान्धकदघौघे ।
नरकमलणाभनरकध्वंसे समकमलणाद्विरतः ॥ ३०

भूतिकमलकहरणः प्रणमद्दशकमलबद्धसार्वायुः ।
सूर्प्पकमलणविमुक्तः प्राणिभ्यो भावुकमलासीत् ॥ ३१

चरणमनङ्कमलासीत्सत्यागदयाढ्यनन्दकमलायः ।
कमलाख्यमपि ददानस्तथा निधानं महाकमलम् ॥ ३२

आनम्रपाकमलणः स्वामी मध्यकमलं निर्धि यच्छन् ।
घ्नन् पृथुकमलणगोयायजूकमलणोद्भवं दुरितम् ॥ ३३

मध्यकमलकेतुहतः प्रसन्नतारकमलव्रजदविष्टः ।
दानत्रिकमलतुल्यः सहस्रकमलसुतगुणौघः ॥ ३४

रिपुरङ्कुपञ्चकमलः श्रेयश्रीवल्लरीकमलतुल्यः ।
गाम्भीर्यकमललश्रीः षट्कमल इव व्रती सार्वः ॥ ३५

निर्मलसहस्त्रकमलाजलवत्कमलश्रियाऽस्तपूर्णशशी ।
जगति चतुष्कमलसमः समवसृतौ सुकमलभ्यपद(:) ॥ ३६

सार्वः कमलजनादः श्रेयोनिर्माणपञ्चकमलसमः ।
कमलजकेतुजिनोक्तावतारकमलजनिधिं यच्छन् ॥ ३७

आरक्तकमलयुगलो वीरोऽर्हन् गूढकमलभीतिहरः ।
कमलजभृद्यति दितिजध्वंसे ध्यातो हृदयकमले ॥ ३८

कमलादितपोदेष्टा कविभिः कमलादिचित्रवर्ण्यगुणः ।
नाभिकमलस्वरूपं शंसति सत्यं च कमललये ॥ ३९

कमलवदन्तर्ध्येयं सेव्यं च सहस्त्रनीलकमलगणैः ।
चम्पकमलजातिनवश्रीतिलकमलादिसुमपूज्यः ॥ ४०

वाग्जितपूपकमलको नैषि वशं त्वकमलभुवां स्त्रीणाम् ।
जनदीपकमलकोकिलकाकमलादीन् प्रबोधयसि ॥ ४१

विश्वप्रकाशकमलप्रभुद्युतिः कनकमलतनुः सार्वः ।
मानामयजतुकमलल्युपदेष्टा
प्रशमिनां कमलकायः ॥ (गीतिः ।) ४२

प्रणतमहाकमलाह्वयचक्रधरः कमलहरिनतः सार्वः ।
पूरयति कमलवासां सनाकमलवाहनाध्येयः ॥ ४३

यः सार्वकनकमलसत् तावकमलयति मुखं स्म तस्यैव ।
नष्टेन साकमलसत् दुर्गतिमयमधिकमलसच्च ॥ ४४

भक्त्या पावकमलसत्त्वां नायकमलचयत् शुचिं सस्वम् ।
क्षारकमलावयद्यस्तस्य भवोदकमलवदीश ॥ ४५

कर्मातङ्कमलघयद्दुर्गतिकार्मकमलोहयद्यच्च ।
भवकूपकमलने त्वं निःशङ्कमलज्जवोऽसुमताम् ॥ ४६

विनयोदर्कमलासीदेकागारिकमलाटयद्वीरः ।
सेवकमलालयत्कुलनन्दकमलयस्यपि स्म जगत् ॥ ४७

न्यक्कृतजतुकमलाराट् तव पदयुगलकमलञ्जयद्भव्यान् ।
तण्डकमलक्षमाणः कुगतेस्त्वं स्वकमलक्षयः सिंहात् ॥ ४८

पुण्याद्रङ्कमलाजत्पुण्यमृते क्षोणिनायकमलङ्कृत् ।
मुखकमलङ्कमलाजद्येन च जैवातृकमलाञ्छत् ॥ ४९

परिचारकमललरङ्कश्रेणिकमलराजदीशधर्मेण ।
मुक्तव्यलीकमलतन् मुक्तावस्तोकमलवयन्महसा ॥ ५०

पापकमललापवचो गतसर्वा रेकमलवणायत तत् ।
उदकमलाच्च भवस्याऽसुमत्कदम्बकमलक्षदिनः ॥ ५१

कीर्त्तिध्वजांशुकमलोपयदात्मवंशे
भव्याङ्गिमोदकमलापि वचः सुचारु ।
नो कर्मपेटकमलात यतीश तस्य
यस्तच्च तावकमलोपयति प्रमत्तः ॥ ५२

अज्ञैर्नरैः सकलमङ्कमलेखयद्यो
मुक्त्या च साकमललास न तीर्थनाथः ।
कान्त्या तथाऽधिकमलार्हततीहितार्थ-
दाता जिनैकमलसि स्म च मर्त्यलोकम् ॥ ५३

यो वैनयिकमलाघत कर्तुं सूतकमलोकयत्तव च ।
परमं लोकमलाघीत् स प्राप्तुं वर्णकमलब्ध ॥ ५४

वर्णेन सूतकमले च यदस्य कीर्त्ति-
स्तेजःकदम्बकमलोचत वैर्यसह्यम् ।
स्तुत्याक्षतान्धिकमलाविभवाँश्च येन
निःशेषमीश निजतङ्कमलोपि तेन ॥ ५५

(श्लोक ५६ आदितः ८६ अप्राप्य)

समारूढो वैनीतकमलहयद्यामगृहणे
वनं बिभ्रत्सारं भ्रमरकमलंस्ताक्षरपदे ।
पदार्थं विश्वायां कमलहयति श्रीजिनवरो
वशाराज्यस्वर्णादिकमलहयत्तार्णगणवत् ॥ ८७

मौक्तिकमलरौफलमिह निःशेषं मोहसौप्तिकमलोठत् ।
माक्षिकमलोडयन्निजभक्ते वसुरांशुकमरौडत् (लौडत् ?) ॥८८

अङ्कमलोभीन्नहि यः पश्यँस्त्ववकोङ्कमलविष्ट ।
काकमलयिष्ट गोलाद्यथातथास्मादकमलाफीत् ॥ ८९

नाणकमलते लातुं यतिनां तमसा न च स्वकमलेपीत् ।
शौकमलयते त्वत्संनिधेस्तथौक्षकमलम्फति च ॥ ९०

त्वां हितकमलङ्गतयः सदिष्टसाधकमलङ्गयतेऽन्यैः सः ।
येन त्वकमललङ्गे सोऽपि भवोदकमलङ्गिष्ट ॥ ९१

ऊष्मकमलङ्गदाप्त्वा पल्वलमार्द्रकमलङ्गिकर्मीस्यात् ।
मण्डकमललङ्ग यथा त्वन्नाम्नाऽशान्तिकमलाघि ॥ ९२

यदलिपिकमलालण्नादतः सादमुक्तः
कलमकमललाडत्ते नयः पावनत्वात् ।
अपि भृतकमलालट् संसृतेः क्षोणिपं च
अनुपधिकमलालस्वंतयेनापदस्ताः ॥ ९३

दाम्भिकमलरीत्यगतिं सूचकमलराञ्चकार तान्तिपदम् ।
दाण्डाजनिकमलर्त्ति च विभवं शीतकमलारयति ॥ ९४

अलकमकमलचयसि रुचा जित कमलाबूयसे भवाम्बुनिधौ ।
फुल्लकमलरचदपि तो अङ्गारकमलवयज्जिनो भृतकम् ॥ ९५

क्षिप्ताङ्गारिकमलवचश्रितं वचस्तेऽलिपकमलङ्घिष्ट ।
आसेचनकमलोगं त्वामीडेऽनणुकमलघिष्ठम् ॥ ९६

क्लृप्ताकल्पकमलसस्तुल्याङ्गारिकमलेट् करद्वितयम् ।
कृत्वा वचःप्रमोदं कमलभ्यङ्कमलभत नासौ ॥ ९७

पादाम्बुजैरपि तुरुष्कमलञ्चकार
जेतुं मुखेन च शशाङ्कमलम्बभूव ।
लीलाविनायकमलक्ष्मणमाततान
ध्यानेन कण्टकमलक्ष्यघसिर्जघान ॥ ९८

त्वं निः शलाकमलयं श्रयसीश लब्ध्वा
निःसङ्ख्यहाटकमलायमिनः प्रकुर्वन् ।
तत्त्वप्रकाशकमलब्ध सदोपयोग-
मापन्निवारकमलोहित लोहितांशः ॥ ९९

नाथस्त्रिलोकमललञ्जदनञ्जनश्रीः
सत्याभिवादकमललन्ध्रयशःप्रसारम् ।

कुर्वन्नृणां तुकमलाञ्छितमूर्त्तिरेतद्-
वाञ्छावतां दददशङ्कमलक्तचेताः ॥ १००

धर्माक्षेपकमलमं साम्यविडम्बकमलम्यदुर्गतिगम् ।
त्वदनाक्षेपकमलजं कुरुषे स्वस्तावकमलाप्यम् ॥ १०१

कर्मान्तकारकमलन्नसि भूमिपीठं
व्यापत्प्रमायकमलत्पदिमुख्यधातून् ।
सार्वेशनामकमलं विमलावबोधे
द्रव्यात्मनाऽपि कमलं कथयन्नयश्रीः ॥ १०२

वक्त्रेण यः कमलवैरिणमाजिगाय
काष्टास्यलोकमलयन्त पुनर्नवौघः ।
सुस्थापनाकमलमुज्ज्वलमङ्गलश्री-
र्निक्षेपतः कमलमीश वदँश्च भावात् ॥ १०३

कमललीशभवेऽपि शिवे तथा कमललिन्यतिहाववशीकृतः ।
कमलमाथितनुद्युतिराशिता कमलवस्तुपरित्यजकः श्रिये ॥१०४

कमलधारिनिषेव्यपदाम्बुजः कमलवाचकमीश्वर निक्षिपन् ।
कमलमुच्यसि देशमनेहसं कमलभव्यमहो कमलं वदन् ॥१०५

कमलचक्रधनूरथवज्रभृत्पदयुगः कमलव्रजवर्जितः ।
कमलवत्यखराङ्ग कथान्तरे कमलसेननृपं प्रतिपादयन् ॥१०६

कमलनामकमीश पुरं तथा दयितयानुगतं कमलाख्यया ।
सुतवरं प्रवरं कमलाकरं
कमलसामजमादिजिनेशितः ॥ (यु.) १०७

कमलमीश यथा कमलाकरे कमलभृत्यपि वाकमलं यथा ।
तदिव सज्जननीकमलोदरे
वसति पुँस्कमलः श्रितवैभवः ॥ १०८

जयति नाकमलक्रमपूजितः शुकमलत्यपहः प्रतिबोधयन् ।
शुचिविरोकमलण्यकृतव्रतं कमलवंसुरवंह्यऽचरीकर ॥ १०९

श्रयति नेमिविभो कमलाप्रदारुचितशाकमलोच्छनिषेवितम् ।
शितिकलाकमलल्यति तेजसं कमललन्तु
निराश्रवमात्मवित् ॥ ११०

कमललब्धगतिः प्रथमाधिपः कमललप्रतिबोधितसज्जनः ।
जिनमहीकमलङ्गजमानहा
कमलने निपुणोऽस्यचिरात्मजः ॥ १११

चरकमऽलाताभमुखा महन्ति तोकमलसावपितरः ।
स्वसविरोधकमलसतरुं खगवत्त्वां कमलन भजन्ते ॥ ११२

कमललरुचोमहेलास्तुरुष्कमलशोभिताः सकमलाढ्याः ।
मात्राढ्यकमलभूषितशिरसः शुभवदनकमलगीन्नेशम् ॥ ११३

उद्यद्विरोकमलल कमलवतीविजयकथितसुविचारम् ।
पद्मसरोजादिरवान् कथयन्तं कमलपर्यायान् ॥ ११४

रागोत्कलिकमलमकद्युतिर्गुणानेडमूकमलमकवत् ।
बिभ्रदुचकमलवणं दोषेनुत्कलिकमलसकं स्तब्धम् ॥ ११५

तत्त्वन्मां कमलान्तजमुखमथवायौ कमलवसानमिनः ।
पाहि कमलान्तबान्तं दधतं सकमलवसानमयन् ॥ ११६

प्रागनाशं कमलस्य नूतनसरस्याख्यापयन् वादिनां
प्रध्वंसात्कमलस्य सारसरसि प्रक्षीणनीरे क्षयम् ।

अन्योन्यापगमं तथा च कमलस्याख्यासि वद्धावथा-
त्यन्ताभावमवैषि नाथ कमलस्यासारभृत्पल्वले ॥ ११७

कमलमकमलं वा भावयुग्मं जगत्यां
कमलमिति यनित्यं पर्ययं भाषमाणः ।
कनककमलवल्लीचित्रिते चारुसौधे-
प्यरतिरकमलस्या त्वेष विद्वेषभाजः ॥ ११८

कमलान्तबादिमं मां क्रीडाकन्दुकमलान्तजाग्रण्यम् ।
अयशः पङ्कमलान्तजसमवचसा क्षालयन्पुनीहि विभो ! ॥११९

कमलसि समस्तभविनां कमलवदातस्तवोत्तमः श्लोकः ।
कमलष्टमूर्त्तिभक्तः स्यात्तदसेवी कमलबोधः ॥ १२०

अमिअपरक्कमलद्धी अवगयपक्कमललंतगुणरासी ।
अणवक्कमलद्धजओ अणुवक्कमलक्ख जिअकालो ॥ १२१

संवच्छरप्पसरविक्कम लायतुल्लं
विन्नायवोममणि संकमलग्गवेलम् ।
अक्खोह विक्कमलवंगसुगंधसासं
दुव्वाइवग्गवयणक्कमलद्धलक्खम् ॥ १२२

आयंकमलणयं सुहभावाणुक्कमलसंतसोहग्गो ।
सुरकयंमहनिक्कमलव-पावपडिक्कमलयविमुक्को ॥ १२३

असुहाइक्कमलम्मो विहिअउवक्कमललामसारिच्छो ।
भुवणंमि पुज्जकमल सयकमलयस्सेणिनमणिज्जो ॥ १२४

पूर्वं श्रीकमलासतीसमभवत्त्वद्धर्ममाहात्म्यतो
माञ्जिष्ठद्युतितः सदाप्यकमलायन्त प्रभो ! ते नखाः ।

त्वत्सेवानिरतो नयादऽकमलाकाम्यज्जनो यश्चिरम्
स श्रीमान् जगतीशनावकमला-
वल्लीलयालिङ्गिताः(तः ?) ॥ १२५

कमलकाम्ययतीव तपस्तथा भवदरस्त्वदुपासनकाम्ययेत् ।
अकमलायिभवद्वदनेन नो अकमलासिषुराश तवाङ्गनाः ॥१२६

त्वद्वक्त्रं कमलाञ्चकार कमलन्ती लोचने नाथ ! ते
संवीक्ष्यातितमामभूवकमलं व्यापद्विलासोज्झितः ।
त्वद्वाक्येऽनिशमोमकार्षकमलं कायश्रियां निर्मितौ
धन्यस्तावदहं बभूव कमलां मुञ्चन् हि मध्यामिति ॥ १२७

त्वत्कीर्तिकान्ताकमलं जगाहे परप्रतापं कमलोत्तराभम् ।
विशिष्ट जिग्ये कमलाद्यमन्दंच्छन्दः
समूहैः कमलार्चनीय ॥ १२८

एवं यः कमलाभिधानसुमनःस्तोमैः श्रिया निर्मलै-
र्निर्माय प्रवरार्थसौरभभरैः स्तोत्रस्रजं सद्गुणाम् ।
भक्त्या श्रीवृषभाख्यविष्टपविभोरारोपयत्यादरात्
तस्यासौ वरमालिकां शिवरमाकण्ठे निदेधीयते ॥ १२९

भक्त्या श्रीयुतशान्तिविष्टपविभोरारोपयत्यादरात् ।
(एवं पार्श्व-नेमि-वीराणामपि नामानि क्षेप्यानि ॥) १३०

सद्योगैः कमलादिमैः कृतजनिर्दिष्टे विशे(शि)ष्टे स्फुर-
ल्लक्ष्मीसागरउल्लसत्सुमतिसाधुप्राप्यसद्दर्शनः ।
तेजोराजिविराजिहेमविमलप्राज्यप्रतापोदयः
सश्रीआदिजिनः सहर्षकुलजः कुर्यादहार्याः श्रियः ॥ १३१

सश्रीशान्तिजिन-इत्यादि स्वयं ज्ञेयम्

पू.आ. श्री जिनचन्द्रसूरिविरचितम्
धात्वीयपञ्चतीर्थिगत

# ३६. ॥ श्रीपञ्चजिनस्तवनम् ॥

(द्रुतविलम्बित)

कनककेतककेसरदीधितिं, मिलितमुक्तिमहासुखसन्ततिम् ।
विदितविश्वपतिं विगतानृतं, नमत नाभिभवं नयनामृतम् ॥ १

सुमुखगोमुखयक्षवरेण यः, समनुसेवित आदिमतीर्थपः ।
दमदयापर कामकलाऽजितः, शिवरमां ददतात्स वृषाङ्कितः॥२

मृदुमृगाङ्कमहाभवभीतिभिद्-गगननीरधिचापतिनुस्सवित् ।
कलकुमारककाञ्च(न)लकान्तिजित्,
विजयतां जिनशांतित्रिकालवित् ॥ ३

सकलसद्गुणरत्नकरण्डकं, भवमहोदधितारतरण्डकम् ।
सपदि वारितवादवितण्डकं, स्मरत शान्तिजिनेशमचण्डकम्॥४

विगतविस्तरवामविरामकं, मुखकलाजिततापनधामकम् ।
नतसुरासुरशङ्करनामकं, विघनमार्जनताकृतकामकम् ॥ ५

घनघनाघनकज्जलकासितं, परमकेवलभावविभासितम् ।
नमितनिर्जरराजनरेश्वरं, भजत सुन्दर ! नेमिजिनेश्वरम् ॥ ६

सकलमङ्गलमूलमपापकं, विदलिताखिलकर्मकलापकम् ।
वरविभाभरभासुरभालकं, प्रणत पार्श्वपतिं परपालकम् ॥ ७

तव दिनेश ! दिनेशसमाकृति-र्जनितलोकसुकोकचमत्कृतिः ।
रुचिररोचिकलापकलाधृतिः, कृतकुबोधतमोहरणादृतिः ॥ ८

मथितमन्मथमन्थुरसङ्कथं, जरितजन्मजरामरणव्यथम् ।
सबलसज्जितसंयमसद्रथं, विनुत वीरजिनं धृतसत्पथम् ॥ ९

तरुणतप्तहिरण्यसमत्विषं, दरितरत्यरतिप्रभृतिद्विषम् ।
विकटसङ्कटकोटिपराङ्मुखं, हृदि विधत्त जिनं विलसत्सुखम्॥१०

इति जगद्गुरुपञ्चकसंस्तव-स्सविनयं 'जिनचन्द्र' कृतस्तवः ।
सुकविचित्तकृतानघसम्मदः, प्रतनुतात्, सुखसन्ततिसम्पदः ॥११

## ३७. ॥ श्रीपञ्चतीर्थिजिनस्तवनम् ॥

शुक्लध्यानसुधारसेन निभृतः सर्वार्थसिद्धिं सृजन्
दृष्टोऽष्टापदपीठसंस्थिततनुः क्लेशप्रणाशप्रभुः ।
लोलत्कुन्तलमालिकाच्छलदलश्रेणीभिरभ्यर्चितः
श्रेयः कामघटः सतां घटयतु श्रीमान् युगादीश्वरः ॥ १

विश्वाभीप्सितशस्तवस्तुविपणिर्यस्याः पदोपासना
क्षीरं मोक्षसुखं मनोभवमुखा घासश्च दोषावली ।
वन्द्या सर्वसुपर्ववर्णगुरुभिः सा कामधेनुः सतां
मूर्तिः शान्तिजिनेशितुर्वितनुतां पुण्यप्रसूतिः श्रियम् ॥ २

कल्याणस्थितिभाग् विमुक्तिकमलाभालस्थलीमण्डनं
वीतत्रासतया जितापरमहास्त्रैलोक्यचिन्तामणिः ।
अर्तिव्रातहरः सुरासुरनरश्रेणेः परं दैवतं
श्रीमान् नेमिजिनः श्रियेऽस्तु भवतां सर्वात्मना निर्मलः ॥ ३

सच्छायस्त्रिजगन्मनोरथकथाविस्तारवैहासिकं
तन्वन् नन्दनसम्पदो दिविषदां विश्रामभूमिः परा ।
प्रीणन्नर्थिजनान् फलेन महता पत्रश्रिया मण्डितो
भूयाद् भूरिविभूतये भवभृतां श्रीपार्श्वकल्पद्रुमः ॥ ४

श्रीमत्युग्रकुलार्णवे समभवद् यः शुद्धवर्णैकभूः
सर्वः कोऽपि निषेवते प्रतिदिनं यं चाऽखिलश्रीप्रदम् ।
स श्रीवीरजिनेश्वरस्त्रिजगतीनेत्रोत्सवो दक्षिणा-
वर्तः शङ्ख इवाद्भुतातुलसुखं पुष्णातु पुण्यात्मनाम् ॥ ५

विश्वोल्लासिमहागतान्तरतमा माहात्म्यलक्ष्मीवृतः
प्रोत्सर्पद्गुणसाधवः शिवपदैश्वर्येन्दिरासंयुतः ।
क्षिप्ताशेषरुजः सदोदयभृतः श्रीतीर्थराजश्रियं
गातां नम्रसुरासुरेश्वरनरश्चैकोऽखिलावासताम् ॥ ६

इत्थं श्रीपञ्चतीर्थी सदतिशययुता प्रातिहार्यैः परीता
श्रेयः श्रीराजधानी सकलजनमनःकानने कामधेनुः ।
पुष्णातु स्फीतभक्त्या स्तुतिविषयपदं प्रापिता प्राणभाजां
सौभाग्यारोग्यभाग्याभ्युदयजयचिदानन्दसम्पद्विलासान् ॥ ७

## ३८. ॥ श्रीपञ्चजिनस्तुतिः ॥

श्रीनाभिसंभवविभुं भवसंभवकलुषकूटसंहरणम् ।
अज्ञानध्वान्तहत्यै पुरतस्तमसोऽर्कमण्डलं वन्दे ॥ (गीतिः) १

जगज्जृम्भचञ्चच्चिदानन्दवासम्
निराधारनिर्लेपरूपावभासम् ।
विनिक्षेपनिक्षेपदुर्बन्धमुक्तम्
युगादीश्वरं मूर्धलौकाभिषिक्तम् ॥ (भुजङ्गप्रयात) २

श्रीजितशत्रुभवमल-मवनं त्रैलोक्यजन्तुराशीनाम् ।
अभवनमध्याशानां भवोद्भवानां सदा सेवे ॥ (आर्या) ३

श्रुतीनामगम्यं स्वतो भिन्नजानाम्
सुगम्यं स्वयं संविदां नीरजानाम् ।
मनःकायवाचां निगूढं रहस्यम्
स्वरूपाजितं सिद्धिभाजं सदास्यम् ॥ (भुजङ्गप्रयात) ४

श्रीशान्ते ! स्वर्णकान्ते ! मदिष्ठमन्दारमूलमद्रतरो !
मामुद्धर दुःखाब्धेःसत्त्वाधिक ! सौख्यसागर धेहि ॥(आर्या)५

जनुर्यस्य लोकोपकारैकहेतु-
र्महातङ्ककक्षक्षये धूमकेतुः ।
अचिन्त्यप्रभावोद्धरं यस्य नाम
तुलोत्तीर्णधाम्ने तदस्मै नमामः ॥ (भुजङ्गप्रयात) ६

यन्नामसिद्धमन्त्रात् कृतसंकेताच्च संनिधिं यान्ति ।
नागेन्द्रमुखा देवा-स्तमाश्वसेनिं जिनं स्तुमहे ॥ (आर्या) ७

अदृश्यामवश्यामशस्यामरस्या-
मपारामहारामचारामभाराम् ।
कलां काञ्चिदस्त्येकरूपां दधानम्
भजे तं जिनं ब्रह्मणः संविधानम् ॥ (भुजङ्गप्रयात) ८

श्रीवीरतीर्थकृत्तव दुर्नयमार्गेषु शुद्धपथबुद्ध्या ।
विभ्रान्तैः परसमयै-रबाधितं शासनं जयति ॥ (आर्या) ९

निरुद्योगनिष्कामिनीरागभाव-
प्रसिद्धं समृद्धं प्रसाध्यस्वभावम् ।
महानन्दसौधे सदा यः समास्ते
निरीशाय कस्मैचिदस्मै नमस्ते ॥ (भुजङ्गप्रयात) १०

इत्थं श्रीजिनपञ्चकस्तुतिमिषाद्भक्तिर्मयाविष्कृता
सद्दृष्टेः श्रुतिबोधिदा सुविशदा हेतुः सदा दैवते ।
संसारभ्रमभञ्जनेऽगद इवालङ्काररूपा स्तुतिः
स्वात्मारामविदूदयाय सततं भूयादियं भाविता ॥ ११

(शार्दूलविक्रीडित)

पू.आ.श्री बालचन्द्रसूरिविरचिता

श्री विवेकमञ्जरीटीका-अन्तर्गता

## ३९. ॥ श्रीपञ्चजिनस्तुतिः ॥

(वसन्ततिलका)

श्रीनाभिनन्दनविभोर्वदनं मुदेऽस्तु
श्रीशारदासदनमक्षिगवाक्षरम्यम् ।
स्कन्धाचलोपरिकलश्रुतिदोलयो-
र्यत्पर्यन्तयोरुपवनीयति कुन्तलाली ॥ १

देवाधिदैवतमतीव ततानि शान्तिः
श्रेयांसि वो दिशतु संहृतविश्वतान्तिः ।
यत्पादयोर्नखरुचः प्रणतेषु शान्ति-
तोयच्छटात्वमरुणच्छवयः प्रयान्ति ॥ २

मर्यादयापि कलितः प्रियनिम्नगोऽसौ
कुग्राहवानतिगभीरपयोऽन्वितोऽपि ।
हित्वा समुद्रमिति कम्बुरगाद् यदङ्कं
स श्रीजिनो वृजिनमस्यतु शङ्खलक्ष्मा ॥ ३

निर्मेघमेघपथमेचकदेहधामा
वामासुतः स भवताद् भवतां विभूत्यै ।

यन्मैलिसीम्नि ऋषिमण्डलसप्तसप्तेः
सप्तापि सप्तय इवाहिफणाः स्फुरन्ति ॥ ४

ते वः शिवश्रियमपश्चिमतीर्थनाथ-
पादारविन्दनखचन्द्रमसो दिशन्तु ।
कामं कलङ्कविकलाः सकलाङ्कसिंह-
भीप्रोषितोदरमृगा इव ये विभान्ति ॥ ५

## ४०. ॥ श्रीपञ्चजिनेश्वरचैत्यवन्दनम् ॥

(अनुष्टुप्)

श्रियं विश्वत्रयत्राणनिष्णः पुष्णातु वः प्रभुः
शंकरः पुण्डरीकाक्षः श्रीमन्नाभिसमुद्भवः ॥ १

पान्तु श्रीशान्तिनाथस्य, पदप्रेङ्खन्नखत्विषः,
दुरन्तदुरितारण्य-प्रज्वलज्वलनश्रियः ॥ २

पुण्यप्रसूति श्रीनेमे, पातु वो देशनागवी,
घासः स्मरादयो यस्याः क्षीरं मोक्षसुखं पुनः ॥ ३

पार्श्वनाथस्य पायदू यदङ्गद्युति सागरे ।
प्रवालकन्दलायन्ते, फणरत्नप्रभाङ्कुरा ॥ ४

जयन्ति वर्धमानस्य, जिनदम्भोलिवैभवाः,
मोहान्धतमसध्वंसे, हेलया सत्त्वकेलयः ॥ ५

पू. वाचकश्रीशीलशेखरगणिविरचिताः

सिद्धहेमव्याकरणकतिपयोदाहरणमयाःपञ्चजिन स्तवाः ।

# ४१. ॥ श्रीआदिदेवस्तवः ॥

॥ प्रथमाऽध्यायस्य प्रथमः पादः ॥

(अनुष्टुप्)

परमात्मनमाद्यं त-मर्हंकारस्थितं स्तुवे ।
सिद्धिः स्याद्वादतो येना-ऽसाधि लोकान्तसंस्थिता ॥ १

महाव्रतानि (५) तत्त्वानि (९) जीवस्थानानि (१४) च प्रभुः ।
ह्रस्व (५)-दीर्घ (९)-स्वर(१४)मिता-
न्युपकृत्यै सदस्यवक् ॥ २

आत्थ सन्ध्यक्षराऽन्तस्था, सङ्ख्या (४) धर्मभिदः प्रभो ! ।
समान(१०) - नामि (१२), मानाश्च,
साधुधर्म(१०) - तपो (१२) - भिदः (२२) ॥ ३

भो ! गुरुर्व्यञ्जन (३३) मिता-शातनाः प्रोज्झ्य सेव्यताम् ।
वर्ग (५) प्रमान् प्रमादांश्च, सदाऽप्यादिजिनोऽर्च्यताम् ॥ ४

देवान् धुट् (२४) सङ्ख्ययाधीशो-पसर्गान् (२०) घोषवान् (२०) मितान् ।
त्वमघोष (१३) प्रमाणानि, क्रियास्थानानि चोक्तवान् ॥ ५

चित्तं दिव्यति नाऽऽस्रेषु, भवदीयवचस्सु नः ।
ब्रह्मीयति तमो (१२) भास्वन्, मरुत्वद्भिर्नमस्कृतः(ताः) ॥६

## ॥ प्रथमाऽध्यायस्य द्वितीयः पादः ॥

(अनुष्टुप्)

जिनाधीशं गुणाधारं, मुदाऽहं करुणाकरम् ।
बहूर्जं सुरभर्तृषिसेव्यं सिद्धीह्यमाश्रये ॥ ७

महऋद्धिसुरोपास्यं, वन्दिते (तै)कजिनर्षभम् ।
सज्ज्ञानादित्रिरूपः स्याद्, यवल्कार ऋता सह ॥ ८

तथेश(शोऽपि चतृ)रूपो, जायते देशनां सृजन् ।
ऋकारो हि ऋकारेण नृ(लृ)कारेण समं यथा (क) ॥ ९

मोहेन परमर्त्तं मां, पापं प्रार्ण्णं ऋणार्ण्णवत् ।
दोषार्त्त पीडयेद् वीक्ष्य, त्वां तु प्राच्र्छाम्यहं सुखम् (ख)
प्राल्कारन्ति भवन्नत्या, क्षमया प्रार्षयन्ति ये ।
गुणौघैर्धौतचित्तास्ते, सदैवोद्धत्यवर्जिताः ॥ १०

योऽपुष्यत् प्रैष्यतां प्रौढ !, प्रौहप्रौढौ त्वयि प्रभो ! ।
स्वैरिमोहनृपस्वैरा-ऽक्षौहिणीभयमस्यज ॥ ११

विद्रुमोष्ठा अवृद्धौ तु, क्रूरामर्त्या इहेव ते ।
ये दध्युस्त्वां मुदो रूपं, प्रेलिताः प्रोखितुं शिवम् ॥ १२

त्वं भूत्या प्रैधसे चार्वा, दुःखे च प्रोषधीयसे ।
भात्रङ्गं मञ्जु आपन्नः, शिव एवोत्क ! नायक ! ॥ १३

नाव्यसेऽत्र भवाम्भोधा-वार्जवे जवनोऽनिशम् ।
भव्यैश्च नन्त्र्यविस्तीर्ण-स्तवौयत यशः पयः ॥ १४

त्वां गवाक्षविमानेषूः नीहा नेमुर्गवीश्वराः ।
गवेन्द्राश्च गवाभीष्ट !, गोअग्र्य इह गोऽवन ! ॥ १५

प्रीणाते आशु रोदस्यौ, मृदू अंह्री इमे इन ! ।
तव तौ नाऽनमन्नेत्य, कुधियोऽमी अहो इह ॥ १६

प्रभो ! इत्या इमे भेजुः, किम्वजं किमु ईश्वरम् ।
त्वामपास्य परेऽस्यन्तं, यशोवाग्भ्यां दधि मधुम् ॥ १७

॥ प्रथमाऽध्यायस्य तृतीयः पादः ॥

(अनुष्टुप्)

भक्तियुङ् ङुवते यस्ते, गुणान्, सन्नपसद्म तान् ।
शश्वच्च वक्रवाग्युक्तः, स षण्णां रक्षकोऽङ्गिनाम् ॥ १८

रुग्घीनद्विदृतौ दक्ष ! विष्वग्हित ! विपद्धर ! ।
वाक्छान्त ! सच्छमश्छान्तः, पुण्यैः खलु गुणैः प्रभो ! ॥ १९

महश्शस्तः सहस्सार-ष्षट् द्रव्यप्रचनश्चितम् ।
विरतश्छद्मतस्तन्या-ष्टङ्कस्त्वं मे स्मराऽश्मनि ॥ २०

स्वामिंश्चन्द्रसमांश्चारु - गुणांश्छिन्नमितींस्तितान् ।
शंसेत् - पुमांष्टणत्कार-करान् विश्वे प्रशान् तव ॥ २१

पुंस्कान्तको न पुंस्प्रष्ठो-ऽपुंस्चलोऽपुंश्चलो भवेत् ।
त्वां पुंख्यातोऽत्र पुंशूरः, पुंष्ठकः पुंस्तमो नमन् ॥ २२

त्वं नृंन् प्रीणासि नृंः पासि, यथा संस्कारयुग् वचाः ।
सस्कर्त्ता भूतलं नेत-र्वच्मि कांस्कान् परांस्तथा ॥ २३

भुवि चङ्क्रम्यते नाऽयं, सुखं जञ्जन्यतेऽस्य च ।
यस्त्वां वव्वँन्यते कंव्वं, यम्यम्येत प्रमोदतः ॥ २४

सोऽवश्यल्ह्लादते खेदं, हनुतेऽलं ह्यार्जवमम्ह्मलेत् ।
सम्राड् भवेन्मुदा त्वां यो, युङ्क् सदा श्रुतगुण्ट् श्रयेत् ॥ २५

द्विड् त्समूहं हरन् त्साधु, वहञ्च् शान्तिं जिनोऽर्च्यताम् ।
धर्मो जेता भगो दैत्या, भो देवा भुव्यघो नराः ॥ २६

त्वत्पादा अर्वति स्वच्छ्र–वभीत इह मार्दयः ।
तस्नोद्रतार्त्तयिद्धांश – वातन्याविभ इष्टशम् ॥ २७

भो उत्तमाद्यघोयिन्द्रा – येषयेव मद्धानिनः ।
संविदायुदुऽघं भिन्द–न्नमृताध्वसुभण्णिह ॥ २८

त्वां नत्वा सत्तनूच्छायं, प्रभो ! छद्मोज्झितं नरः ।
कर्म किं माच्छिदद् ब्रह्म्म, गच्छेदर्हगुणह्रदः ॥ २९

सद्ध्यानगो प्प्रिय ! श्रीमन्न्, प्रोर्ण्णुनाव गुणैर्भवान् ।
दिशो वर्य ! सुधाजल्प्य, हृद्यशं क्कलित प्प्रभो ! ॥ ३०

पुंसां निष्कम्प ! रुक्श्शान्त !, दर्शनेश वचांसि ते ।
बृंहयन्ति मुदं स्वाराड्, वन्द्याऽर्चीरानिविग्रह ! ॥ ३१

येन माढिः कृता ते वाग्, लीढा गूढं निजं मनः ।
सोढुं कष्टं च कायोत्थं, वोढा सैष शिवश्रियम् ॥ ३२

स त्वं पिण्ढि भयं मेऽर्त्तिं, पिण्ड्ढ तर्प्ता सतां गुणैः ।
सको येन जितो मोहो–ऽनेषो भूभाग आरचि ॥ ३३

नयज्ञति भवे बुद्ध–तत्त्वो विट् त्वयि भक्तिभाक् ।
देव उत्तमधीः प्राज्ञः, सहः ख्यातः तपः क्षमः ॥ ३४

गीःपतिको यश स्फीतं, गीर्षु धूतपयःसु ते ।
गीर्पतिः स्तुत्य ! तेजोऽस्ता–ऽहर्पते ! निनताऽप्सरः ! ॥ ३५

ऊनस्तवाऽन्तिकस्थोऽन्य–स्वभावोऽपि सदृग् भवेत् ।
योगे यथा तवर्गो हि, स्याच्चवर्गटवर्गयोः ॥ ३६

लोके मूद्र्धन्यता टव-ठव-डव-ढवस्य वत् ।
त्वच् शासनस्य पिष्टाऽघ-तमः पूष्णोऽभवज्जिन ! ॥ ३७

जज्ञे यस्त्वत् पुमाञ् शान्त-श्चवर्गाक्षरवत्समम् ।
कुर्युः स्वेहि तवर्गं त-दक्षाण्येकत्र संस्थिते: ॥ ३८

यस्त्वामीट्टे तमस्तस्य, वृश्चाऽप्रश्नेऽपि सत्पथम् ।
बम्भण्मि स्म च षट्तर्का-गमा षट् स त्वरुण् ननु ॥ ३९

षण्णां विशेषं हृदि दर्शनानां, मत्वा जवात् षण्णवतिं च हित्वा ।
पाखण्डिनां त्वामिति नौति यस्तं,
शिवं भवांल्लम्भयताज्जिनाय ॥ (उपजाति) ४०

इति हैमव्याकरणकतिपयोदाहरणमयः
श्रीआदिदेवस्तवःप्रथमः।

## ४२. ॥ श्रीशान्तिनाथस्तवः ॥

॥ प्रथमाऽध्यायस्य चतुर्थः पादः ॥
(अनुष्टुप्)

शान्तिं शिवाय सर्वज्ञं, मुद्यत्नाभ्यां जनाः स्तुत ।
अमीभिरिमकैर्देवैः, सदाऽतिजरसैर्नतम् ॥ १

को न वाक्काययोः शुद्ध्या, गुणेभ्यः स्पृहयेत्तव ।
शमेन जितरोषस्य, केषां वाक्येषु नादरः ॥ २

यस्मै हिताय सर्वस्मै, शक्राः सर्वे नता रयात् ।
नेशुर्यस्माच्च लोकेऽस्मिन्, दोषास्तस्मान्मुदस्तु मे ॥ ३

नतिर्गुणत्वतं हेतुं, त्वादृशे क्रियते यदि ।
कतमस्मै तदा त्वस्मै, कतरस्मिंश्च विस्मयः ॥ ४

युष्मादृशे नमस्कार्ये–ऽन्यतरस्मिन्नतिर्मुधा ।
स्वस्मिन् निःस्वे हि कः स्वाये–तरस्मिन्नादरं सृजेत् ॥ ५

भावारयो रता नेमा, जिता नेमेऽर्जिता गुणाः ।
त्वयाऽनल्पे सुरास्तुष्टा, नेमुश्च त्वां चतुष्टये ॥ ६

स्वाऽन्ये दानात् त्वया स्वाऽन्या, गिरा च प्रीणिताः प्रभो ! ।
जने पूर्वाऽवरेऽचिन्ति, मासपूर्वे यथाहितम् ॥ ७

स्वे पूर्वस्मिन् भवे तप्तं, यैस्तेषां त्वं हि गोचरः ।
भुवनेऽत्र द्वितीयस्मि–स्तृतीये विश्रुतो गुणैः ॥ ८

पूर्वे जिना नृपा आस–न्नसमाः केऽपि वाऽपराः ।
राज्यलाभेऽप्यरज्यन्त, समस्मिन्न भवादृशाः ॥ ९

प्रजायै हितसर्वस्यै, रमाया भाजनं भवान् ।
सर्वस्या देव ! सर्वस्यां, कृपायामस्ति यत्नवान् ॥ १०

साधवो दधतः क्षान्ति–कूपे अस्ताधयस्तव ।
अङ्घ्रीपद्ममृदू दध्युः, श्रद्धया क्षमयोः प्रिय ! ॥ ११

यो विश्वबन्धवे तेऽति स्त्रयेऽनंसीन्न तस्य भीः ।
पटोः स्फुटमतेर्दीप्त्या, रविणा मञ्जुना सम ! ॥ १२

त्वयि त्रिजगतः पत्यौ, प्राप्ते सख्यौ गुरौ च किम् ।
सख्याऽन्येन क्षितौ पत्या, व्रते सख्युरकाङ्क्षक ! ॥ १३

बुद्ध्यै योऽश्लाघत तान् वै, तवाऽतन्वां नतौ रतः ।
चार्वाः स गुरुबुद्धेः स्या–ज्जेता बुद्ध्याः शुचेर्गुरोः ॥ १४

रत्नस्त्रियै यथा पङ्ग्वै, मह्यामस्पृहयालुना ।
सिद्धिवध्वां त्वयाऽसञ्जि, शुच्यास्तन्या जितार्जन । (?) ॥१५

शिवश्रिये श्रियास्त्यागं, स्वःश्रिये स्वर्श्रियोऽङ्गिवत् ।
व्यधा विज्ञो हि रज्येन्न, श्रियां भुवि च सुभ्रुवाः ॥ १६

अक्षोभ्यः सुभ्रुवां भीनां, भेत्ताऽग्र्याणां श्रियां गृहम् ।
सुराणां तद्वधूनां च, वन्द्यः षण्णां हितोऽङ्गिनाम् ॥ १७

चतुर्ण्णां पदधर्माणां, पञ्चानां स्रोतसां जयी ।
त्रयाणां जगता त्राता, गोः प्रियोऽसि मतेर्वरः ॥ (यु.) १८

पत्युः शिवश्रियः पत्यु-र्नेतुर्जातं नुतागमम् ।
पितरं नु प्रशास्तारं, भेत्तारं रतिभर्त्तरि ॥ १९

सत्रातरचिरामातः !, शान्ते ! रक्ष गुणक्षमे ! ।
शमाम्बु न हि विश्वाम्ब !, मां श्रीगेहजिते ! जिन ॥ २०

त्वयोर्वी रक्षिता राज्ये, शक्तीनां तिसृणां पदम् ।
भवान् षण्णां गुणानां चा-ऽजनि सप्रेयसी भृशम् ॥ २१

चतुर्ण्णां कायुपायानां, जेता चतसृणां दिशाम् ।
अपनेताऽरिनृणां च, नृणामृद्धीर्ददन् महान् ॥ २२

सा या हन्याऽऽगमाधीति-र्व्यह्वि वर्या महात्मनाम् ।
त्वया न्यषेधि पथ्याय, नम्रोऽस्मि त्वयि मुन्नियाम् ॥ २४

सोऽष्टासु दिक्षु विख्यात-स्त्वं जयाऽष्टौ हरन् मदान् ।
अष्टानां कर्मणां भेत्ता, येनाऽष्टौ मातरः स्मृताः ॥ २४

त्वया रक्ष्यन्ते षड्जीवा, विषयाः पञ्च दूरिताः ।
गुणा यति यथात्ताश्च, तथाऽन्ये तति कत्यधुः ॥ २५

शैत्यमाधुर्यव(च)र्याणि, पयसी द्वे वचांसि ते ।
विजिग्यिरे जिनाऽमूनि, मुनिवृन्दं साध्वपा(सा)त् ॥ २६

अन्यत्तेऽन्यतरद् दूरे-ऽजर एकतरं वचः ।
ददेऽतिजरसं स्थानं, बहुवारे ! भवानले ॥ २७

अक्ष्णोः श्रिया जिताम्भोज ! बहु नो यशसः शुचेः ।
दध्नः क्षीराब्धिवीराणां, समा द्विश्वान्यपूरयः ॥ २८

वचांस्यमृतसध्र्यञ्चि, साधुषु प्राङ् वदन् भवान् ।
बहूञ्जि मोहमङ्के युङ् बुद्ध्या श्रीयुग् मुदं व्यधात् ॥ २९

गत्याऽनड्वान् जय त्वं स, गौद्यौर्येन कृता महैः ।
गा यस्याऽनुपमाः पीत्वा, पुमान् द्यामपि नैहत ॥ ३०

शैवोऽदर्शि त्वया पन्था, धर्मोऽभाषि भवाम्बुधौ ।
मन्थास्त्वां साधवः पथ्य, ऋभुक्षाणश्च भेजिरे ॥ ३१

ऋभुक्षाऽर्च्य पदाब्जे ते, गीश्च दर्शितसत्पथी ।
न्यस्यतां पथि मुक्तेर्मा, शस्यबुद्ध्या जितोशनन् ॥ ३२

भेजुर्धर्मधुराऽनड्वं - श्चत्वारस्त्वां नतोशन ! ।
अतिचत्वः ! कषायैर्गोः, सखायं सुरसञ्चयाः ॥ ३३

सोऽनेहाऽऽसीत् परो नम्र-पुरुदंशानयोशना ।
यत्र राजा पितेवाऽभूः, प्रियकर्त्ता सखेव च ॥ ३४

तस्य भद्राणि भूयांसि, हारीणि स्युर्गुणैर्महान् ।
तमोहा येन पूषेव, त्वं यशस्वी नतः शमी ॥ ३५

नतवृत्रहणौ तेऽह्री, श्रितौ पङ्कजराजितौ ।
येन तेजोऽर्यमा कुर्या-स्त्वं तमाप इवाऽमलम् ॥ ३६

देव ! स्वाम्पि सरांसीव, तृष्णां त्वां हतवानिह ।
देहिनां सन्महाः श्रीमान्, नीरजः सर्वदोषजः ॥ ३७

हेलया त्वं हरन्मोहं, क्रोष्टारमिव केसरी ।
दुष्टक्रोष्टूनि तन्वम्पि, वनानाप्य तपोव्यधाः ॥ ३८

स्थीयते यत्र निःशङ्कं, हरेः क्रोष्टोरिवान्तिके ।
क्रोष्टा क्रोष्ट्र्या च सा कस्य, देशनोर्वी मुदे न ते ॥ ३९

त्यक्त्वा कलत्राणि वराणि देव-
दाराणि वाऽऽदत्त चतुर्यमीं यः ।
तं स्तौति यः शान्तिजिनं सुशब्द-
ब्रह्माश्रितं तादृगिहापि स स्यात् ॥ (उपजाति) ४०

इति हैमव्याकरणकतिपयोदाहरणमयः श्रीशान्तिनाथस्तवो द्वितीयः॥

## ४३. ॥ श्रीनेमिनाथस्तवः ॥

॥ द्वितीयाऽध्यायस्य प्रथमः पादः ॥

(अनुष्टुप्)

यं श्रिता गुप्तयस्तिस्रः, श्रीनेमिं नौमि तं गतीः ।
चतस्रोऽपासितुं, ज्ञाना-दिश्रियां तिसृणां गृहम् ॥ १

राभिरद्भिरिवाब्देन, तोषितं जरसोज्झिता ।
जगद् युष्माभिरस्माभि-स्तदर्थ्येताऽजरः पदम् ॥ २

शङ्खे यत्पूरिते विष्णु-र्बलमाह मया त्वया ।
अजय्यस्त्वयि मय्येष, हितो भावी सखाऽऽवयोः ॥ ३

कषायाधीर्न युष्माकं, रागद्वेषौ युवां जडौ ।
याताऽस्मभ्यं युषभ्यं य-द्धितो जेताऽस्ति वः प्रभुः ॥ ४

त्वां तद्वचोऽहकं तीर्थं, त्वदीयं नौमि रक्ष माम् ।
त्वं मद्दुःखं हर प्रीत्या, वयं यूयं यदीक्षिताः ॥ ५

मह्यं हित ! नमस्तुभ्यं, तव सेवा सदा मम ।
कामक्रोधौ युवां मां चो-ज्झतमस्मानवेत्प्रभुः ॥ ६

अस्मभ्यं नत युष्मभ्य-मिष्टं देह्यस्मदापदम् ।
दूरय त्वं मुदस्माकं, स्तुत्या युष्माकमस्तु च ॥ ७

हितो वो नो जनाः सोऽव्या-दीशो वीक्ष्य यमूचतुः ।
दम्भलोभौ मदक्रोधौ, क्रुद्धो वां नौ निहन्त्यसौ ॥ ८

मुदे हितं मतं ते मे, नौमि त्वा रक्षया भवान् ।
ऊना युष्मान् जिनः पातु, सन्तो मा वोऽस्तु स प्रभुः ॥ ९

नेमेऽर्हंस्ते नमः स्वाम्यं, तव त्वां च न कोऽर्चति ।
समीक्ष्य त्वां जनोऽभ्येति, भाग्यात् त्वां पश्यतीह सः ॥ १०

धन्योऽहं पासि यन्मा त्वं, जिनस्तत्त्वाऽभजन् सुराः ।
जना यूयं विनीतास्तत्, प्रभुर्वो भवतोऽवति ॥ ११

पश्यैतकं नतं लोक-मथो रक्षैनमीशते ।
मुख्येनैतेन जिग्येऽब्ज-मेनेनेन्दुः सदा श्रिया ॥ १२

पदोरस्त्यनयोः श्रीस्ते, जनो दृष्टा(ट्वा) तदेनयोः ।
प्रज्ञेमि(म)केषु वाक्येषु, तदेष्वेषां सतां रतिः ॥ १३

अयं मोह इयं माया, वचसाऽपास्यनेन ते ।
रागद्वेषो हतौ चेमौ, कोऽस्मिन्नाऽतः कदा रतः ॥ १४

गते यतोऽप्युभे ध्याने, द्वे येनाऽसि स्मरोऽसुकः ।
लोभोऽसुकौ मुदे सैष, देवः स्याऽसौ च तस्य गीः ॥ १५

जज्ञेऽस्याऽदोमवन्नाद्रौ, विकल्पोऽमुमुयङ् न कः ।
अमुना भीहता दोषा, ज्ञा अमुष्यामुकेऽस्मरन् ॥ १६

ये तेऽ[प्य]ध्यैत सिद्धान्तं, लुवं प्रीतेर्नियं पथि ।
युयुवुः स्वं दिवीयुस्ते, शिवं नायक ! शिश्रियुः ॥ १७

राजीमती स्त्रियां वाञ्छन्, त्वां स्तुवन्नश्नुवीत ना ।
गोस्त्रियः सुभ्रुवः स्त्रीश्च, मुक्तिस्त्रीमपि तां क्रमात् ॥ १८

ये निन्युः सुधियो वस्वः, पत्यस्त्वां चिच्युरार्जवम् ।
दोषल्वोऽग्राथ एषां स्यु-र्गुणाः प्रतिभुवः श्रियः ॥ १९

कारभ्वमिव वर्षाभ्व-मिव चार्त्तं भवेऽत्र माम् ।
पान्तु वाक्यानि तेऽग्र्याणि. तमःपूष्णो विपज्जिहीः ॥ २०

भग्नरुग् दोषलून्युस्ते, वृक्णात्तेऽघं पिपिक्षतः ।
मते को मोक्षमारोक्ष्मन्, भवोत्तीर्ण ! न दीव्यति ॥ २१

स नो दिव्यति गीर्येन्न, गुरोः कुर्यात् तपोरजः ।
छुर्यात्ते समता धुर्या, गीर्येनाऽघलुवः श्रुता ॥ २२

जगन्वान् सिद्धिमतिर्ध्वन्, नेमिवद्भिः सदा प्रशान् ।
श्रेयोरथेऽनडुद्भिस्त्वं, श्रितो विद्वद्भिरुक्तदिक् ॥ २३

सुदृगुष्णिक् स्तुतो धीस्पृक्, स्त्रग्भिस्त्वं पूजितोऽमरैः ।
अजीवनक् नरेषु प्राङ् श्रीसजूर्युङ् गुणैर्दधृग् ॥ २४

किं तैरहोभिरर्हन्न, यत्राहर्निशमानतः ।
अहोरात्रं मनोवाग् घुट्, तत्त्वभुन्नतकामधुक् ॥ २५

भव्या यूयं न्यगूढं हृत्, सद्गिरोऽधुग्ध्वमाश्रिताः ।
जिन ! सम्यग् निघोक्ष्यध्वे, योगान् भोत्स्यध्व आश्रवान् ॥२६

बुधास्तत्त्वमबु(भु)द्ध्वं चे-न्नाघं धच्छाशये शमम् ।
धद्ध्वे रुन्ध च दुर्बुद्धिं, साम्यं धत्तः सदा तदा ॥ २७

विश्वं यशोभिरस्तीढ्र्वं-मवृढवं मुक्तिमुन्नतिम् ।
ववृढ्वे शर्म चेषीढ्वं, स्तीर्षीढ्वं दुःखमीश ! मे ॥ २८

अग्रहीढ्वं श्रियायिढ्वं, श्रेयोऽग्राहिढ्वमुत्सवैः ।
जगृहिढ्वे शमासिध्वं, सिद्धौ मेहिध्वमुत्तमैः ॥ २९

अलविढ्वं तमोबाढं, पुपुविढ्वे स्वमुच्चकैः ।
त्रातुमुत्सहिषीढ्वमा-यिषीढ्वं हृदि मे प्रभो ! ॥ ३०

अनायिढ्वं मनोयेना-ऽस्मारिषीढ्वं स मोहधक् ।
लेढि ते वाक्सुधां दग्ध-तापां हस्तजिताम्बुरुट् ॥ ३१

अद्रोग्धा स्नुग्धशं स्नेढा, स्नुढस्त्येष्वमूढधीः ।
अमुग्धस्निग्धहृद् दैत्य-धुग् रुक्मिध्रुड् नतो जय ॥ ३२

सत्यवाग् भक्तिभाग्भिस्त्वं, मुक्तोपानद्भिरानतः ।
निर्ग्रन्थैरिष्टसिद्धान्तै-स्तीर्थस्त्रष्टाच्छसत्पथम् ॥ ३३

नम्रसम्राट् तमोमार्ष्टा, श्रीविभ्राट्, गणराष्टिसृट् ।
लाभव्रष्टा विभो ! नन्द, यशोभ्राष्टिकृदर्त्तिमुट् ॥ ३४

पापभृट् तापवृट् कर्म-भ्रष्टा पुम्भिर्नतो भवान् ।
दिष्टविट् सुख आव्रष्टा, पृष्टोऽपि श्रेय आधितट् ॥ ३५

स्वामिन् ! मुक्तिचिकीर्मोह-सूर्क्तमोहः सुधीरिमा ।
शंवान् ! श्रीधाम ! धीसद्मन् !, दयावान् शमवानव ॥ ३६

मुग्धान् भास्वान् यशस्वांश्च, प्रजां राजन्वतीं सृजन् ।
लक्ष्मवांस्त्वां हरिर्भेजे, कक्षीवान् नु मुनीवतीम् ॥ ३७

गुणोदन्वान् नताऽष्ठीवान्, मुन्योघो यवमत्करम् ।
वीक्ष्य त्वां मोहनिश्यर्कं, हृष्टः सिंहासनि स्थितम् ॥ ३८

दतां पदोर्नसो दोष्णो-र्हृदोऽस्नश्चोपमा न ते ।
सुधायूष्णा समा गीः स्या-दुद्नस्तुल्या तमोऽनले ॥ ३९

द्विपादस्त्वां यथा नेमु-स्तथा वन्द्यं चतुष्पदाम् ।
त्वं बोधयन्नुदीच्यादीन्, प्राच्यादिप्रसरद् यशाः ॥ ४०

मुनिभिस्त्वां विदुष्मन्तं, विदुष्यं विदुषां चयः ।
किं हित्वाऽन्यसुरान् सक्तान्, यूनः शून इव श्रयेत् ॥ ४१

मघोनोऽर्च्य माघोन्या च, सन्तोषामृतपा त्वया ।
राज्ञो राज्ञ्याः समुद्रस्य, शिवायाश्च कृतं सुखम् ॥ ४२

निःसीमनि पदाब्जे स-द्धाम्नी निर्धूतकर्मणी ।
तव हृद्वाम्नि वार्त्रघ्नः सङ्घो न्यस्यानिशं स्मरेत् ॥ ४३

वन्दे सुपर्वणां सेव्यं, त्वां प्राप्तं शिवधामनि ।
तमोघ्नन्तं जिनाऽनन्तं, नमज्जन्तौ पितुः समम् ॥ ४४

भान्ती तनुस्ते पुनती तुदन्ती, श्यन्ती हरन्ती च तमोऽशुभाती ।
नेत्रे च नेमे द्युसदो द्युचक्रु-र्महैर्भुवं त्वां स्तुवतोऽप्रिया द्यौः ॥४५
(उपजाति)

इति हैमव्याकरणकतिपयोदाहरणमयः श्रीनेमिस्तवः तृतीयः॥

# ४४. ॥ श्रीपार्श्वनाथस्तवः ॥

॥ द्वितीयाऽध्यायस्य द्वितीयः पादः ॥

(अनुष्टुप्)

अर्हन्तं नौऽमि तं पार्श्वं, हेतुं कार[क] वज्जने ।
सत्क्रियाणां तपःकर्त्ता, स्वतन्त्रो योऽभवद् व्रते ॥ १

त्वां नमन् को न दुष्कर्म, दहेदन्यांश्च मोचयेत् ।
मार्गं याति सतो हर्षं, गमयेद् भोजयेद् वरम् ॥ २

त्वं बोधयन्नतो येना-ऽध्यापयन्नागमं मुनीन् ।
मोदयन् नाथयंस्तैश्च, व्रतं शं तेन वाहय ॥ ३

न वृषान् वाहयेद् भारं, भक्षयेन् न शुनो मृगान् ।
सत्क्रियां कारयेन् नान्यै-र्धर्मं यं त्वमचीकरः ॥ ४

देशं विहारयन् साधून्, भैक्षमाहरयंश्च तैः ।
भव्यान् दर्शयसे श्राद्धै - श्चाभिवादयसे तथा ॥ ५

दयमानं शिवं द्योश्च, त्वं स्मरेन्नपरस्य ना ।
सर्पिषो नाथते नाथ !, न तैलं हि विशेषवित् ॥ ६

उपस्कर्त्तुं गुणान् क्षान्तैः, सज्जं त्वां न रुजोऽरुजन् ।
गोश्च प्रभावतो नोज्जा-सयतः पिषनश्च ते ॥ ७

निहन्ति नाङ्गिनां दीव्येत्, पणायेद् व्यवहृत्य च ।
सहस्रस्य शतं वा न, प्रदीव्यति नतस्त्वयि ॥ ८

नाऽक्षैर्देवयतेऽन्येन, जनोऽक्षांश्च न दीव्यति ।
मतमध्यास्य मार्गं ते-ऽधितिष्ठन् साम्यमाऽऽवसन् ॥ ९

श्रेयोऽभिनिविशतेऽसौ, मासमास्ते च योगतः ।
गोदोहं यस्य ह्यास्से, मुदं वाचा ददद् गवे ॥ १०

दिवे न स्पृहयेत् कुप्येत्, मोहाय द्रुह्यते भुवे ।
स लोभाद् विरमेद् यस्य, चित्तान्नान्यत्र गच्छसि ॥ ११

स त्वं जय प्रभो ! दोषाः, समयाऽस्थुर्न यं सुराः ।
निकषा यं स्थिता लोकं, हा धिक् च त्वयि दुर्धियम् ॥ १२

अन्योऽन्तरा भुवं द्यां च, प्रभुस्त्वामन्तरेण न ।
तेन त्वां सन्त इत्यागुः(हुः), पद्मं येनाऽलयो यथा ॥ १३

द्या उपर्युपरीयुस्त्वां, नता शक्राश्च सर्वतः ।
अभितोऽवीजयन् देवा–श्चामरैः परितो गुणाः ॥ १४

अभ्यशोकं प्रभो !ऽनु त्वां, रत्नवप्रं परिस्थितम् ।
सन्तोऽहरहरत्येयु–र्न तुन्द्यां प्रत्यनादराः ॥ १५

त्वज्जन्मोत्सवमन्वायुः, सुरास्तच्चा(तत्त्वा?) मुपेतरे ।
देवा ग्रहा इवान्वर्कं, त्वं नतान् बहुरक्षसि ॥ १६

सत्पथं पृच्छतः साधून् मनस्त्वां नयतः सदा ।
भवानन्वशिषद्धर्मं, स्वामाह(?) नतिमग्रहीत् ॥ १७

सर्वघस्रान् सुराऽऽनम्य, मुहूर्त्तेन व्यधुस्त्वया ।
गणेशा द्वादशाङ्गानि, ध्यानेन ज्ञानमापि च ॥ १८

भामण्डलेन बुद्धस्त्वं, शक्रैः सह सुरैः समम् ।
दैत्यैः साकं नरैः साद्र्धं, देशनोर्व्यां स्थितो जनैः ॥ १९

प्रकृत्या दर्शनीयस्त्वं, शिवेनोत्सुक ! चेन्नतः ।
राज्येनाऽलङ्कृतं स्त्रीभि–र्दिवा तत्किं सृतं श्रिया ॥ २०

सञ्ज्ञानानो गुणैः कामे-ऽवबद्धः संप्रयच्छते ।
द्विद्रोणेन जडो धान्यं, कुस्त्रिया ननु तेऽर्चने ॥ २१

मह्यं देहि मुदे शं त्वं, यस्मै साम्यमरोचत ।
शक्रोऽश्लाघिष्ट लोकायै-
क्षथा ज्ञानाय षोऽवसन् (सोऽवसत् ?) ॥ २२

वाक् ते लाभाय मुक्ताभ्यः, स्वात्यम्बुवदकल्प्यत ।
पात्रेऽन्यत्र तु तापाय, सा मुक्तेव तडिद् भवेत् (?) ॥ २३

सद्ध्यानाय वनेऽस्थास्त्वं, पुरे ग्रामं च नाऽऽगमः ।
नत्वा हितं सुखं चोर्व्यै, त्वां मन्ये द्यां तृणाय न ॥ २४

जीवेभ्योऽस्तु शमायुष्यं, लोकानां क्षेममन्वहम् ।
अर्थश्च सिद्ध्यतु स्वस्ति, त्वन्मतस्थितवागिति ॥ २५

भद्रं ते त्वन्मतायाऽस्तु, नमस्यंस्ते जनः प्रभुः ।
मोहच्छिदे निवृत्तोऽघा-दासिद्धेः शर्म चाश्नुते ॥ २६

न्यस्तोर्वी पर्यभव्येभ्यः, केवलात् प्रभृति त्वया ।
धर्मे ततो बहिर्मोहात्, कोऽन्यस्त्वत् प्रति पश्चिमः ॥ २७

दोषा(:) स्तोकाज्जिता ज्ञानाद्, दूरे कृच्छ्रात् त्वदन्तिके ।
गुणास्ते स्युरदेवस्या-ऽज्ञासीत् त्वां कुधियां गणः ॥ २८

उपर्यधः क्षतेः कीर्त्तिः, परस्तात् ते ययौ स्थितः ।
न मोहः पुरतः कामः, पुरस्ताज्जेतुरंहसाम् ॥ २९

भेदकोऽर्त्तेर्द्विषन् भीते-र्नेता द्यां त्वां शिवस्य च ।
पुंसां तवाऽऽसिका सिद्धौ, कृतिः क्षान्तेस्त्वया धृतेः ॥ ३०

बिभित्सा भेदिकाऽघस्य, तव घात्यो मदस्त्वया ।
लोभो जेयोऽसनीया भी-र्नेतव्यं च मुदं जगत् ॥ ३१

दयामिच्छुर्जगत्त्रसा, विद्वांस्त्रातुं रतो गुणान् ।
दधानः शर्म लेभान-स्तन्वन् ज्ञानञ्च वावहिः ॥ ३२

त्वां योगिनां मतं सद्भिः सुलभं कारकैर्व्रतम् ।
श्रितवद्भिर्नतं देवै-स्तत्त्वं सुज्ञानमास्तिकैः ॥ ३३

शिखिनो नृत्तवत्तसं, निराम्नायं युधाङ्गिभिः ।
विधिज्ञाः कामुका मुक्तैस्तत् त्वदाज्ञां प्रपादुकाः ॥ ३४

निर्वृतिं गमिनोऽप्यन्ये, यान्ति मासे द्विरम्बुपाः ।
द्विर्भो ! जिनोऽपि मासो न, मोक्षे लक्षं नु दायिनः ॥ ३५

व्रते कुशलमायुक्तं, तपसोऽधिपतिं श्रियाम् ।
त्वां दिवि स्वामिनो भेजुः, स्वभ्रे च भुव ईश्वराः ॥ ३६

सिद्धान्तेऽधीतिनोऽतीत-पूर्विणोऽघं ततर्षयः ? ।
साधवः पौरुषीमाने, छायायां त्रिपदान्यदुः (?) ॥ ३७

दोषेष्वसाधवः साम्ये, निपुणास्त्वयि वीक्षिते ।
अहृष्यन् भाष्यमाणे च, त्वया धर्मे सुनिर्मले ॥ ३८

सर्वार्थसिद्धिर्यास्त्यून- सप्तरज्जूषु गोः सुरैः ।
तस्या नाप्येत तेनाप्तेः सिद्धिर्द्वादशयोजनी ॥ ३९

लोकस्य रुदतोऽप्यात्त-दीक्षं नृषु च नाकिनाम् ।
प्रशस्यं त्वां जनः पश्यन्, पक्षात् भवेन्न मासि वा ॥ ४०

पृथक्कोपेन मानाच्च, नाना दम्भेन भो ! भृतः ।
न त्वं भाग्यादृते पुण्यं, चाप्यसे पापहृज्जनैः ॥ ४१

विनाऽऽलस्यं प्रमादेन, मोहाच्च त्वां श्रये तपः ।
मेरुं पूर्वेण सोत्पद्य, सिद्ध्येदिन्दोः समैर्गुणैः ॥ ४२

यो वित्तेन निमित्तेन, हेतोः स्वर्गाच्छिवस्य च ।
राज्यार्थाय च मुद्यर्थे, त्वां भजेत्तस्य तद् भवेत् ॥ ४३

यो हेतुः सत्यवाग् हेतुं, यं सत्पूज्योऽसि हेतुना ।
येनाऽदोषो यतो हेतो-र्ज्ञानी तस्य त्वमिष्यसे ॥ ४४

दूरेण ते कर्म मदश्च दूराद्, दूरे स्मरोऽगात् त्वदघं च दूरम् ।
प्रापुर्गुणास्तेऽन्तिकमन्तिकेन,
क्षमान्तिकात् त्वच्च दयान्तिके श्रीः ॥ (उपजाति) ४५

यः फल्गुनीषु गतमर्कमफल्गुवल्गा-
धाम्नाऽजयस्तमिह पार्श्व ! नमाम्यहं त्वाम् ।
स्तुत्वा च वो वयमिति क्रमपङ्कजेषु
सद्भक्तिमेव सततं स्पृहयाम उच्चैः ॥ (वसन्ततिलका) ४६

इति हैमव्याकरणकतिपयोदाहरणमयः श्रीपार्श्वनाथस्तवश्चतुर्थः।

## ४५. ॥ श्रीमहावीरस्वामिस्तवः ॥

॥ द्वितीयाऽध्यायस्य तृतीयः पादः ॥

(अनुष्टुप्)

वीरं स्तौमि तिरस्कृत-मानं भक्तिपुरस्कृतः ।
तिरःकृताऽघपुंस्कान्तं, नमस्कृत्य पुरस्य तत् ॥ १

श्रेयस्कारि तपस्काम-महस्पात्रं शिरस्पदम् ।
तत्त्वां येन पयस्कल्पं, यशस्काम्यन्नरो नमेत् ॥ २

सुरोचिष्काऽधनुष्काम्य-न्नाथ ! निष्कोप ! दुष्कृत ! ।
नाविष्वृतचतुष्पुण्यं, द्विष्कै(:) त्रिष्पूजितो दिने ॥ ३

वपुःखर्वितहेमार्चि-ष्प्रासं चतुष्प्रियं प्रभो ! ।
भ्रातुष्पुत्रं सुपार्श्वस्य, कस्को न त्वां नुनूषति ॥ ४

आयुःष्टोमविदो निष्णो, हवींषीव लिलिक्षति ।
वाक्यानुत्कः प्रतिष्णात !, प्रतिस्नातेद्धगीर्षु ते ॥ ५

मातुःष्वसृपितृष्वस्रो-भवान्नासिष्ट विष्टरे ।
गविष्ठिर इवाग्निष्टु-दग्निष्टोमाय पुंस्विन ! ॥ ६

श्रीषेणार्च्याभिनिष्ठान - वृत्ताङ्गुष्ठनखस्थितः ।
गोष्ठे रोहिणिषेणाऽर्च्यः, कुष्ठले परमेष्ठधीः ॥ ७

अदुःषेधोषितप्रष्ठ !, त्वं सिषेवयिषुर्धृतिम् ।
अभीरुष्ठान ! निष्टप्त - रै सुषन्धिवपुष्टमः ॥ ८

त्वां सिसाहयिषुं कष्टं, सिषञ्जयिषुमार्जवम् ।
सुसूर्षुः कर्म तुष्टूषुरभिष्टुत्यं न्यघादघम् ॥ ९

मोहोऽभ्यषेण यत्त्वां ना-ऽभिषिषेणयिषुर्जगत् ।
भाऽधिष्ठितं निषिद्धांहो-ऽभिषिक्तं निषिषेध भीः ॥ १०

बुद्ध्या योऽभ्यषजद् बाल्ये-ऽभ्यषिञ्चन् यं च वासवाः ।
वितष्टम्भ स विष्टब्ध-निस्तब्धारिर्जिनो भयम् ॥ ११

सावष्टम्भा अवाष्टभ्नन्, धर्मोपष्टम्भकं सुराः ।
यं सदा व्यष्वणद् योऽन्न-मवाषिष्वणदक्षति ॥ १२

यः साम्ये न्यषदन् मोक्षे, निषसाद् विषादहृत् ।
शं न्यषेवत लक्ष्म्या सा-भिष्टङ्गं परिषष्वजे ॥ १३

विषयाऽनिषितो यस्तं, विषिषेवे गुणैर्दिशः ।
स लि(नि)षीव्यल्(त्) श्रिया
नार्त्ति, विषहेत परिष्कृतः ॥ (वि.) १४

व्यष्टैद् यस्त्वां विसोढार्त्ते, न्यस्तौद् गान्ते न्यषीसहन् ।
नान्यं संन्यषहिष्टाऽशं पर्यष्वजत स श्रिया ॥ १५

विष्यन्दिमदनिष्यन्दे, भविष्कन्तांशु विस्फुरन् ।
परिस्कन्ततमो नन्द, निष्फुलद् विस्फुरद् गुणः ॥ १६

नत्वा निःषमसुस्वप्न–विषूते विषमाऽरिजित् ।
त्वां सुषुपेतकल्याणे, नरैः प्रादुःषदिन्दिरैः ॥ १७

सेसिच्यते नतिं यस्ते, संवरे सोऽभिसोष्यति ।
शं विष्यात् सुपिस्स्येत, शिवे तेनाऽभिसेधिना ॥ १८

नृणां निस्तारणं पुष्णन्, दर्शनार्जववद्र्धन ! ।
व्रणानां क्षालनं कुर्वन्, द्रुणसाऽर्च्योऽस्य दुर्ण्णसः ॥ १९

प्रवणे गिरिनद्यन्त–र्वणे शिग्रुवणे स्थितः ।
क्षीरपाणमाषवन–सुरापाणाग्रणीनतः ॥ २०

त्वं स त्रिहायणाश्वेक्षु–वाहणोर्वीशवन्दितः ।
अपराह्णान्तचारित्र–भूरिभावेन सेव्यसे ॥ २१

प्रपक्वानि शुभानीच्छन्, दोषहाणि प्रयाणिराम् ।
प्रणमन् वृक्षकामेण, त्वत्पदान्यस्तुदुर्नयः ॥ २२

प्रनष्टमर्मवा[क्]पाणि, वाक्पाण्यन्तर्ण्णयामि ते ।
शरद्योत्तोष्णदीर्घाह्न्या–महं सद्धर्मभाविनः ॥ २३

प्रहिणोषि शिवे भव्यान्, प्रमीणासि भयं जगत् ।
प्रणिमाय प्रणिदाया - ऽप्रणश्यत् प्रणिपातिनाम् ॥ २४

प्रणिगद्याऽप्रणिदेह्य, तत्त्वं प्रनिकरोषि शम् ।
प्रणिपच्य तमोऽसीमा, प्रणिस्यत् प्रणिहंस्ययम् ॥ २५

यः स्थावरः प्राणिणिषेद्, योऽङ्गी पर्यणिति त्रसः ।
प्राण्पर्यानिनयिष्येत, स त्वया न प्रहण्यते ॥ २६

प्रहण्मोऽघं प्रहन्मोऽर्त्तिं, त्वां प्रहीण ! प्रनिन्दनम् ।
नत्वा प्रमङ्गनं पुण्य-प्रङ्ङ्णैक ! प्रमेहणम् ॥ २७

शिवप्रयाप्यमाणाय, निर्विण्णाङ्गी प्रपावनम् ।
प्रप्यानः पुण्यप्रख्यान ! , प्रभानेक ! प्रकामन ! ॥ २८

देशेऽन्तरयने सर्पि-ष्पानेऽन्तर्हण्यते रुचिः ।
त्वया मुत्प्रावनद्धेन्द्र-प्रणतास्तप्रवेपना ॥ २९

तेऽघं प्रघ्नन्ति लोभं च, प्रभो ! क्षुभ्नन्ति तद्यशः ।
नरीनर्त्यभितो नम्रा, ये भवन्ति भवद्गुणान् ॥ ३०

सहसे ष्ठीवनष्ठ्यानं, क्लृप्तसङ्कल्पितोऽङ्गिनाम् ।
कृपणाः सत्कृपीटत्वं, पलायन्ते स्म शत्रवः ॥ ३१

जगन्निजेगिल्यत आप्तयस्तं, मोहं लसद्दोः परिघो गिलंस्त्वम् ।
जवोष्ठपर्यङ्कजितर्फिलर्षे, पल्यङ्कनूतः पलियोगजीयाः ॥ ३२

(उपजाति)

इति हैमव्याकरणकतिपयोदाहरणमयः श्रीमहावीरस्तवः पञ्चमः।

# ४६. ॥ श्रीवीरजिनस्तवः ॥

॥ द्वितीयाऽध्यायस्य चतुर्थः पादः ॥

(अनुष्टुप्)

यस्याब्धिदुहितुर्दात्री, भेहिन् ! मुत्कारिणी च वाक् ।
रक्षन्ती विदुषां वीरं, तं प्राचीशार्चितं स्तुवे ॥ १

द्विपद्यादिवरायास्ते, गिरो धूताघधीवरी ।
भावरीष्ट स्मरा वाचा, प्रजासीत्तत्त्वदृश्वरी ॥ २

कुण्डोध्नी पञ्चहायन्य–शिश्वी न स्याद् यथेश ! गौः ।
तथा शर्मानमन् मूर्ध्नी, सुराज्ञी जनता त्वयि ॥ ३

भारत्याश्रव्यसीम्ना ते, प्रीताजादिसुपर्वया ।
श्रुतया गुणगौर्याकै–र्नास्यन्ते त्रिपदा ऋचः ॥ ४

कुमारादिप्रिये रात्नीं, त्रयीं पर्षदि जल्पति ।
त्रिलोकीशेन ! रिक्तोर्व्वी, त्रिकाण्डी द्विपुरुष्यपि ॥ ५

नागीः कालीस्तरी गोणीः, प्रोज्झ्याश्वाः केवलीयुतम् ।
नीलीस्त्रां(स्तां) रोहिणीशास्य, समान्या स्तुवते नृपाः ॥ ६

सत्कटी कबरीयुक्ता, यं कामुक्याऽपि नाक्षिपन् ।
शोण्यो घुसृणधुल्यात्र, तत्र ध्यानावनौ गतिः ॥ ७

शक्ती कुपद्धती हानि–मुक्तं शक्तिं गुरुं श्रितम् ।
पट्वीं त्वां रोहिणी श्येनी, रुचा शक्ती सुराल्पनौत् (?) ॥ ८

सुकेश्यो भासुरक्रोडाः, कम्बुकण्ठ्यः कृशोदराः ।
सुमुख्यः स्वङ्ग्य इद्धोष्ठ्यः पलिक्नीव त्वयोज्झिताः ॥ ९

दीर्घपुच्छया मणिपुच्छया, व्यन्तर्या क्षुभित ! प्रभो ! ।
तव कीर्त्त्या गुणक्रीत्या, द्योरज्योत्स्ना विलिप्त्यभूत् ॥ १०

भालदीप्ती शालिजग्धी, देशपत्नी महापतिः ।
असपत्नी सुपत्नी स्यात्, त्वया दन्तमिता प्रजा ॥ ११

अन्तर्वत्नीं जहौ पाणि-गृहीतीं कुक्कुटीमिव ।
क्षत्रियां मुद्गपर्णीं च, शङ्खपुष्पीं तव स्मरन् ॥ १२

वासीफली दर्भमूली, प्रष्ठी वृषाकपाप्यपि ।
मनावी स्यान्न शर्वाणी- न्द्राणी त्वां नमतो मुदे ॥ १३

त्वां मातुलान्युपाध्यायी, सूर्याणी निर्ममोऽनमत् ।
तमोहिमान्यर्कभवाऽ-रण्यानीं लङ्घते जनः ॥ १३

आवट्या क्षत्रियाण्यार्या, लौहित्यायन्यपासन ! ।
ध्यानं गार्ग्यायणी दाक्षी, कौरवी(कौरव्या)यण्यधीशते ॥ १५

मद्रबाहूः कदूलाकृः(?) कद्रू रज्जूवदुज्झिता ।
करभोरूः, कुरुः सुरू-र्नारी पङ्गूरिव त्वया ॥ १६

बालाक्याहृतकारीष-गन्ध्या नौपगवीव ते ।
क्रौड्या भोज्या च पौणिक्या-ऽऽहिच्छत्री युवतिर्मनः ॥ १७

देवयज्ञ्या शौचिवृक्ष्योः, सौगन्धीपतिरीशता ।
सौगन्धीबन्धूरीत्वत्वा(?), मौद्गन्धीमात आनमन् ॥ १८

मा(म)नुषीषु तथा तेऽम्बा-मुख्या मत्सी चलाक्षिजित् ।
सौरीप्रभासु भा यद्व-दहः पौषं दिनेषु वा ॥ १९

न गार्गकमिव स्वामिन्, गार्गीयति ततं त्वयि ।
अष्टरामहयं राज–न्यकं बैल्वकवैणुकम् ॥ २०

निःशस्त्रिरतिरम्भोरु–र्भावरीनुष्णगु प्रभो ! ।
सक्तयसि श्रियेशोऽर्द्ध–पिप्पलीवदखण्डयन् ॥ २१

धीर्न स्थिरीकृताऽधिस्त्रि, भीरुलक्ष्मिसुता स क(ः) ।
त्वया रेवतिमित्रः श्री गङ्गाव(म)ह ! सुरीनत ! ॥ २२

नाजत्वं रोहिणित्वं सो–ऽश्नुते त्वां गोणिशालिना ।
भ्रुकुंशा भ्रकुटी भीमो, मालभारी यशोमहेत् ॥ २३

लक्ष्मिका वधुका प्रीत्यै, पट्विका खट्विका न ते ।
सुवधूकाः सलक्ष्मीकाः, सुराः सुरमका नमन् ॥ २४

त्वद्गीः सुधा पीकां नौती[ति], द्विकां शुद्धान्नजीवकाम् ।
धीस्वकां मुनिमालाकां, सदयाऽस्विकां [ज्ञकां] ज्ञिकाम् ॥२५

भाषा स्यान्नित्येका (यका) हन्त्ये–षिका ते दुर्गती द्वके ।
मामिका वर्त्तिका श्येनी, रुषावल्ल्यसिपुत्रिका ॥ २६

गीर्मामिका सुनयिका ध्रुवका सका ति,
वृन्दारिकां भवरिपुक्षिपकां गुणालिम् ।
श्रीवीर ! ससतियका तव तारकेश !,
रुग्वर्णकां जयति सज्जनतारिका श्रीः ॥(वसन्ततिलका) २७

इति हैमव्याकरणकतिपयोदाहरणमयः श्रीवीरस्तवः षष्ठः ॥

## ४७. ॥ श्रीवीरजिनस्तवः ॥

॥ तृतीयाऽध्यायस्य प्रथमः पादः ॥

(अनुष्टुप्)

स्तोष्ये सुरासुरैः सेव्यं, परमेशं समासतः ।
जितमोहं महावीरं, त्रिलोकीहतमन्वहम् ॥ १

तं साम्यसुस्थितं वीरं, प्रणतोऽभिष्टुवेऽभवत् ।
विंशतेरुपसर्गाणां, योगो यद्देहधातुभिः ॥ २

ऊरीकृत्यादरं चित्तं, स्थिरीकृत्यावगत्य ये ।
सत्कारार्हं नमन्ति त्वां, क्ष्मामलङ्कुर्युरीशते ॥ ३

त्वदि्गरं ये मनोहत्य, पुरस्कृत्य मुदं पपुः ।
ते तिरस्कृत्य रागादीन्, पाणौकुर्वन्ति निर्वृतिम् ॥ ४

द्विनवान् ब्रह्मणो भेदा-नदिशोऽदूरषोडशान् ।
संयमस्याऽर्द्धविंशानि, मोहस्थानान्यहन् प्रभो ! ॥ ५

त्वमासन्नदशा ब्रह्म- गुप्तिरुपदशानिव ।
तत्त्वान्यवोच इद्धाङ्ग(:), सिंहमध्य स केवलः ॥ ६

दण्डादण्डि न कुर्युस्ते, तर्जनं वा कचाकचि ।
यान्ति पारेभवं मध्ये, चित्तं ये त्वद्गिरं दधुः ॥ ७

यावद् भव्यं पर्यभव्यं, तवेशा योजनं गिरा ।
अभ्यशोकं स्थितस्याधि-रत्नसालं सुधर्मधीः ॥ ८

पुष्पन् सब्रह्म साधूना-मुपयुष्मद् यथाविधि ।
तपः सोत्सर्गमातन्वन्, प्रत्यहं गौतमोऽवसन् ॥ ९

कुतीर्थिनस्त्वया साक्षात्, कृतमर्थं सुनिश्चितम् ।
अत्यदोषं रुषा रक्ता, न भेजुर्दुर्मतिश्रिताः ॥ १०

प्रमुग्धे ह्यतिमर्यादे, पर्यध्ययन उत्क्रमे ।
गोशाले निर्दयेऽनार्येऽनुभूतस्ते न मत्सरः ॥ ११

मध्याह्नेऽप्यातपः सेहे, पूर्वकायाऽधराङ्ग्योः ।
त्वयाऽर्द्धोक्तमपि त्यक्त्वा-ऽग्रहस्तस्पृष्टजानुना ॥ १२

क्षणजातः स्वयम्बुद्धा-ऽकम्पयः स्वर्गिरिं [तदा] ।
व्रतश्रितो द्व्यहाभुक्तः, क्षणं त्वं प्राप्तचेतनान् (त्) ॥ १३

ईषत्ताम्रान् रुषा दुःख-गता मंदपटून् स्थितान् ।
द्विरर्द्धचतसृष्ववी-र्योनानृभूषु नारकान् ॥ (यु.) १४

सैकान्त्रिंशती षष्ठी-शते अप्यन्यदुष्करे ।
त्वत्कृते भूहिताऽभूतां, शिवार्ये भवतारकः ॥ १५

परःशतायतं तेऽत्र, त्वन्मतावगता जनाः ।
सत्पूजका विजेतारो, मोहस्याऽघस्य भेदकाः ॥ १६

चतुर्विंशेन सार्वाणां, त्वयाऽरीणाहृति कृता ।
तृप्तार्थस्य सतां साक्षात्, परमार्थस्य तत्त्वता ॥ १७

त्वां ज्ञातं योगिनामिष्टं, दानशौण्डं नयोऽभजत् ।
मर्त्यसिंहं मतिसूत्र-गता भस्मनिहुत्यभूत् ॥ १८

न वेशो जात्यहेमाङ्ग, एकदेवस्त्वमत्यजः ।
दृष्टनष्टां पुराणौक-जरत्तृणमिव श्रियम् ॥ १९

द्वैमातुर ! त्रिलोक्यावि ! त्वयाधिकदयाधन ! ।
नृंसिहेन हतो मोहो-ऽरिव्याघ्रः पूर्वसार्ववत् ॥ २०

नासमानगुणान् श्रेणि-कृतांस्ते चरमासकः ।
हताहतेन्द्रियो वक्ति, सद्भावोत्तमबुद्धिभाक् ॥ २१

पुन्नाङ्गैस्त्वं श्रितो देव-वृन्दारक ! महामुने ! ।
सर्पिःकतिपयाक्ताग्नि-स्तोकवर्धिष्णुरोषभित् ॥ २२

कठश्रोत्रियकालापा-ध्यायकाद्यानये नमन् ।
जडामुनिप्रकाण्डं त्वां, तज्जनिर्गोवशा फला ॥ २३

नासीस्त्वं युवखलति - र्न वा युवपलसभूः (युवपलितभूः) ।
स्वामिन् ! युववलिनोऽन्य - पुंवद् युवजरन्न च ॥ २४

कुमारश्रमणा तुल्य-विनीताखिल साधुषु ।
वन्दनाजनि ते सर्व-श्वेतकीर्त्तिः प्रवर्त्तिनी ॥ २५

रागद्वेषौ त्वया ध्वस्तौ, देवासुरनरास्ततः ।
दधत वाक्त्वचं स्निग्ध-मधीश ! त्वामुपासत ॥ २६

अक्षा मुदे यथा नाथ !, क्रीडानस्त्रिफलार्थिनाम् ।
त्वद्देहागमसिद्धीनां, तथाङ्गानि सतामिह ॥ २७

गृहवासे मुदं पित्रो-र्व्रते ब्राह्मणयोर्व्यधाः ।
प्रापो वेत्ति जनो माता-पितरौ श्वशुरौ समौ ॥ २८

गा अश्ववडवौ प्रोज्झ्य, समोऽभूः सुखदुःखयोः ।
लाभालाभे खरेभे च, रसालामलके प्रभो ! ॥ २९

अश्वेभं तद्गृहे गर्जे, भेरीशङ्खस्य चारवैः ।
स बोध्यते शुभं तस्या, हस्तां हित्वा श्रयेत यः ॥ ३०

कुशकाशं भृशं यत्र, जज्ञे प्लक्षधवं वने ।
ऋश्यैणं हंसचक्रं च, ध्यानं तत्राऽपि तेऽधिकम् ॥ ३१

असाहि सङ्गमोच्छाहि–नकुलस्य व्यथा त्वया ।
कौशाम्बी भद्रिले स्थायि, मोदकापूपमुज्झता ॥ ३२

त्वयासि मदकर्मोप–वनं सर्वमहोत्सव ! ।
कीर्त्यास्ते दधिपयसी, राजदन्तास्तमौक्तिक ! ॥ ३३

वर्षजातजडारोषा–स्युद्यता आहिताग्नयः ।
मुधा त्वां जिन ! हित्वेन्दु–मौलिं शूलकरं श्रिताः ॥ ३४

क्षमाप्रियं प्रियश्रेयान्, ना त्वां धर्मार्थदं श्रयेत् ।
श्रद्धाधीयुक् शिवस्वर्ग–हेतुं सद्मसंयमम् ॥ ३५

शीतं त्वयाऽसाहि सहस्य माययोः, स्थितं रवौ पुष्यपुनर्वसू गते।
त्वां चेति यो द्वादशमासिकं स्तुते,
वीरप्रभो ! द्वित्रभवैः स सिध्यति ॥ (उपजाति) ३६

इति हैमव्याकरणकतिपयोदाहरणमयः श्रीवीरस्तवः समाप्तः॥

## ४८. ॥ श्रीवीरजिनस्तवः ॥

॥ तृतीयाऽध्यायस्य द्वितीयः पादः ॥

(अनुष्टुप्)

श्रीवीरं स्तौमि तं शक्ति–क्षमे उच्छिद्य मत्सरम् ।
परस्पराश्रिते ये श्राक्, द्योतिके इतरेतराम् ॥ १

यथा प्रीणात्युपाम्भोजं, प्राप्तानुपवनादलीन् ।
मोदस्तेऽनुपदद्वन्द्वं, तथाधिक्षिति देहिनाम् ॥ २

त्वया विनोपलोकेना–जल्पताग्रेजने पुरा ।
इच्छां सुमगधं हित्वा, बद्दशोऽध्यटवि स्थितम् ॥ ३

त्वां स्वामीयति रम्याङ्गं, यस्तस्मिन् स्यान्ननु स्मरः ।
स्त्रियंमन्यो विशेषं सो-ऽदर्शय ओजसाकृतम् ॥ ४

तपसाकृतं सद्बोध-त्वामाराध्य नरो भवेत् ।
जनुषान्धोऽपि सद्दृष्टि-स्तमसाकृतं दोषजित् ॥ ५

प्रतिरूपात्मनातुर्या-ऽध्यायः साध्वात्मनेपदम् ।
प्राक् परस्मैपदमथ, लक्षणे त्वन्यथाऽरमथाः ॥ ६

स्तम्बेरमगतेऽरण्ये - तिला मध्येगुरुश्रियम् ।
कण्ठेकालयशोमुञ्च-स्त्वं पूर्वाह्णेतनार्कमः ॥ ७

कुशेशयकरास्यान्ते-वासीन्द्रो गौतमः सदा ।
भेजेऽमनसिजस्तेंऽह्री, भृङ्गः सरसिजं यथा ॥ ८

निःपश्यतोहरः प्राप, मनोजदिविजार्चित ! ।
वाचोयुक्तिरदेवानां- प्रियस्यापि न ते स्तुतौ ॥ ९

मातापितृहितो वाच-स्पतिवास्तोष्पतिस्तुतः ।
सूर्याचन्द्रमसैर्द्यावा-भूमी व्याप गुणैर्भवान् ॥ १०

कीर्त्तिर्दिवस्पृथिव्यौ चा-दृश्यावस्करतेऽश्नुते ।
दर्शनीयतनोः शेता-यितेश ! पटयेन् मुदम् ॥ ११

कल्याणीभक्तयो ये स्तो, यशोदाभार्य ! तेऽस्मरन् ।
सद्बुद्धिः पटुजातीया, तेषां वाक्पटुताद्भुता ॥ १२

न जह्रुस्ते मनोराज-द्रूपाः सर्वसुराङ्गनाः ।
हंसी व्रजत्तरा विद्वत् - कल्पाः सोभाग्यसत्तमाः ॥ १३

जल्पन्मता चलच्चेली, भाद्गोत्रा विदुषिब्रुवा ।
स्त्री पश्यन्तीहतापि स्यात्, त्वदुक्ता विदुषां मुदे ॥ १४

महाविशिष्टमाहात्म्य !, तस्य पट्वितरा मतिः ।
महाजातीय ! वाग् येन, महेश ! त्वं हृदि स्मृतः ॥ १५

त्वां नत्वा महतीभक्ति-र्महद्भूतमहं नरः ।
न महत्तरधीः कुर्यान्, मुष्टामुष्टि शराशरि ॥ १६

भिनत्त्यष्टागवमनोऽ-ष्टापदः कोटरावणे ।
यथा तथा स्मरो विश्वा-मित्रार्दीस्त्वमतोज्झितान् ॥ १७

दन्तावलक्षमशरा-वत्याद्यानी वृतोऽपुना ।
नीत्तमुन्निष्प्रतीकारो, मर्माविद्धि हरन् विभो ! ॥ १८

निःषोडशकषाय ! त्वत्त्रिपद्या गौतमादयः ।
व्यधुरेकादशाङ्गानि, षोढा षड्वा तपः पराः ॥ १९

द्व्यशीतिः प्रभृती- पापा, दोषानष्टादशाक्षिपः ।
त्रयोदश द्वादश वा-ऽयोगान्त्यसमये जिनाः ॥ २०

द्वाचत्वारिंशतं नाम - भिदोऽर्हंस्त्रिशतं जगौ ।
तथा त्रिनवतिं जित्वो -पसर्गान् द्विदशान्निशि ॥ २१

भवत्पदातितां भूरि-हृल्लेखो हृद्य ! हार्दधीः ।
न सत्पद्धतिभागिच्छे-न्नस्तोऽस्ततिलपुष्पकः ॥ २२

नस्यश्वासवपुर्गन्धो-दपेषं पिष्टदर्पक ! ।
केशानुत्पाट्य शीर्षण्यान्, प्राव्राजीः पञ्चमुष्टिना ॥ २३

त्वमुदध्यदविन्द्वाभ (दध्यरविन्दाभ)-गुणो मेरौ जनुः क्षणे ।
क्षीरोदाद्यम्भ आनीयो-दकुम्भैः स्नपितः सुरैः ॥ २४

व्युदगाहाश्वले शब्द-पूर्वोत्तरपदे इव ।
कामाद्यास्त्वद्गिराऽजान-न्नैहिकामुष्मिके सुखे ॥ २५

धन्यम्मन्यः समीपे ते, भवाब्धौ द्वीपमाप्यना ।
धर्मं रुजागदङ्कारं, सत्यङ्कारं शिवाप्तये ॥ २६

दिवामन्या निशा पापं, त्वयि गच्छत्यभूत् सुरैः ।
अग्निभिन्द्यांशुभिर्लोकं- पृणमध्यन्दिनार्कभ ! ॥ २७

अन्यदर्थादनानङ्ग–तिमिङ्गिलवधेऽभवः ।
भद्रङ्करणं जातं त्वं, मोहरात्रिञ्चरा हतः ॥ २८

तिर्यञ्चोऽपि सुधासध्यक्, सम्यक् तेऽपुर्वचोऽसमम् ।
त्वां विष्वद्र्यग्गुणं वाऽऽप्य, कोऽन्यदीयं मतं श्रयेत् ॥ २९

नगधीराङ्गिकल्पाग !, पद्मरागनखानघ ! ।
त्वां कापथहरं प्राप्य, कद्वदो न कदर्यधीः ॥ ३०

न सो कापुरुषोऽकाच्छ–बुद्धिः कोष्णमनाः क्रुधा ।
कवोष्णगीश्च तेऽवश्य–कार्यदेश(शे)न यः स्मरेत् ॥ ३१

सततं हन्तुकामोऽघं, यस्त्वां श्रीसहितं श्रयेत् ।
मुक्तिगन्तुमनाः साम्य–समना(ः) सन्ततं स ना ॥ ३२

सगुणं सहकारुण्यं, सतां सब्रह्म कारणम् ।
नत्वा सब्रह्मचारी त्वां, सधर्मा च महात्मनाम् ॥ ३३

वीरं तमोऽर्कसदृशं विनयासदृक्षो –
ऽनन्यादृशातिशयशस्तमिति स्तुते यः ।
द्यौः कीदृगस्य पिहितार्त्तिरनीदृशश्रीः,
सोऽतादृशं शिवमवाप्य जगद्वतंसः ॥ (वसन्ततिलका) ३४

इति हैमव्याकरणकतिपयोदाहरणमयः श्रीवीरस्तवोष्टमः ।

# ४९. ॥ श्रीसर्वजिनस्तवः ॥

॥ तृतीयाऽध्यायस्य तृतीयः पादः ॥

(उपजाति)

स्याद्वादरावी गुणवृद्धिकारी, श्रीनायको यः प्रणिधीयतेऽत्र ।
दत्ताभयः सद्भिरिमं जिनं नौ-त्सुकायत स्तोतुमुपासरत्कः ॥१

अष्टादशब्रह्मणि स द्विभेदे, भवान् भिदश्चित्तकृतादियोगात् ।
विभक्तिषु व्याकृत वर्त्तमाना- दिकासु विश्वेश ! दशस्वपीव ॥२

सौख्यं क्रियेताऽसि शिवे त्वयाऽऽर्य !,
जितोऽसुदानो दुरसश्च कामः ।
सत्पर्वमानाय उपासत त्वां, तेऽसंशयानां न्यविशन्त कृत्ये ॥३

व्यक्रेष्ट काचा अति अग्र्यरत्नं, निरस्यतेऽभ्यूहति नात्मपथ्यम् ।
व्यजेष्ट मोहं न शमे न्ययुङ्क्त, यः स्वं न नत्या तव संक्ष्णुते स्म ॥४

वृषो यथाऽपस्किरते रजस्त्वं, तथाम्बुजैः सञ्चरमे कृपायाम् ।
संक्रीडसे तेऽशपतोऽवनन्ता, भुङ्क्ते सुखं नानुहरेत साधोः ॥५

त्वमीश ! तत्त्वे नयसे व्यनेष्ठा-स्तमोऽमृताऽघं तव शीयते स्म ।
म्रियेत मोहो नखभूरिभासा, भूर्लोहितायेत महोऽद्युतच्च ॥ ६

त्वां वर्त्स्यतीहाऽस्य विवृत्सतीश !, धर्मे रवावाक्रममाण उच्चैः।
क्रमेत ते प्राक्रमत स्तुतिं य, आदत्त नाऽऽपृच्छत सत्पथं च ॥७

आह्वास्त मोहं शमुपायताऽसौ, यस्त्वामुपातिष्ठत शिष्टमार्गे ।
उत्तिष्ठतेऽवास्थित कर्म जिज्ञा-सते स्म सत्यं जिन ! सङ्गिरेत ॥८

शुश्रूषते नाथ ! दिदृक्षते यः, सुस्मूर्षते त्वां च विवन्दिषेत ।
शिक्षेत धर्मं स विवेकमीहा-ञ्चक्रे स्मरान्नो बिभयाञ्चकार ॥९

तमोऽधिचक्रे शमुपस्कृतोच्चै-र्भवान् गुणौघेऽवदतोपदेशे ।
संप्रावदन्तेश ! चतुर्मुखानि, तव स्मरान्ना समगंस्त सिद्ध्या ॥१०

संपृच्छते संशृणुते स्म तत्त्वे, तवाङ्किते यः समवित्त सोऽत्र ।
विष्वक् तवाऽऽयच्छत भाविते ये,
मां नामयस्व स्मरयानिशं त्वम् ॥ ११

त्वं वञ्चयेथा जिन ! भीषयेथा, मोहं सदा भापयसे गुणैश्च ।
विस्मापयेथाः स्मर भापनाऽरी, नायासयेथाः परिमोहयेथाः॥१२

जाने तुदेथा हरसे च राग-मुद्यच्छसे ब्रह्मणि वेत्सि विश्वम् ।
रुच्या रविं चानुकरोषि दीपं, प्रत्यक्षिपोऽहं परिमृष्यसीह ॥१३

शिवं प्रभो ! पर्यवहो व्यरंसीः, प्रमादतश्चोपरमस्यवद्यात् ।
गव्यांसयश्चेतयसे च भव्या-नबोधयः कारयसे स्म धर्मम् ॥१४

अकम्पयः क्रोधमयोधयोऽध्या-पयो भयं प्रावयसीह लोभम् ।
तमश्च मे द्रावय नाशयाऽघं, शं भोजय त्वं जनयाऽपवर्गम् ॥१५

॥ एकादशः पादः ॥

॥ तृतीयाऽध्यायस्य चतुर्थः पादः ॥

(उपजाति)

यस्त्वां पणायेत्तव गां पनायेद्, गोपायिता क्ष्मा च ऋतीयते तम्।
श्रीः कामयेतैष तितिक्षतेऽलं जुगुप्सते नो विचिकित्सतीह ॥१६

मीमांसते तत्त्वमिहाऽनसूयन्, दीदांसति त्वां भृशमीक्षते यः ।
वावन्द्यतेऽभीक्ष्णमसौ चकास्ति,
नारार्यते दुःखमशाश्यते शम् ॥ १७

जङ्गम्यते नेह स दन्दहीति, लोलुप्यतेऽघं न गृणाति निन्द्यम् ।
मुच्वेच्य ! शं भावयते च कष्टं,
यः साहयेत्ते कथयेद् गुणौघम् ॥ १८

चिकीर्षतस्तारयसीह भक्तिं, भव्यांस्तपःकाम्यत आर्जवीयन् ।
मणिं तृणीयन् भवने वनीयन्, पोतन् भवे नीरनिधीयमाने ॥१९

देशनासदसि ते पयायितौ - जायिते रजसि मुद् भृशायते ।
लोहितायति मणी महोभरै-रम्बरे पटपटायते ध्वजः ॥ २०

(रथोद्धता)

वैरायते कोऽपि न गौश्च रोम-न्थायेत कष्टायत उत्करो न ।
त्वद्देशनोर्व्यां न भयाज्जिनेश !,
बाष्पायते किन्तु सुखायतेऽङ्गी ॥ २१

त्वयीश ! सत्यापयता नमस्यां, न शब्दयेद्धस्तयते विरुद्धम् ।
लोभान्न सम्भाण्डयतेऽणयेच्वा-
ऽऽरम्भं सच्चित्तं व्रतयेत्तपस्येत् ॥ २२

शिवं दयामास भवांश्चकासा-ञ्चकार कायेन धिया समीधे ।
ईक्षाम्बभूवाऽमृतमर्त्तिमोषा-मास स्मरन्तो बिभयाञ्चकार ॥२३

त्वज्जिहयामास बिभाय मोहो, रागोऽपि नोर्जं बिभराम्बभूव ।
गुरुर्विदामास न ते विवेदो-शना बलं कोऽत्र विदाङ्करोतु ॥२५

ये त्वां नरोऽद्राक्षुरिहाऽतृपंस्ते-ऽस्प्राक्षुर्व्यमृक्षन् वृषमध्यरुक्षन्।
गिरोऽदधंस्तेऽचकमन्त ये च, तेऽशिश्रियन्नेतरऽपूपुजंस्त्वाम्॥२५

सतोऽशिषद्धर्ममवोचदारन्, मुक्तिं रणे योऽसितुमाह्वताऽरीन् ।
कीर्त्याऽलिपद्विश्वमसिक्त शर्मा-ऽगमन्मुदं सोऽपुषदद्युतच्च ॥२६

तमोऽभिदत्तेन जिनोऽजरन्न, शमऽश्वदिष्टं समपादि तस्य ।
धर्मस्ततोऽजन्युददीप्यबोधि,
जनोऽवधीर्ष्याशिव आसि तेन ॥ २७

अदर्शिषातां तव येन पादा-वश्रायिषातां जिन ! घानिताऽघम् ।
घानिष्यते तेन तमः शमश्च, ग्राहिष्यते कर्म विजायिता च ॥२८

त्वामर्चता धीरिन ! वारिषीष्ट, हारिष्यते कर्म च दर्शितेष्टम् ।
भीर्या(र्घा)निषीष्ट क्रियते च साम्यं,
दिव्यास्यते तस्य शिवं भवेच्च ॥ २९

त्रुट्येत्तमोऽस्य त्रसति स्मरोऽस्मात्, क्रामत्यघं नो स भवे भ्रमेन्न।
खिद्येत यो भ्रास्यत आर्जवात्ते,
धर्मे यसन्नीश ! गिरोऽभिलष्येत् ॥ ३०

रज्येन्मते यस्तव सोऽश्नुते शं, तक्ष्णोत्यघं सन्मतिमक्ष्णुयाच्च ।
स्तभ्नाति लोभं कुधियं धुनाति,
हिनस्ति मोहं तुदते मदं च ॥ ३१

पुषाण शं तस्य तनु श्रियं च, व्यभेदि मोहो मृदुगीरदोहि ।
क्षीयेत दुःखं तव सृज्यते गां,
योऽसर्जि तप्येत तपांसि भक्तिम् ॥ ३२

पालं द्रवोऽपक्षत भीररुद्ध, तवान्तिके तीर्थपते ! ऽहृतेति ।
पुष्पोत्करोऽकीर्ष्ट तमोऽन्वतप्त,
स्तोता जनोऽतप्त तपः शमाप ॥ ३३

॥ द्वादशः पादः ॥

इति हैमव्याकरणकतिपयोदाहरणमयः सर्वजिनस्तवो नवमः ।

# ५०. ॥ श्रीसर्वजिनस्तवः ॥

॥चतुर्थाऽध्यायस्य प्रथमः पादः ॥

(रथोद्धता)

यस्ततान सुकृतान्यशिश्रियत्, पथ्यजीगमदघं जिगीषति ।
साम्यमार्जिजिषदापिपत् परं, नाप्यसूयियिषति स्तुवे जिनम् ॥१

योऽचलाचलमलं ददाति शं, दाश्वदङ्गिमुदमङ्गचक्नसः ।
ज्ञीप्सुरीप्सितपदं न धीप्सति, ब्रह्म धिप्सति स मित्सतु क्रुधम्॥२

लिप्सते शमुरु यस्तवं तवा-रिप्सतां स नव रेधुरङ्गिनः ।
त्वां विनेमुरिन ! ये च भेजिरे, ते न जेरुरिह वेमुराश्रवम् ॥ ३

चेरिथ व्रतमयं च तेरिथ, भ्रेमिथेह न मदे न रेजिथ ।
ग्रेथिथाऽमलगुणान्न देभिथ, त्वं भयं शशरिथेश ! देहि शम् ॥४

दिग्यिरेऽङ्गिन इन ! प्रजिघ्यिरे, निर्वृत्तौ गिरमपीप्यदुत्तमाम् ।
शं चिकाय भुवनं जिघांसतो-
ऽरीन् जिगाय च भवान् जिगीषितान् ॥ ५

गुर्वियेष शमघं जहौ मद-द्रूनुवोष भुवि दिद्युते भवान् ।
तस्थिवानिन ! शिवे चकार गां, जागदत् पथमरीश्च बेभिदत् ॥६

सम्पनीपदति सम्पदश्चनी-कस्यतेऽस्य भयमीश ! यः क्रमौ ।
नंनमीति तव चञ्चुरत्तमा, बम्भजीति स च दन्दहीत्यघम् ॥ ७

संवरे स वरिवर्त्यघं चरी-कृत्य ते तप इयर्त्ति नेनिजन् ।
यो विवक्षति बिभर्त्ति ते गिरं, स्वं पिपावयिषते पिपर्त्ति च ॥८

क्ष्मां जिजावयिषसीह सिद्धये-ऽघं लिलावयिषसि प्रियं वचः ।
त्वं रिरावयिषसि त्वया च शि-श्रावयिष्यत इनागमं जनः ॥९

त्वं व्यलीभव इनाऽशुभानि सु-ष्वापयिष्यत इह त्वया शिवे ।
भुव्यजीहरदघं भवान् शमे-ऽतत्वरज्जनमजीगणत् समम् ॥१०

नैव सुष्वपिथ योगतः क्रमा, मादिथानशिष आनृधुर्गुणाः ।
त्वां नतस्य परिवीय गां तवो-
वाह यो न हि स विव्यथे स्मरात् ॥ ११

सत्यमूचुरिन ! ते य ईजिरे, त्वां प्रविद्धरुडसूषुपन्नघम् ।
जीनरुक् शम ! मुषन्ति भृष्टभी-
गृह्णते च भुवि सेसिमीत्यमुम् ॥ १२

त्वां हि वे- ति (?) बुधा अजूहवन्,
सत्यमार्जवमशूशवन् भवान् ।
शं जुहूषति शुशाव धीश्च शो-शूयते तव शुशावयिष्यते ॥ १३

स्फीतभाग्य ! दमपीन ! ते गुणाः,
पिप्यिरे भुवि कृपां चिकीर्षसि ।
शीतवाणिरभिशीनभीः प्रशान्, शान्तपृष्टवृष शं तितांससि ॥१४

द्यूतजीनजगदूतिर्नूमद-श्रूतिचूर्णगुणयूतितूर्मणा ।
प्रश्नपूर्त्तिकुशल ! त्वया तमो मूर्त्तिरासिजनजूर्त्ति तोर्मणा ॥१५

शोकमेघपवना(नौ)घपाककृद्, योग्यभोगविरसोऽस्तभोज्यधीः।
प्राज्ययाज्यपटुवाच्यसद्भुजा -
ऽन्युब्ज ! नाऽऽगसि जिनार्त्तिवीरुधि ॥ १६

॥ त्रयोदशः पादः ॥

॥ चतुर्थाऽध्यायस्य द्वितीयः पादः ॥

(रथोद्धता)

वर्ष्म विव्ययिथ हृदिगरौ व्ययं- स्नातविश्व ! भवतोऽदिदासत ।
स्फारभीरविलय प्रमाय शं, काम आमय इतो विलाय च ॥१७

स्फारयन् धनुरिषून्निचापयन्, भूभृतं मनसिजो विलीनयत् ।
रोपयन्नघमजापि देहिनाऽ-ध्यापितेन समयं त्वया जिन ! ॥१८

धूनयाऽघमरतिं विलापय, प्रीणयाग्र्यबलपालयेश ! माम् ।
मोह उल्बणबलेन शायये, छाययन् व्यययतीह नो यथा ॥१९

पाययामृततयं च शातया-ऽऽनन्दमर्पय विधापय क्षमाम् ।
स्फावय श्रियमघं घटंघटं, शर्म मे घटय धीरघाटि च ॥ २०

दुःखमाश्वऽजरिशं जनंजनं, हृत् त्वया दमितयामितं तमः ।
नाथ ! विज्ञपकवामिताऽरते, श्रीरजान्यशमि भीरचाहि न ॥२१

छद्मनाऽग्लपितशं स्नपं स्नपं, त्वां सुरा नमितमस्तका ययुः ।
ज्वालितक्षमजनुः क्षणे सित-च्छत्रयुक्तसमपीपदन् मुदम् ॥२२

नाशशासदवनीमबिभ्रजन्, किं भवान् कृतमलीलपत् प्रभो ! ।
पथ्यतिष्ठिपद् दूषयंस्तमो-ऽचीकृतद् वृषमजिघ्रिपज्जनैः ॥२३

मुद् बभूव भवभीरभाजि शं, जज्ञ इद्ध ! दशन ! त्वयाऽङ्गिनाम्।
सत्पदेऽघदहनास्पदाद्यत !, त्वं शिवे रत ! सजस्यरागिभिः ॥२४

जातसातधन ! तायते त्वया, मुद्विरत्य रजसो वितत्य शम् ।
तूर्णजावचिदघं च(चा) खायते ह्लन्नलूनमदकर्म ! तीर्ण्णवत्॥२५

भग्नरोष ! रुगदून ! पूनभीः !, स्त्यानपुण्य ! जिन ! नुन्नवित्तधीः।
क्षीण(ब)राग ! कृशमोह ! भिन्द्ध्यघं,
क्षाम काम ! हर कर्म शाधि माम् ॥ २६

एधि शं तनु मुदं गिरश्च ते, सन्तु कुर्युरनयं च भिन्दताम् ।
कुर्महे मनसि तन्म ईशता, येऽदि(द्वि)षुः शिवययुर्न ते व्यमान्॥२७

येऽविदुस्तव वचांस्यऽवारिषुः, संदधति मुदमीश ! शासति ।
ते चकासुरजक्षुस्तमो लुन-न्त्यद्भुतं ददति जाग्रतो वृषे ॥ २८

धत्त ईश ! हृदि यो भवद्गिरं, निर्मिमीत इह चाऽपुनीत सः ।
स्वं ततो हि बिभितो मदस्मरौ, विक्रमं च जहितो दरिद्रितः॥२९

मा विभो ! जहिहि मां जनन् पुनन्, येन जह्युररयो न भीः श्यति।
जायते च मम साम्यमिच्छतो, गच्छतः शमिह जानतः शमम्॥३०

ब्रह्म पश्य पथि तिष्ठ सद्वचो, धिन्वदाशृणु जिनागमं पिबन् ।
क्लाम मा मन शमृच्छ शाम्य भोः,
क्राम दाम्य युजि यच्छ सीदताम् ॥ ३१

त्वां नमामि जिन ! तं वितन्वते, यद्गुणाः प्रमदमत्यशेरत ।
क्ष्माप वेद विदतुर्विदुर्नयान्, वासवो गुरुकवी सुरा बहून् ॥३२

संविद्रते ये तव गां तयाहु-र्नेच्छेत् क्रुधीर्नाह दधौ भजेयम् ।
ये त्वां नुवेयुर्जिन ! रक्षतात्तान्,
यदि श्रयेत्तं द्युशिवे त्वरेताम् ॥ (उपजाति) ३३

॥ चतुर्दशः पादः ॥

इति हैमव्याकरणकतियोदाहरणमयः सर्वजिनस्तवो दशमः ।

# ५१. ॥ श्रीसर्वजिनसाधारणस्तवः ॥

॥ चतुर्थाऽध्यायस्य तृतीयः पादः ॥

(उपजाति)

सिद्धिं करोति स्म वृणोति वेत्ति, साम्येऽसरज्जागरितः शमे यः।
तत्त्वान्यदर्शत् प्रणुता जिनं तं, सञ्चस्करुः क्ष्मां नर ऐयरुः शम्॥१

तेरुर्भवं ते तव सस्मरुर्ये, सास्मर्यतेऽभूद्विरतो य इष्टम् ।
तेनाऽर्यते सन्नय चेच्यतेऽहं, स्मर्यासमऽर्यासमृतं सुवै च ॥ २

स्वं नेनिजानि त्वयि नाथ ! जुह्व-दयानि शं मे दुरितानि यन्तु ।
स्तुवन्ति ये त्वा कुटितार ईशा-
ऽधियन्ति भोगोद्विजिताऽवतांस्त्वम् ॥ ३

कीर्त्या दिशः प्रोर्ण्णुविता भवान् यै -
र्निन्ये मनः सस्वजिरे गुणैस्ते ।
भङ्क्त्वा मदं सत्तपसा कृशित्वा,
सदा मृषित्वा च शिरो लुचित्वा ॥ ४

नुतिं ग्रथित्वा तव गां लिखित्वा, चिचेतिषन्तः सुतरां मुदित्वा।
प्रद्योतिता येन च शोषितं यै-स्तेऽधर्षिताः स्युः पविता गुणैश्च॥५

प्रस्वेदितं ते न वपुर्मदं चो-षित्वा भृशं मर्षितवान् क्षुधित्वा ।
स्कन्त्वा समत्वं शठतां मृदित्वो -
षित्वा शमे तत्त्वमभा विदित्वा ॥ ६

तमो मुषित्वा विविदिष्यते यैः,
पृष्ट्वा जिघृक्ष्येत विभो ! वचस्ते ।

तेऽघं जिगीषन्ति शमं गृहीत्वा,
मोहं बिभित्सन्ति सुषुप्सितोऽहम् ॥ ७

भित्सीष्ट कष्टं स भवान् कृषीष्ट, सुखं सदा मे हृदि सङ्गसीष्ट ।
यः सर्वतोऽबुद्ध तमोऽहृतोऽह-मुपायतेष्टं व्यधितादित द्याम् ॥८

मार्ष्टा मदं दोषभरं न्यकार्षीः,
कर्माण्यभि(भै)त्सीः सुकृतान्यभाणीः।
अजागरीर्ध्यानकृतेऽशसीस्त्वं, तमांस्यवादीः शिवमग्रहीच्च ॥९

सद्वाद शं दायक ! द्वारकार्त्ते - र्ब्रह्मण्यजागारि जिन ! त्वयारम्।
अदायि मुद्धीरवधीतजन्ये-
नाऽजन्यरोषाऽशमि कामदायिन् ॥ १०

अगामि धीकामुक ! शं शमाढ्या-विश्रामयामोद्यमसाधुनाम ।
त्वया गिरं ते निनयेश ! नौमि, ब्रवीमि पापेमि तृणेह्मि (चैव)॥११

स्तवीमि तं त्वां जिन ! यस्य भाऽऽसी-
द्दीप्रा विलासीच्च जनो वचोऽपात् ।
अधात् सुरौघोऽतत हृद्यसाथाः,
शं यो रजोऽशाश्च भयान्यभित्थाः ॥ १२

तमोऽलविध्वं सदयोऽसि कर्मा-ऽभिनोऽचकाद्यस्तव गामलीढ।
न्यगूढ योगान्न हि सोऽदरिद्रीत्, सुचेतनः सङ्कथितामृताध्वन्॥१३

क्ष्मां तारयामास भवानवात्सीत्, मुक्तावजय्यं प्रशमय्य कर्म ।
अक्षय्यशर्मस्पृहयालुरंहः, प्रक्षीय तेऽयात् स्तनयित्नुनाद ! ॥१४

मोहो दिदीये त्वदगुस्तमांसि, ग्लेयादघं ये च गिरोऽदधस्ते ।
शिवं ययुस्ते ददिथे हितं मे,
स्थेया हृदि त्वं समतां च देयाः ॥ १५

जेगीयसे तत्त्वमलिव्रजस्ते, जेघ्रीयतेऽङ्गं जिन ! पीयते वाक् ।
सुरै रजोघातक ! घातहीन !, जेघ्नीयतेऽघं च जघान नन्ता ॥१६

तत्त्वान्यवोचस्त्वमपास्थ एन-स्त्वद्धीरनेशद् दिवि चैष शेते ।
शाशय्यते श्रेयसि येन ते वाक्, समुह्यते धीरुदियात् प्रसादात्॥१७

त्वं नूयसे रुग्भिरिनायसे च, चेचीयसे पुण्यमिहानसूयन् ।
जीयाः शुचीभूतचरित्रनेत्री-यसे च पित्रीभवसि त्रिलोक्याम्॥१८

चेक्रीयसे मोहवधं ह्रिया मे, दुःखं दयामाद्रियसे क्षमीयन् ।
त्वया धृतिः स्वीक्रियतेऽदधिस्यन्,
व्युदन्यचित्तेष्वरसाशनाय ॥ १९

॥ पञ्चदशः पादः ॥

## ॥ चतुर्थाध्यायस्य चतुर्थः पादः ॥

(उपजाति)

तत्त्वानि भव्येषु भवानवोचद्, भक्तिप्रवेये नृसमाजपूज्य ! ।
प्रत्ताऽङ्गिमुद्धर्मरथे प्रवेता-ऽऽचख्ये शिवं संसृतिमाख्यते सः॥२०

नीत्तेष्टवीत्तामृत आत्तसाम्य !, सुदत्तधर्माऽदितशं स्थितोऽसि ।
हित्वा ममत्वं विहितामृतश्री-श्छिताऽघजग्धक्रुधशुद्धघास ॥२१

ये त्वद्गुणानूयुरघं विदद्रु-र्मदं विशश्रुः पपरुः क्षमां ते ।
वध्या भयं निर्वृतिमध्यगास्त्वं, कर्माविधीश्चारु जिगांस्यते शम्॥२२

तवागमं योऽधिजिगांसतेऽधि-जगेऽन्यमध्यापिपदध्यगीष्ट ।
नार्हन् कुशास्त्रं भवहेतुमात्रा-ऽध्यजीगपच्चाभवदुत्तमोऽयम् ॥२३

आसन्नता ये त्वयि ते शमाय-न्नैच्छन् गुणान्नारिषुरापदं च ।
अवारिषुः शान्तिमशस्त्र हस्ते-हाऽऽस्से वरीतुं निगृहीतिमर्त्तेः॥२४

भवं तरीताऽवरिपीष्ट शंसो-ऽवरिष्ट यस्ते गिरमास्तरिष्ट ।
स्वं गोपिता साधुगुणैरधोता, तेनाजरित्वा स्मरिषीष्ट तत्रम् ॥२५

मनोदमित्वाऽञ्चितवान् पवित्वा,
यस्त्वां क्लिशित्वा क्षुधितोऽर्त्तिसोढा ।
शिश्रीषतेऽघं तितरीषतीह, शिवैषिता शं विवरीषते तम् ॥२६

भवे न पित्सेद् यियविष्यते स, श्रिया रिरिष्येत धिया च दोषान्।
हनिष्यतीर्ष्यां च हरिष्यते यः,
पिपृच्छिषेत् त्वाऽशिशिषेत मार्गम् ॥ २७

विष्वग्यशो नर्त्स्यति तस्य सोऽर्त्ति,
कर्त्तिष्यतीहाशु गमिष्यतीष्टम् ।
निवर्त्स्यति प्रक्रमितुं शिवेऽघात्,
कर्त्ता शमं धीवृत ! यः श्रितस्त्वाम् ॥ २८

दयायुतस्वान्तं नुनूषति त्वां, तितिक्षते यो निजुघुक्षतेऽङ्गम् ।
अभ्यर्णमोक्षो दृढकष्टदान्त !
सोऽत्रस्त ! गुप्तेन्द्रिय ! वान्तदोष ! ॥ २९

अमूर्त्त ! लम्भार्जव ! बाढशान्ता -
ऽघध्वान्त ! पूर्णेहित ! जप्त तत्वा (त्त्व?) ।
अरुष्ट हृष्टेश ! ददर्शिथ क्ष्मां, पपाथ शं भेजिथ वा चकर्थ ॥३०

दुःत्रोथ (दुद्रोथ) धामाऽऽरिथ शं नतास्त्वां,
शीर्षं च सञ्चस्करिमाऽदिवांसः ।
मुदं वृषं चिच्यिमहे गिरं ते-
ऽनंसिष्म भाग्यादवजग्मिवांस : । (उपजाति) ॥३१

य इह विविदिवांसस्तत्त्वमस्ताविषुस्त्वां,
स्वमिन ! ददृशिवांसस्ते जघन्वांस एनः ।
गिरमभिदधिवांसस्ते ध्यानतो नाऽस्वपीद् यः,
स्वपिति दिवि शमादत्सोऽवितुं चेशिषे तम् ॥(मालिनी) ३२

क्ष्मां संस्करोषि स्वमुपस्करोषि, वृत्तेन धीलम्भक ! शुम्भ नन्द।
मोहाऽप्रतिस्कीर्ण्णं विमुञ्चमानो -
ऽनारम्भ रन्धोरगविष्किरेश ! ॥ (उपजाति) ३३

लम्भं लम्भं त्वद्गिरः क्ष्मोपलम्भ्या,
श्रेयोलम्भ्याऽऽनन्दथुः सूपलम्भः ।
स त्वै स्त्रष्टा ते नमः सङ्क्नंष्टा,
द्रष्टा तत्त्वं मा भवाब्धौ न मङ्क्ता ॥ (शालिनी) ३४

त्रप्ता जनस्तीर्थकरं नमंस्त्वां, स्त्रप्ता शमं स्प्रष्टा कृषीष्ट मार्गम् ।
श्रीशोभमानं भवमीश ! तीर्त्वा -
ऽऽसीनः समाधौ किरतीह कर्म ॥ (उपजाति) ३५

यस्ते गुणान् कीर्त्तयतीति सिद्धिं, वुवूर्षतेऽसावशिषच्च मोहम् ।
न तेन शिष्येत जिन ! द्युकान्ता-
स्तं क्नोपयन्ति प्रथिताऽऽशिषोऽथ ॥ (उपजाति) ३६

॥ षोडशः पादः ॥

इति हैमव्याकरणकतिपयोदाहरणमयः सर्वजिनसाधारणस्तव एकादशः ।

यस्य लक्षणसूत्राणि, जिह्वाग्रे सन्ति जाग्रति ।
स्फुरद्रूपस्तदर्थश्च स्तवानेतान् स पश्यतु ॥ १

कृतिरियं वाचनाचार्यशीलशेखरगणिपादानाम् भद्रमस्तु श्रीसङ्घायेति ॥

पू.आ.श्री जिनरत्नसूरिविरचितानि

# ॥ कमलबन्धमयश्रीपञ्चजिनस्तवनानि ॥

## ५२. (१) ॥ कमलबन्धमयश्रीआदिनाथस्तवनम् ॥

(सिलोगो)

जिणंदे पढमे लोए, नामेणं उसहे हिए ।
लोआणं लोअविक्खाए, जुगाण ईड्ढीकारए ॥ १

नंदणे मरुदेवीए, वल्लहे नाभिभूइए ।
तिलुक्कमंगलीभूए, तिलुक्कसुरपाइए ॥ २

सुवण्णंबुरुहे पाए, धरंते गमणे णीए ।
नाणारयणनिम्माए, सीहासणम्मि संट्ठीए ॥ ३

सेअचामरसोहाए, सोहिओभयपासए ।
सीसम्मि निअ भत्तीए, देविंद - धय वेअए ॥ ४

पिऊसं समभासाए, भासउत्तमधम्मए ।
दुंदुहीनायजुत्तीए, घोसए जगरज्जए ॥ ५

असोअरुक्खवायाए, मिसिउ तणुकंतीए ।
भामंडलीकए तेए, सोहा लोअज्ज कारए ॥ ६

नाणापुप्फाण वुट्ठीए, भूमिअलम्मि सोहिए ।
देवदेवाउलीभूए, समोसरण रायए ॥ ७

अणंतदुक्खविण्णाएऽणंतदंसण-नाणए ।
तुमं मि सेविअं पाए, ठविज्ज करुणामए ॥ ८

कलसं

विजयदानगुरुपयपंकए, भमरएण रएण जिणं थुओ ।
कमलबंधमएण मए थुई, नयरदेवगिरिम्मि गिरंवई ॥ ९

(द्रुतविलम्बित)

## ५३. (२) ॥ कमलबन्धमयश्रीशान्तिनाथस्तवनम् ॥

(सिलोगो)

संतिनाहे महासीले, पत्तनिस्सेसमंगले ।
पत्तेऽणंतमहालीले, मुक्खे संपन्नकेवले ॥ १

दीप्पंतदीहिई भाले, महाभागे महाबले ।
परुवंतो दयामूले, मग्गे धम्मस्स निम्मले ॥ २

देवेहिं निक्कलाकेले, वंदिअक्कमजामले ।
वज्जे मोहमहासेले, अबीए पुहवीअले ॥ ३

चित्तं कय चमक्काले, देविंदाणं पि सकले ।
छक्खंडभूलमासाले, चक्कवट्टीनलेसले ॥ ४

चच्चेलिसधलाभाले, तिलोअपउमाउले ।
जाए जगत्तयाधाले, संतिनामे जिणेसले ॥ ५

ठवंते कयसोमाले, पाए कए सुकोमले ।
सुवण्णवण्ण संबोले, धीलत्तेणं सुलायले ॥ ६

निम्मए निरहंकाले, कालुण्णासमसायले ।
नीलरासि व्व गंभीले, धम्मरुक्के पओहले ॥ ७

मुक्खसुक्कावलीसाले, तेअसा अभलक्खले ।
सोमदिट्ठीइ मंधीले, लोइज्ज जगईसले ॥ ८

## ५४. ( ३ ) ॥ कमलबन्धमयश्रीनेमिनाथस्तवनम् ॥

(सिलोगो)

विस्सचिंतामणी नेमे, विस्सलोअसुरद्दुमे ।
विस्सलोआण विस्सामे, विस्साणंदकरागमे ॥ १

विस्सवाविजसुद्दामे, विस्साऽसमतणूरमे ।
अमोहमोहसंगामे, जयलच्छीवरंगमे ॥ २

सिवापुत्ते सिवारमे, सिवानहे समासमे ।
हेलाए हयदुक्कामे, मुत्तिसुंदरीसंगमे ॥ ३

चंदो इव कलासोमे, तेअसा जह अज्जमे ।
देविंदवंदिए वामे, जिणिंदाणं दुवीसमे ॥ ४

सम्मं गुणेहि निस्सीमे, वासुदेवच्चिअक्कमे ।
जोगीसरकयप्पेमे, लोइक्कपुरिसुत्तमे ॥ ५

अणुत्तरकयखेमे, खंतिए णुत्तरखमे ।
अणुत्तरपहाधामे, अणुत्तर परक्कमे ॥ ६

चच्चरज्ज-रमा-रामे भावंगीकयसंजमे ।
उच्छिन्नदव्वभावाऽऽमे, छिन्नकोहे अनिम्ममे ॥ ७

रिट्ठवण्णतणूधामे, हरिवंसाऽसमऽज्जमे ।
रिट्ठनेमि ! जिणिंदे मे, देउ सेवं जगुत्तमे ॥ ८

## ५५. ( ४ ) ॥ कमलबन्धमयश्रीपार्श्वनाथस्तवनम् ॥

(सिलोगो)

जगनाहे जिणे पासे, महासुक्खे महायसे ।
वामाकुच्छिसरोहंसे, दिन्न-व्विण सेअसे ॥ १

असेस-मंगलावासे, माणेभद्दमणंकुले ।
अस्ससेणे कुलागासे, दिवानाहे अनिम्मिसे ॥ २

सोहिज्जमाण सप्पासे, पासाहिट्ठीअकायसे ।
पूरिआसेसलोआसे, इच्छादाणेण निविसे ॥ ३

गयराए गयद्दोसे, सुक्खरुक्खम्मि पाउसे ।
कण्णामिअफुरज्झसे, रंजिअप्पाणि माणसे ॥ ४

सेवकीभूयभूमिसे, अतुल्लाउलसाहसे ।
किंकरीभूयसग्गीसे, पावई पावए कुसे ॥ ५

सव्वन्नू सव्वदंसीसे, अस्स लोअम्मि माणुसे ।
विहरिंतो पहाएसे, विग्घसंघायतामसे ॥ ६

तीवसमेअतित्थेसे, रुवेणे व असारिसे ।
जणाणं दिन्नआसासे, सेवारत्तमहायसे ॥ ७

वणवेरुलिआभासे, निच्चमुज्झिअ कालुसे ।
नागरायंकिए पासे, संसारा पाहि मं सुसे ॥ ८

इअ उसहजिणिंदे संतिनाहे अ नेमि,
जिणवरसिरिपासे, वद्धमाणे ति पंचा ।
विमलकमलबंधेनेव सेवारएणं,
इह अमरगिरिम्मि संथुआ दिंतु सिद्धिं ॥ (मालिनी) ९

# ५६. ॥ श्रीपञ्चजिनस्तोत्राणि ॥

## ( १ ) ॥ श्री आदिनाथस्तोत्रम् ॥

जय जयपईव ! कुंतलकलाव-
विलसंतबहुलकज्जलसहाव ! ।
कलहूयकंति ! मरुदेवि-नाभि-
निवतणय ! रिसहवसहंक ! सामि ! ॥ १

धण-मिहुण-तियस-नरनाह-देव-
निववयरजंघ-मिहुणे-स चेव ।
सोहम्म-विज्ज-अच्चुय-चक्कि-
सव्वट्ठसिद्धि-अवयरी(रि)अ इत्थि ॥ २

आसाढबहुल चवीउ चउत्थि,
कसिणट्ठमि जायउ मास चित्ति ।
इक्खागु भूमि नयरी विणीय,
धणु पंचसय तिहि तणु पणीय ॥ ३

चित्तट्ठमि गिन्हइ सामि दिक्ख,
चउ सहस समन्निय कसिण पक्खि ।
इग्यारसि बहुली फग्गुणस्स,
संपज्जइ केवलनाण तस्स ॥ ४

माह वदि तेरसि उज्जल-निय-
जसि पुव्वलक्ख चुलसीय-जू(जु)य ।
जय पढमजिणेसर ! सू(सु)अभरहेसर !,
करि पसाउ निम्मलचरी(रि)य ॥ ५

## ५७. ( २ ) ॥ श्रीशान्तिनाथस्तोत्रम् ॥

वीससेण–अइरादेविनंदण ! तणुहरण !
जय अपुव्वहरिणंक–अखंडियतणुकिरण ! ।
सिरिसिरिसेण–कुरुनर–सोहम्म–खयरनिव–
पाणय–सो अपराजी(जि)य– अच्चुयइंदभव ! ॥ १

विज्जाहिव–गेविज्ज–नरवइमेहरह–
सव्वट्ठ अवयन्नउ गयउर संतियह ।
भाद्रवए वदि–सातमि सामि चवण तुह
जिट्ठ–कसिण–तेरसि–निसि जायउ जम्ममहो(ह) ॥ २

जिट्ठ–चउद्दसि–बहुलीय संजमसिरि वरीय
पोस–सुदि–नउमि–दिणि केवलवरि वरीय ।
जिट्ठ–कसिण–तेरसिनिसि कंचणकंतितणु
मुक्खसुक्ख पहु पामीय छंडीय कम्मवण ॥ ३

चउसट्ठि सहस–अंतेउर चुलसीयलक्खय–
हय–गय–रहवर छन्नवइकोडि–पायक तह य ।
नवनिहि चऊदरयण छखंड–सभूमिवर
धम्मचक्कि सोलसमु पंचम चक्कहर ॥ ४

चालीस–धणुह–देहो लक्खं वरिसाण जीवियं जस्स ।
सो संतिनाहदेवो करेइ संघस्स सिवसंती ॥ ५

## ५८. ( ३ ) श्रीनेमिनाथस्तोत्रम्

पंचजन्नि–आउरिय–संख जिणि दिणह
अज्जवि जसु पय सेवइ लंछणमिसि जिणह ।

रायमई–मणवल्लह सोहग सुंदरह
नेमिचरीय न्निज्जइ फलिणी सामलह ॥ १

आसि धणो तसु दइया धणवइ सुहमसुर
चित्तगइविद्याहर–रयणमइ महिंदसुर ।
अपराजी(जि)य प्री(प्रि)य प्रीयमइ पायारणह
संखनिवो तसु जसुमइ प्री(प्रि)य अपराजी(जि)यह ॥ २

नवमभवे सोरियपुरि समुदविजय घरणि
सिवादेविराणी नंदण जायुकुल–तसुण ।
कत्तीकिसिण दुवालसि अपराजी(जि)वय–चवणु
श्रावण सिय पहु पंचमि मंदरगिरिन्हवण ॥ ३

सी(सि)य छट्ठि–सावण सहस–समन्निय–वय–गहणं
रेवइगिरिवरि सामी रायमइ–परिहरणं ।
दिण चउपन्न–अणंतर आसोऽमावसह
केवलनाणी विहरइ तणु जसु दस धणुह ॥ ४

जीविय वरिस–सहस्सं आसाढे अट्ठमीय सियपक्खे ।
संपत्तं सिद्धिसुहं उज्जिंते नमह नेमिजिणं ॥ ५

## ५९. (४) श्रीपार्श्वनाथस्तोत्रम्

सामि–सामलय–तणु–कंति–किरणावली
जयउ विलसंत–कल्लाण–घणमंडली ।
जयउ धरणिंद–फणि–रयण–रयविज्जला–
भविय–घ(ज?)णमोर नच्चंति हरिसुज्जला ॥ १

नाह मर(रु)–भूइ भवि भमी(मि)य वणि गयवरो
देव सहसार विज्जाहर ज्झूअ (हरऽच्चुअ) सुरो ।

विज्जनाहो य गेविज्ज कणयापहो
चक्कवट्टी य पाणय विमाणच्चुउ(ओ) ॥ २

चित्त चउत्थीइ कसिणाइ वाणारसी
नयरि निव-आससेणस्स वामा सई ।
पोसदसमीइ कसिणाइ जम्मुत्सवो
तास इग्यारसी गिण्हए संजमो ॥ ३

कसिण-चउत्थीइ चित्तस्स तुह केवलं
सुद्ध-अट्ठमिहिं श्रावणह पत्तो सिवं ।
नाह-तणुमाण नवहत्थ फणिलंबणो
वरिससउ आउ जिण नयण-आणंदणो ॥ ४

जिण विघन-विणासण-पाव-पणासण पास पसन्नउ होउ महो।
पउमावइदेवी जसु पय सेवी मनवंछितसुह देउ महो ॥ ५

## ६०. (५) श्रीमहावीरस्तोत्रम्

जयउ सो सामी वीरजिणंदो पिक्खिय लंछणि जासु मइदो ।
संगमकामिणि-मणिमणि-वासो
कामकरी किम करइ उल्लासो ॥ १

नयसार-सोहमि-मिरीय-सुबंभे कोसी(सि)य सुर-
वसुमित्त-सुहम्मे ।
अग्गिजोई-ईसाणग्गिभूई सिरिभारद्दह-महिंद-चउगई ॥ २

थावर-सुर-वसुभूइ य सक्के हरि-
नारय-सीह-नारय-चक्के(क्की?)।
सक्कीय नंदण-पाणय चवीउ देवाणंदा-ऊअरि अवयरिउ ॥३

सी(सि)यछट्ठि-ऽसाढह वसीउ बियासी-
ऽदिणि आणेई हरिणेगमेसी ।
कुंडगामि सिद्धत्थह नरवइ
वालंभ-त्रिसला तसु कुक्खि आवइ ॥ ४

चैत्रसी(सि)य-तेरसि जायु जम्म मेरु-कंपावी(वि)य सुणीइ रम्म।
छप्पियनंदण दईय जसोआ नंदिवर्द्धन पहो जाणे भाया ॥ ५

बहुल दसमि पहु मगसिरमासह
दिक्ख लेउ सही(हि)या उवसग-सहस ।
सिय वइसाह दसमिइं केवल
कत्ती(त्ति)ऽमावास सुद्धसी(सि)य-निम्मल ॥ ६

इय जिणवीरह कणयसरीरह सत्तहत्थ उच्चत्ततणु ।
जय गणहरगोयम ! जगि जस
उत्तम फली(लि)य सयल-कल्लाणवण ॥ ७

पू. श्री वज्रस्वामिविरचितम्

# ६१. ॥ श्रीगौतमस्वामिस्तवनम् ॥

(शार्दुलविक्रीडित)

स्वर्णाष्टाग्रसहस्रपत्रकमले पद्मासनस्थं मुनिं
स्फूर्जल्लब्धिविभूषितं गणधरं श्रीगौतमस्वामिनम् ।
देवेन्द्राद्यमरावलीविरचितोपास्तिं समस्ताद्भुतं
श्रीवासातिशयप्रभापरिगतं ध्यायामि योगीश्वरम् ॥ १

किं दुग्धाम्बुधिगर्भगौरसलिलैश्चन्द्रोपलान्तर्दलैः ?
किं किं श्वेतसरोजपुञ्जरुचिभिः किं ब्रह्मरोचिःकणैः ?।
किं शुक्लस्मितपिण्डकैश्च घटिता किं केवलत्वा(ला चा)मृतै-
र्मूर्त्तिस्ते गणनाथ ! गौतम ! हृदि ध्यानाधिदेवी मम ॥ २

श्रीखण्डादिपदार्थसार्थकणिकां किं वर्तयित्वा सतां
किं चेतांसि यशांसि किं गणभृतां निर्यास्य तद्वाक्सुधाम् ।
स्त्यानीकृत्य किमप्रमत्तकमुनेः सौख्यानि सञ्चूर्ण्य किं ?
मूर्त्तिस्ते विदधे मम स्मृतिपथाधिष्ठायिनी गौतम ! ॥ ३

नीरागस्य तपस्विनोऽद्भुतसुखव्रातात् गृहीत्वा दलं
तस्याः स्वच्छशमाम्बुधे रसभरं श्रीजैनमूर्त्तेर्महः ।
तस्या एव हि रामणीयकगुणं सौभाग्यभाग्योद्भवं
मद्ध्यानाम्बुजहंसिका किमु कृता मूर्त्तिः प्रभो ! निर्मला ॥ ४

किं ध्यानानलगालितैः श्रुत(शुचि)दलैराभासिसद्भावना-
ऽश्मोद्घृष्टैः किमु शीलचन्दनरसैरालेपि मूर्त्तिस्तव ? ।
सम्यग्दर्शनपारदैः किमु तपःशुद्धैरशोधि प्रभो !
मच्चित्ते दमिते जिनैः किमु शमेन्दुग्रावतश्चाघटि ॥ ५

किं विश्वोपकृतिक्षमोद्यममयी ? किं पुण्यपेटीमयी ?
किं वात्सल्यमयी ? किमुत्सवमयी पावित्र्यपिण्डीमयी ? ।
किं कल्पद्रुमयी मरुन्मणिमयी किं कामदोग्धीमयी
या धत्ते तव नाथ ! मे हृदि तनुः कां कां न रूपश्रियम् ? ॥६

किं कर्पूरमयी सुचन्दनमयी पीयूषतेजोमयी
किं चूर्णीकृतचन्द्रमण्डलमयी किं भद्रलक्ष्मीमयी ? ।
किं वाऽऽनन्दमयी कृपारसमयी किं साधुमुद्रामयी-
त्यन्तर्मे हृदि नाथ ! मूर्त्तिरमला नाऽभावि किङ्किम्मयी? ॥ ७

अन्तःसारमपामपास्य किमु किं पार्थ्यव्रजानां रसं
सौभाग्यं किमु कामनीयसुगुणश्रेणीं मुषित्वा च किम् ? ।
सर्वस्वं शमशीतगोः शुभरुचेरौज्ज्वल्यमाच्छिद्य किं ?
जाता मे हृदि योगमार्गपथिकी मूर्त्तिः प्रभो ! तेऽमला ॥ ८

ब्रह्माण्डोदरपूरणाधिकयशः कर्पूरपारीरजः-
पुञ्जैः किं धवलीकृता तव तनुर्मद्ध्यानसद्मस्थिता ।
किं शुक्लस्मितमुद्गरैर्हतदलद्दुष्कर्मकुम्भक्षरद्-
ध्यानाच्चामृतवेणिभिः प्लुतधरा श्रीगौतम ! भ्राजते ॥ ९

इत्थं ध्यानसुधासमुद्रलहरीचूलाञ्चलान्दोलन-
क्रीडानिश्चलरोचिरुज्ज्वलवपुः श्रीगौतमो मे हृदि ।
भित्त्वा मोहकपाटसम्पुटमिति प्रोल्लासितान्तःस्फुर-
ज्ज्योतिर्मुक्तिनितम्बिनी नयतु मां सब्रह्मतामात्मनः ॥ १०

श्रीमद्गौतमपादवन्दनरुचिः श्रीवाङ्मयस्वामिनी
मर्त्यक्षेत्रनगेश्वरी त्रिभुवनस्वामिन्यपि श्रीमती ।

तेजोराशिरुदात्तविंशतिभुजो यक्षाधिपः श्रीः सुरा-
धीशाः शासनदेवताश्च ददतु श्रेयांसि भूयांसि नः ॥ ११

पू.उपा.श्री सूरप्रभगणिविरचितम्

## ६२. ॥ श्रीगौतमस्वामिस्तवनम् ॥

अब्धिर्लब्धिकदम्बकस्य तिलको निःशेषसूर्यावले-
रापीडः प्रतिबोधनैपुणवतामग्रेसरो वाग्मिनाम् ।
दृष्टान्तो गुरुभक्तिसालमनसां मौलिस्तवः श्रीजुषां,
सर्वाश्चर्यमयो महिष्टसमयः श्रीगौतमः स्तान्मुदे ॥(शा.वि.) १

यस्य द्वापरमात्मगोचरमहो वीरः स्वयं केवला-
लोकालोकितविश्ववस्तुनिकरः कारुण्यवारान्निधिः ।
युक्त्या वेदगिरा निरस्य नितरां दीक्षां ददे पञ्चभिः,
सार्धं शिष्यशतैः स गौतमगुरुर्दिश्यान्मनोगौरवम् ॥(शा.वि.)२

मगधेषु मगध्यामो मणीयामपि गोर्वरम् ।
पृथिवीं विद्मवसुधां यत्राजायत गौतमः ॥ (अनुष्टुप्) ३

यः शिष्येभ्यो बहुभ्यः त्रिभुवननयनं केवलालोकमोकः,
सर्वस्या एव ऋद्धेः परमपदसमारोहनिःश्रेणिकल्पम् ।
दत्त्वा श्वेतोपमेय(यो ?)महिमपरिमलोद्गारगौरव्यकीर्त्तिः,
स श्रीमानिन्द्रभूतिः क्षिपतु मयि दृशं निर्विवादप्रसादम् ॥ ४
(स्रग्धरा)

सकलसमयसिन्धोः पारगामीति विद्वा-
नपि विनयविवेकब्रह्मसंवर्मितात्मा ।

किपमि किमपि तत्त्वं सत्त्ववर्गोपकृत्यै,
जिनमनुयुयुजे यः सोऽवताद् गौतमो वः ॥ (मालिनी) ५

यं निःशेषगुणाकरं गुरुतयाङ्गीकृत्य सर्पिर्मधु-
स्वादी यः(?) परमान्नपूर्णजठराः स्वामोदमेदस्वितः(नः?) ।
सद्यः केवलितामिता बत परिव्राजो जिनायापि नो
तेऽमुस्तं(नेमुस्तं) परमोपकारिणमहं वन्दे गणाधीश्वरम् ॥ ६
(शा.वि.)

यस्याग्रे भगवज्जगद्गुरु महावीरार्हतोऽनुज्ञया,
देवाः प्रेक्ष(ण)कं त्रिलोकजनताचित्तेक्षणां मा(णा का)ङ्क्षिणम्।
कुर्वाणा कृतकृत्यतामिव कलाकौशल्यदिव्यश्रियो
मन्यन्ते स्म स मान्यतां मुनिपतिः श्रीगौतमः सत्तमः ॥(शा.वि.) ७

श्रुतमपि बहुभक्त्याऽऽराध्यमाना अजस्रं,
ददति किमपि कृच्छ्रात्प्रायशः सूरयोन्यो(योऽन्ये?) ।
-दिन सपदि यस्तु ब्रह्मशिष्योत्तमेभ्यः,
स जयति भगवान् श्रीगौतमाचार्यवर्यः ॥ (मालिनी) ८

पू.आ.श्री मुनिसुन्दरसूरिरचितम्

## ६३. ॥ श्रीगौतमस्वामिस्तोत्रम् ॥

जयश्रियां सेवधिमेधमानसमग्रलब्धिहृदिनीनदीशम् ।
सुरासुरेन्द्रालिविधीयमानक्रमाम्बुजोपासनभासमानम् ॥ १
(उपेन्द्रवज्रा)

सहस्रपत्राद्भुतहेमपद्मे पद्मासनासीनमदीनमेधम् ।
जगत्त्रयैकप्रभुताप्रभावप्रभाभिरामं मुनिराजिराजम् ॥(उ.व.) २

अनुत्तरब्रह्ममयं निरङ्कमृगाङ्कबिम्बोज्ज्वलकायकान्तिम् ।
श्रीवर्धमानादिमशिष्यनाथं श्रीगौतमस्वामिनमानुवामि ॥ ३
(उपजाति) -विशेषकम् ।

निदेशतो वीरजिनेश्वरस्य रदप्रमश्लोकमितं व्यधाद् यः ।
श्रीसूरिमन्त्रं त्रिजगद्धितैषी स गौतमो रातु ममेष्टसिद्धिम् ॥ ४
(उपजाति)

सरस्वती विश्वहितावधाना सूरीश्वरध्यानपदप्रभावा(त्) ।
सहस्रहस्तप्रथिता त्रिलोकस्वामिन्यपि प्रार्थितशस्तदात्री ॥ ५
(उपजाति)

श्रीदेवता विश्वविमोहनी चासुरेन्द्रवर्गस्तवनीयरूपा ।
यक्षाधिपो विंशतिशस्तहस्तस्फुरज्जगज्जैत्रपराक्रमश्च ॥ ६
(उपजाति)

इन्द्राश्चतुःषष्टिरभीष्टादाश्च त्रिलोकरक्षाप्रभवत्प्रभावाः ।
यक्षाश्चतुर्विंशतिरार्हतांह्रिसेवापवित्रीक्रियमाणगात्राः ॥ ७
(उपजाति)

देव्योऽपि दिव्याव्ययशक्तियुक्ता भक्ता जिनेष्वार्हतभद्रसक्ताः।
उपासते यं गणधारिमन्त्राधिष्ठायिका नित्यमचिन्त्यभक्त्या ॥८
(उपजाति)

यन्नाममन्त्रोऽपि जयत्यचिन्त्यशक्तिर्मरुत्कुम्भ-मणि-द्रुमादीन्।
तं सर्वचिन्तातिगशर्म्महेतुं श्रीगौतमं नौमि भवाब्धिसेतुम् ॥ ९
(इन्द्रवज्रा)

पदं यथाब्धिस्तटिनीतटीनां खं तारकाणां विटपी लतानाम् ।
तथा विभो ! गौतम ! सर्वलब्धिप्रभामहिम्नां भगवँस्त्वमेव ॥१०
(उपजाति)

मुक्तिं व्रजँस्त्वं न्यदधाः स्वनाम्नि
सश्रीसखीर्नाथ ! निजानुलब्धीः ।
वसत्यदो यत्र नरे गणेन्द्र !
वसन्ति यत्ता अपि तत्र सर्वाः ॥ (उपजाति) ११

कान्ताः शिवाप्तौ तव लब्धयस्त्वां
दुःखाद् भ्रमन्त्यः किल वीक्ष्यमाणाः।
नामापि शृण्वन्ति तवेश ! यत्र
सूत्कण्ठयेवानुसरन्ति तं द्राक् ॥ (इन्द्रवज्रा) १२

तवाऽऽतपस्यासमयात् कराब्जे जज्ञे निलीना खलु केवलश्रीः ।
दीक्षामिषाद् यन्न्यदधा यदीयशिरस्सु तं ते द्रुतमापुरेताम् ॥१३
(उपजाति)

त्वयाऽऽत्मनो वीरजिनाधिपेनाऽ-
भेदस्तथाऽध्यायि वशेन भक्तेः ।
अनन्तचिद्दर्शन-वीर्य-सौख्य-
लाभात् तदात्मैव विभो ! यथाऽभूः ॥ (उपजाति) १४

शिवश्रियः कोऽपि दृढोऽनुरागः
त्वयीश ! सौभाग्यरमात्मकेऽहो ! ।
नामाऽपि यत् ते जपतः प्रबुद्धा-
नेषाऽखिलान् प्रापयते(ती)श ! शर्म ॥ (उपजाति) १५

त्वदीयभक्तेः शिवशर्मलक्ष्म्या मैत्री प्रभो ! काऽपि परा नवीना।
स्वाधारकान् भव्यजनान् गुणाढ्याँ-
स्तस्यै पतीन् सा हि ददात्यशेषान् ॥ (उपजाति) १६

न के पदार्था बहवो महान्तस्तव प्रभावे तु विचिन्त्यमाने ।
पृथ्वी न पृथ्वी न गिरिर्गरीयान्
नाब्धिर्महीयान्न नभोऽप्यदभ्रम् ॥ (उपजाति) १७

विदन्ति मानं जलधेर्भुवो वा केचित् कथञ्चिन्नभसोऽपि विज्ञाः।
न ते प्रभावे पुनरस्ति मानं
भवन्त्यमाना अपि किं तदा(द)र्थाः ॥ (उपजाति) १८

ब्रह्मास्पदं वा कमलापदं वा वदन्तु पद्मं तव पादयोस्तु ।
अनाप्य माहात्म्यरमां नु तस्यै
निषेवतेऽम्बूनि सदा तपस्वी(स्वि) ॥ (उपजाति) १९

भोः ! भोः ! श्रिये किं व्यवहारखेदै-
राराधितैः किं बहुमन्त्र-तन्त्रैः ।
किं दैवतोपासनकर्मभिश्च
श्रीगौतमं ध्यायत नाथमेकम् ॥ (इन्द्रवज्रा) २०

पुरा यथा गौतम ! तापसादिकान्
मिथ्यामतादुद्धरसि स्फुरत्कृपः ।
तपस्क्रिया-संयम-योगदुर्बलं भवावटान्मामपि तद्वदुद्धर ॥२१
(उपजाति)

भवाद् बिभेम्युत्कटदुःखराशेर्धर्तुं द्विधेशे न च योगशुद्धिम् ।
गतिर्न मेऽन्याऽस्ति ततः शिवेच्छो-
स्त्वमेव तद्धेहि कृपां मयीश ! ॥ (उपजाति) २२

भावद्विषो ये निहतास्त्वयेश ! ते व्यन्तरीभूय भवद्रुषेव ।
निरोजसं त्वत्कुलजं समीक्ष्य
मां पीडयन्तीति मुनीन्द्र ! रक्ष ॥ (उपजाति) २३

गणिवर ! तव सद्गुणैकलीनं भवतु मनो मम गौतमाविरामम् ।
विजहतु तदिमे कषायमुख्या
रिपुनिकराश्च मयीति सुप्रसीद ॥ (पुष्पिताग्रा) २४

एवं श्रीगणनाथ ! गौतमगुरो ! स्तुत्वा मयाऽभ्यर्थ्यसे
नाम्नाऽहं मुनिसुन्दरोऽभवमथो कुर्याः प्रसादं तथा ।
स्यां सर्वज्ञ ! यथार्थतोऽपि विशदज्ञानादिरत्नत्रया-
ल्लब्ध्वा कर्मजयश्रियं शिवपुरे राज्यं लभे चाचिरात् ॥ २५
(शा.वि.)

पू.आ.श्री जिनप्रभसूरिविरचितम्

## ६४. ॥ श्रीगौतमस्वामिस्तोत्रम् ॥

श्रीमन्तं मगधेषु गोर्वर इति ग्रामोऽभिरामः श्रिया
तत्रोत्पन्नमसन्नचित्तमनिशं श्रीवीरसेवाविधौ ।
ज्योतिः संश्रयगौतमान्वयवियत्प्रद्योतनद्योमणिं
तापोत्तीर्णसुवर्णवर्णवपुषं भक्त्येन्द्रभूतिं स्तुवे ॥ (शा.वि.) १

(उपजाति)

के नाम नाभङ्गुरभाग्यसृष्ट्यै दृष्ट्यै सुराणां स्पृहयन्ति सन्तः ।
निमेषविघ्नोज्झितमाननेन्दुं ज्योत्स्नामनादृ(त्स्नां मनोह)त्य
तवापिबद्या ॥ २

निर्जित्य नूनं निजरूपलक्ष्म्या तृणीकृतः पञ्चशरस्त्वया सः ।
इत्थं न चेत्तर्हि कुतस्त्रिनेत्र नेत्रानलस्तं सहसा ददाह ॥ ३

पीत्वा गिरं ते गलितामृतेच्छाः सुराश्चिरं चक्रुरभोज्यमिन्दुम् ।
सुधाह्रदे तत्र मुनीश मन्ये लक्ष्मच्छलाच्छैवलमीक्ष्यतेऽन्तः ॥४

सौभाग्यभङ्ग्याऽपि समाधिदानं प्रत्येति लोकः कथमेतदज्ञः ।
यत्त्वां समग्रा अपि लब्धिकान्ताः
समालिलिङ्गुः समकालमेव ॥ ५

त्वद्पादपीठे विलुठन्त्यमर्त्यास्त्वद्गेहभृत्याः किल कल्पवृक्षाः ।
तैरप्यमा हन्त तवोपमानोपमेयभावं कथमस्तु वस्तु ॥ ६

पदोर्नखाली तव रोहिणीयं मुदे न कस्याद्भुतकृच्चरित्रा ।
वन्दारुपुंसां वदनेन्दुरन्तः प्रविष्टबिम्बोऽपि शिवाय यस्याः ॥७

यत्केवलज्ञानमविद्यमानमथात्मनि स्वान्तिषदामदास्त्वम् ।
लोकोत्तरत्वे ननु तावकानां दिङ्मात्रमेतच्चरिताद्भुतानाम् ॥८

भवद्गुणानां स्तुतयो गुणज्ञैर्विधीयमाना विबुधाधिपाद्यैः ।
स्तुत्यन्तरस्तोत्रकथागुणस्य समाप्तये कृत्करणीभवन्ति ॥ ९

न रागवान्नो भजसेऽतिचारं नालम्बसे वक्रगतिं कदाचित् ।
पुरस्कृते नोऽपि घनाघनाशी तथापि पृथ्वीतनयोऽसि रूढः ॥१०

प्रभो ! महावीरमुपास्य सम्यक् त्वयार्जितं यज्ञकलारहस्यम् ।
गृहे यतित्वेऽप्यभिरूपरत्नत्रयीजुषां कीर्त्तिरतानि तेन ॥ ११

त्वद्वाणिमाधुर्यजिता पलाय्य सितोपला काचघटीं विवेश ।
तत्रापि भीतिं दधती शलाका व्याजेन जग्राह तृणं तु वक्त्रे ॥१२

श्रीवीरसेवारसलालसत्वात् तद्बाधिनीं केवलबोधलक्ष्मीम् ।
अप्यागतामादरिणीं वरीतुं तृणाय मत्वा तमिवान्वमंस्थाः ॥१३

अपोढपङ्के कविभिर्निषेव्ये निरस्ततापे बहुभङ्गजाले ।
विभो ! भवद्वाङ्मुखगाङ्गमापूरे दुर्वादिपूगास्तृणवत्तरन्ति ॥१४

राकामये दिग्वलये समन्तात् यशः शशाङ्केन कृते ध्रुवं ते ।
कुहूध्वनिः केवलमेव कण्ठदेशं पिकानां शरणीचकार ॥ १५

जगत्त्रयोद्भासि यशस्तवैतत् क्व स्पद्र्धतां साद्र्धमनेन चन्द्रः ।
यस्याऽपराद्र्धेऽपि तृणस्य नैव
प्रभाप्रभावो लभतेऽवकाशम् ॥ १६

छत्रेन्दुपद्मादिषु रूढिमात्रं त्वन्नाम्नि तु श्रीर्वसतीति दृ(पु)ष्टिः ।
कुतोऽन्यथा तज्जपदीक्षितानां पुरःपुरो नृत्यति नित्यमृद्धिः ॥१७

वसुभूतिसुतोऽपि कौतुकं वसुभूतेर्जनकः प्रणेमुषाम् ।
भगवन्नऽभवोऽपि वर्त्तसे कथमङ्गीकृतसर्वमङ्गलः ॥ १८
(ललिता)

नाधः करोषि वृषमीश गणाधिपोऽपि
धत्से सदाशयमपाशमपि प्रचेताः ।
श्रीदोऽपि सूत्रितयमालयवासकेलि-
स्त्वं पावकोऽपि हरसे हरहेतिपातम् ॥ (वसन्ततिलका) १९

यत्तपत्यपि कलौ जिनप्रभाचार्य-मन्त्रमनुशीलतां स्फुरेत् ।
हेतुताऽत्र खलु तत्त्वदेकता ध्यानपारमितयैव गृह्यते ॥(रथो.)२०

मयैवं दुर्दैवं शमयितुमलंभूष्णुमहिमा
स्तुतस्त्वं लेशेन श्रुतरथधुरा गौतमगुरो ! ।
कुरूद्योतं क्लीबह्निपतिसुधागौ तमसि मे
प्रभो ! विद्यामन्त्रप्रभव भवते गौतम नमः ॥(शिखरिणी) २१

पू.आ. श्री जिनप्रभसूरिप्रणीतम्

## ६५. ॥ मन्त्रगर्भितं श्रीगौतमस्वामिस्तोत्रम् ॥

(अनुष्टुप्)

ॐ नमस्त्रिजगन्नेतुर्वीरस्याग्रिमसूनवे ।
समग्रलब्धिमाणिक्यरोहणायेन्द्रभूतये ॥ १

पादाम्भोजं भगवतो गौतमस्य नमस्यताम् ।
वशीभवन्ति त्रैलोक्यसम्पदो विगतापदः ॥ २

तव सिद्धस्य बुद्धस्य पादाम्भोजरजःकणः ।
पिपर्त्ति कल्पशाखीव कामितानि तनूमताम् ॥ ३

श्रीगौतमाऽक्षीणमहानसस्य तव कीर्तनात् ।
सुवर्णपुष्पां पृथिवीमुच्चिनोति नरश्चिरम् ॥ ४

अतिशेषेतरां धाम्ना भगवन् ! भास्करीं श्रियम् ।
अतिसौम्यतया चान्द्रीमहो ते भीमकान्तता ॥ ५

विजित्य संसारमायाबीजं मोहमहीपतिम् ।
नरः स्यान्मुक्तिराज्यश्रीनायकस्त्वत्प्रसादतः ॥ ६

द्वादशाङ्गीविधौ वेधाः श्रीन्द्रादिसुरसेवितः ।
अगण्यपुण्यनैपुण्यं तेषां साक्षात्कृतोऽसि यैः ॥ ७

नमः स्वाहापतिज्योतिस्तिरस्कारितनुत्विषे ।
श्रीगौतमगुरो ! तुभ्यं वागीशाय महात्मने ॥ ८

इति श्रीगौतम ! स्तोत्र-मन्त्रं ते स्मरतोऽन्वहम् ।
श्रीजिनप्रभसूरेस्त्वं भव सर्वार्थसिद्धये ॥ ९

पू.आ.श्री जिनप्रभसूरिविरचितम्

## ६६. ॥ श्रीसुधर्मास्वामि-स्तवनम् ॥

[बहुविधच्छन्दोजातियुक्तम्]

आगमत्रिपथगा हिमवन्तं संसृतेर्नतसमूहभवन्तम् ।
नौ समानमभिनौमि सुधर्म-स्वामिनं महति मोहपयोधौ ॥ १
(स्वागता)

स धर्मिलो नंदितधर्मिलोकः सा भद्रिला भद्रनिधिर्मुदे नः ।
त्वां सद्गुरोऽजीजनतां नतांह्रि सुरासुरैरादरभासुरैर्यो ॥ २
(उपजाति)

प्रादुर्भावक-दिव्यपंचकचमत्कुर्वाण सच्चेतसो,
वीरस्यादिमपारणेन बहुलाभिख्य द्विजाद्भाविना ।
श्रीकोल्लाकनिवेशनं कथमपि ज्ञात्वेव पावित्र्यवद्,
तत् स्वामिन्निजजन्मनोऽधिकरणीभावं भवान्नीतवान् ॥ ३
(शार्दूलविक्रीडित)

इह भवत्यसुमान् खलु यादृशः
परभवेऽपि स तादृगुतान्यथा ।
इति जिनः श्रुतिवाक्यविचारणा-
परशुना तव संशयमच्छिदत् ॥ (द्रुतविलम्बित) ४

सा पूर्नन्दतु मध्यमपापा यत्र जिनो महसेनवने त्वाम् ।
माधवधवलबलिन्दमतिथ्यां तथ्यां संयमसंपदमनयत् ॥ ५
(उपचित्रा)

बोधः प्रव्रज्यामान्तिषत्पञ्चशत्या
गाणेश्वर्यश्रीः सूत्रणं द्वादशाङ्ग्याः ।
सद्योऽमूदृशं भाग्यसामग्र्यमग्र्यं
त्वादृक् कोऽन्यत्र क्वापि किं देद्युतीति ॥ (वैश्वदेवी) ६

हलास्त्र हर्यरिधरवानमन्तरा-
द्यनुत्तरान्तसुरतृतीयवर्ष्मणाम् ।
यथोत्तरं विलसति रूपवैभवं
ततोऽधिकं गणधर्देव तत्तव ॥ (रुचिरा) ७

त्वद्दृब्धैव द्वादशाङ्गी युगेऽस्मिन्
स्याद्वादेन प्रास्यमाना कुतीर्थ्यान् ।
त्रैलोक्यार्च्या दीप्यते दीप्रदीप-
प्रख्या मोहध्वान्तविध्वंशनेऽसौ ॥ (शालिनी) ८

यथा पाश्चात्यो दुःप्रसहमुनिनाथः किल युग-
प्रधानानां भावी जजनिथ तथा धस्त्वमुदयी ।
गुणाग्रामारामे विचतुरसहस्रद्वयमिता
स्तुते त्वय्येकस्मिन्नपि त इव सर्वेपि विनुताः ॥(शिखरिणी)९

भाति ऋषिचक्रवर्तिन् षड्व्रत षट्खण्डभरतनेतुस्ते ।
निधिनवकं नवतत्त्वी रत्नानि चतुर्दशापि पूर्वाणि ॥(गीति)१०

पुलाकलब्धः परमावधिर्मनः-
पर्यायामाहारक-केवलश्रियौ ।
श्रेण्योर्द्वयं निर्वृतिसंयमत्रिके
कल्पश्च जैनोयमनुद्यंपारमन् ॥ (उपजाति) ११

तमपश्चिमकेवलिनं जम्बूनामानमानतमृषीन्द्रैः ।
स्वपदे न्ववीविशस्त्वं न परिद्रढयति हि पात्रं कः [यु.] ॥१२
(आर्या)

जैनत्वेऽपि तवास्थेयं वेदे कास्वपि यत्त्वया ।
शतायुर्वै पुरुष इत्युक्तिः सत्यापिता प्रभो ! ॥ (अनुष्टुप्) १३

पञ्चाशतं तव समाः सदने निवासः
छद्मस्थता वरद षट्गुणसप्तवर्षान् ।
अब्दानि केवलिविहारवतस्तथाष्टौ
सर्वायुरित्थमभवच्छरदं [दां] शतं ते ॥ (वसन्ततिलका) १४

जनुरभजत फाल्गुनीषूत्तरासु प्रधानद्विजश्लाघनीयाऽग्निवैशायना-
भिजनजलधिचन्द्रमाश्चण्डमार्तण्डतुल्यप्रतापाभिभूताभियातप्रभः।
अधिगतवति वर्द्धमाने जिनेन्द्रे शिवश्रीपरीरम्भलीलां च यः
पादपो-पगमनमुपगम्य वैभारशैले द्विपक्षीमवापाऽपवर्गं स
जीयाद्भवान् ॥ (चण्डवृष्टिदण्डक) १५

अपरेऽवसानसमये निरन्वयाः
सुसदृग् गुणा अपि गणाधिपा दश ।
न्यसृजन् गणास्त्वयि यथायथं विभो !
सरितां व्रजा इव पयोनिधावपः ॥ (मञ्जुभाषिणी) १६

भगवन् ! गृहरत्नमेककस्त्वं
गणभृद् द्वीपपरम्परायतोऽभूत् ।
अपरे गणधारिणस्तु सूर्या-
नयदन्यत्र महः ससर्प तेषाम् ॥ (मालभारणी) १७

उन्नतिमन्तो विस्तृतशाखाः
सुमनःसेव्या अविकलफलदाः ।
येऽत्रक्षेत्रे सम्प्रति गच्छा-
स्तेषां मूलं त्वमसि बतैकम् ॥ (अपरान्तिका) १८

ध्यायति प्रतिदिनं सपर्षदं
त्वां य उज्ज्वलसुवर्णरोचिषि ।
तस्य मंक्तु [मङ्क्षु] गणसंपदेधते
लब्धिभिः स सकलाभिरीयते ॥ (रथोद्धता) १९

धर्मं शास्ति त्रियुक्त त्रिगुणदशसमायुक् सहस्रैकविंश-
त्यब्दे स्थायी यदीयो जगति सुरनृणां माननीयोऽन्ववायः ।
धीरः श्रीवीरपट्टोदयगिरिशिखरोत्सङ्गशृङ्गारभानु-
र्ज्ञानं स श्रीसुधर्मा वितरतु गणभृत् पञ्चमः पञ्चमं नः ॥ २०
(स्रग्धरा)

इति पदलुठत्सौधर्मेन्द्रः सुधर्मगणाधिपः
कृतगुणकणस्तोत्रः स्तोत्रं कुवादिगजव्यधे ।
उपचितयतु क्षेमस्थेमश्रियं मम निर्मम,
प्रभुरभजतो दूरस्थ त्वं जिनप्रभवाध्वन ॥ (हरिणी) २१

पू.आ.श्री जिनसेनसूरिकृता

आदिपुराण-अन्तर्गता

## ६७. ॥ श्रीगौतमस्वामिस्तुतिः ॥

(अनुष्टुप्)

त्वां प्रत्यक्षविदां बोधैरप्यबुद्धमहोदयम् ।
प्रत्यक्षस्तवनैः स्तोतुं वयं चाद्य किलोद्यताः ॥ १

चतुर्दशमहाविद्यास्थानाकूपारपारगम् ।
त्वामृषे ! स्तोतुकामाः स्मः केवलं भक्तिचोदिताः ॥ २

भगवन् भव्यसार्थस्य नेतुस्तव शिवाकरम् ।
पताकेवोच्छ्रिता भाति कीर्तिरेषा विधूज्ज्वला ॥ ३

आलवालीकृताम्भोधिवलया कीर्तिवल्लरी ।
जगन्नाडीतरोरग्रमाक्रामति तवोच्छिखा ॥ ४

त्वामामनन्ति मुनयो योगिनामधियोगिनम् ।
त्वां गण्यं गणनातीतगुणं गणधरं विदुः ॥ ५

गोतमा गौ प्रकृष्टा स्यात् सा च सर्वज्ञभारती ।
तां वेत्सि तामधीषे च त्वमतो गौतमो मतः ॥ ६

गोतमादागतो देवः स्वर्गाग्राद् गौतमो मतः ।
तेन प्रोक्तमधीयानस्त्वं चासौ गौतमश्रुतिः ॥ ७

इन्द्रेण प्राप्तपूजर्द्धिरिन्द्रभूतिस्त्वमिष्यसे ।
साक्षात् सर्वज्ञपुत्रस्त्वमाप्तसंज्ञानकण्ठिकः ॥ ८

चतुर्भिश्चामलैर्बोधैरबुद्धस्त्वं जगद् यतः ।
प्रज्ञापारमितं बुद्धं त्वां निराहुरतो बुधाः ॥ ९

पारेतमः परं ज्योतिस्त्वामदृष्ट्वा दुरासदम् ।
ज्योतिर्मयः प्रदीपोऽसि त्वं तस्याभिप्रकाशनात् ॥ १०

श्रुतदेव्याहितस्त्रैणप्रयत्ना बोधदीपिका ।
तवैषा प्रज्वलत्युच्चैर्द्योतयन्ती जगद्गृहम् ॥ ११

तव वाक्प्रकरो दिव्यो विधुन्वन् जगतां तमः ।
प्रकाशयति सन्मार्गं रवेरिव करोत्करः ॥ १२

तव लोकातिगा प्रज्ञा विद्यानां पारदृश्वरी ।
श्रुतस्कन्धमहासिन्धोरभजद् यानपात्रताम् ॥ १३

त्वयावतारिता तुङ्गान्महावीरहिमाचलात् ।
श्रुतामरसरित्पुण्या निर्धुननाखिलं रजः ॥ १४

प्रत्यक्षश्च परोक्षश्च द्विधा ते ज्ञानपर्ययः ।
केवलं केवलिन्येकस्ततस्त्वं श्रुतकेवली ॥ १५

पारेतमः परंधाम प्रवेष्टुमनसो वयम् ।
तद्द्वारोद्घाटनं बीजं त्वामुपास्य लभेमहि ॥ १६

ब्रह्मोद्या निखिला विद्यास्त्वं हि ब्रह्मसुतो मुनिः ।
परं ब्रह्म स्वदायत्तमतो ब्रह्मविदो विदुः ॥ १७

मुनयो वातरशनाः पदमूर्ध्वं विधित्सवः ।
त्वां मूर्द्धवन्दिनो भूत्वा तदुपायमुपासते ॥ १८

महायोगिन् नमस्तुभ्यं महाप्रज्ञ नमोऽस्तु ते ।
नमो महात्मने तुभ्यं नमः स्तात्ते महर्द्धये ॥ १९

नमोऽवधिजुषे तुभ्यं नमो देशावधित्विषे ।
परमावधये तुभ्यं नमः सर्वावधिस्पृशे ॥ २०

कोष्ठबुद्धे नमस्तुभ्यं नमस्ते बीजबुद्धये ।
पदानुसारिन् संभिन्नश्रोतस्तुभ्यं नमो नमः ॥ २१

नमोऽस्त्वृजुमते तुभ्यं नमस्ते विपुलात्मने ।
नमः प्रत्येकबुद्धाय स्वयंबुद्धाय वै नमः ॥ २२

अभिन्नदशपूर्वित्वात् प्राप्तपूजाय ते नमः ।
नमस्ते पूर्वविद्यानां विश्वासां पारदृश्वने ॥ २३

दीप्तोग्रतपसे तुभ्यं नमस्तप्तमहातपः ।
नमो घोरगुणब्रह्मचारिणे घोरतेजसे ॥ २४

नमस्ते विक्रियर्द्धीनामष्टधा सिद्धिमीयुषे ।
आमर्ष क्ष्वेलवाग्विप्रुड्जल्लसर्वौषधे नमः ॥ २५

नमोऽमृतमधुक्षीरसर्पिरास्रविणेऽस्तु ते ।
नमो मनोवचःकायबलिनां ते बलीयसे ॥ २६

जलजङ्घाफलश्रेणीतन्तुपुष्पाम्बरश्रयात् ।
चारणर्द्धिजुषे तुभ्यं नमोऽक्षीणमहर्द्धये ॥ २७

त्वमेव परमो बन्धुस्त्वमेव परमो गुरुः ।
त्वामेव सेवमानानां भवन्ति ज्ञानसंपदः ॥ २८

त्वयैव भगवन् विश्वा विहिता धर्मसंहिता ।
अत एव नमस्तुभ्यममी कुर्वन्ति योगिनः ॥ २९

त्वत्त एव परं श्रेयो मन्यमानास्ततो वयम् ।
तव पादाङ्घ्रिपच्छायां त्वय्यास्तिक्यादुपास्महे ॥ ३०

वाग्गुप्तेस्त्वत्स्तुतौ हानिर्मनोगुप्तेस्तव स्मृतौ ।
कायगुप्तेः प्रणामे ते काममस्तु सदापि नः ॥ ३१

पू.आ.श्री कनकरत्नसूरिविरचितम्

## ६८. ॥ श्रीगौतमस्वामिस्तवनम् ॥

(उपजाति)

श्रीवर्धमानस्य विनेयरत्नम्, धरासुतं सर्व गणेशधुर्यम् ।
पितुःकुले कामद कल्पतुल्यम्, दिनागमे गौतममानमामि ॥१

सुवर्णपद्मे सुविराजमानम्, सुरेन्द्रवृन्दैः समुपास्यमानम् ।
श्रुतार्णवं लब्धिनिधिं मुनीन्द्रम्, दिनागमे गौतममानमामि ॥२

सुचन्दनैश्चन्द्रकलाभिरेवम्, रजत्समूहैः किमु शुभ्रपद्मैः ।
विनिर्मितां तां किमु कुन्दपुष्पैः ध्यायामि यां मूर्तिमहं प्रभाते ॥३

स्तुतेर्विधातुं ननु कः समर्थः, सरस्वती नाऽपि बृहस्पतिश्च ।
सहस्रजिह्वः किल कोऽपि चेत्स्यात्,
तथापि शक्तो न तव स्तवाय ॥ ४

शुभाऽभिमानोऽखिलवादिजेता, प्रशस्तरूपोऽस्त्यतिपुण्यशाली।
आसन्नश्रेयांश्चरमाङ्गधारी, श्रीगौतमो वोऽस्तु सदा शिवाय ॥५

अतीव्रमोहाऽऽवृतमानसेन, यज्ञादिसावद्यविधेर्विधाता ।
सदैव पञ्चशतशिष्यपाठकः
श्रीगौतमो वोऽस्तु सदा शिवाय ॥ ६

अहं हि सर्वज्ञ इति स्वचिते-ऽवधार्य शीघ्रं समियाय वीरे ।
शङ्कां स्वकीयामवधूय तस्मात्, शिष्यो विनीतः प्रथमो बभूव॥७

संप्राप्य वीरात् त्रिपदीञ्च येन, श्रीद्वादशांगी रचिता क्षणेन ।
तेन प्रभावाच्छ्रीजिनेन्द्रभक्तेः, तृतीयतुर्ये समवाप ज्ञाने ॥ ८

अपूर्वरुपां महावीरसेवाम्, कुर्वन्जिनाज्ञां हृदये वहन्यः ।
अनन्यभावादभवत्समन्तात्, सदैव वीराय समर्पितः सः ॥ ९

श्रीवर्धमानोपरिभक्तिरागः, निजाऽऽत्मनि तीव्रतमो यदासीत् ।
वीरेषु सर्वस्वमभूद् हि तस्य,
अतः प्रसिद्धं गुरुशिष्ययुग्मम् ॥ १०

प्रभावमष्टापदपर्वतस्य, गतोऽथ विज्ञाय गिरौ स्वलब्ध्या ।
वपुःप्रमाणैः प्रविनिर्मितानाम्,
जिनाऽऽकृतीनामभिवन्दनाय ॥ ११

यदाऽऽत्मनि पावनभाव आसीत् ।
समस्तभव्यात्महिताय सम्यक्,
अतस्तदीयं ननु नाममन्त्रम्, समस्ति कल्याणकरं जनानाम् ॥१२

त्रिपञ्चसंख्या शततापसानां गिरौ स्थितानां गणिना च तेषाम् ।
अक्षीणलब्धिकृतपायसेन, कारापितं पारणकं शिवाय ॥ १३

वीरेण दत्तं खलु गौतमाय, पवित्रवर्णं महिमानिधानम् ।
सूरीश्वरा यं प्रजपन्ति नित्यम्, तं सूरिमन्त्रं शिवदं नमामि ॥१४

ॐ ह्रीं तथा श्रीं सहितस्य प्रातः, यदीयगोत्रस्य पवित्रजापात् ।
स्थिरेण श्रद्धाऽन्वितमानसेन,
लोका लभन्ते सकलेष्टसिद्धिम् ॥ १५

द्रुमादयो दिव्यपदार्थसार्थाः, ददत्यभीष्टं फलमैहिकं हि ।
त्वद्गोत्रवत्ते ददते न नूनम्, गणीन्द्र ! कर्माणि विधूय मोक्षम्॥१६

मुक्तिर्यदा वीरजिनस्य ज्ञाता, रुदन्क्षणं शोकमयस्तदाऽभूत् ।
श्री वीर वीरेति ब्रुवन्विरक्तः, कैवल्यज्ञानं समवाप सद्यः ॥१७

गृहे वसित्वाऽर्धशतं मुनीशः, वर्षाणि त्रिंशद् व्रतमारराध ।
सर्वज्ञता द्वादश वत्सरीया,
शिवं ययौ सा त्वनुभूय श्रीमान् ॥ १८

कुर्वन्ति यत्पादसरोजसेवाम्, सरस्वती श्रीर्मनुजेश्वरी च ।
यक्षाधिराजः पिटकाऽभिधानः,
स गौतमो वोऽस्तु शिवाय नित्यम् ॥ १९

निजाऽऽत्मभक्त्याऽथ गुरोः प्रसादात्,
कनकादिरत्नेन विनिर्मितेयम् ।
बुधै र्विशोध्या स्तुतिरिन्द्रभूतेः, विशुद्धश्रद्धां विदधातु जैने ॥२०

इत्थं मयैव स्तुतिरिन्द्रभूतेः स्वकीयकल्याणकृते कृताऽस्ति ।
स्वसद्गुरो र्जन्म शतस्य वर्षे, समर्पिता तच्चरणारविन्दे ॥२१

पू.मु.श्री नन्दिधर्मगणिविरचिता

## ६९. ॥ श्रीगौतमस्वामिस्तुतिः ॥

(अनुबन्धफलगर्भा)

श्रीवर्धमानशिष्याग्रणीर्महिमधाम ! गौतमाह्वगुरो ! ।
अनुबन्धफलश्लोकैस्त्वामज्ञोऽपि स्तुवन्नस्मि ॥ (आर्या) १

मित्रेधमानमुद् यो भजते नन्दन् भवन्तमस्त्वाऽन्यत् ।
विष्णुमसित्वा तमचिक्रीडत् श्रीर्नाविजच्चास्मात् ॥ २

नेन्दोर्यदवैक्षीज्जगदगमच्च प्राकटीत्तदस्य यशः ।
योऽनुद्विग्नमनास्त्वाममोहितः स्तोष्यते नेतः ! ॥ ३

त्वदमोग्धृतप्रियङ्कर ! प्रशिश्रियाणापरागवाक्यं यः ।
सेवेतैष ऋतीयितविपदापोत्फुल्लसारर्धिम् ॥ ४

पुष्पन्धयीमिव स्थितिकरीं तवानन्दथुप्रदेंऽह्रिकजे ।
यः स्वाकृत्रिमभक्तिं चकार तमभक्त भजका श्रीः ॥ ५

योऽकृत्यकृत् कान्तपाशदास्या स्वं सम्प्रयच्छते ।
सोऽपि चेत्पटुजातीयमुत्तया स्तौति ते क्रियाम् ॥ ६

चन्द्रावदातवदना निर्जरलीलावती तमाश्लिष्येत् ।
भवदीयशरणगां मां स्मरार्दितामव वदन्तीति ॥ (यु.) ७

जहि जाड्यमस्य दोषान् दुनु पङ्कं क्षिप तमांसि रुन्धि शुचम् ।
तनु च मुदं सच्चक्रे मुषाण कुमुदं प्रथय सुपथम् ॥ ८

(हन्ति तमोऽस्यति दोषान् दुनोति पङ्कं च डिपति जडिमानम् ।
सच्चक्रस्योग्रशुचं छिनत्ति तनुते ततश्च मुदम्) ॥ ८

इत्येव यः समुद्यंयमीति भास्वद्गुणैर्जगत्युदितः ।
स त्वं निजदर्शनतस्तनुतादिन ! सपदि नः सुदिनम् ॥(यु.) ९

(कुमुदं मुष्णाति पुनः पद्मोल्लासं प्रपञ्चयत्यनिशम् ।
रराष्टि गोविलासः स्फुरद्गुणैर्भास्वतो भवतः ॥ (यु.) ९

इत्यभिनुत्य भवन्तं जगदुत्तम ! गौतम ! प्रशमवन्तम् ।
याचे न किञ्चिदपरं भूयात् त्वयि भक्तिरेव परम् ॥ १०

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## ७०. ॥ श्रीगौतमस्वामिस्तोत्रम्

गौतमं गोत्ररत्नं पवित्रं यद-
त्रास्ति तत्रोद्भवं वीरसेवाव्रतम् ।
भाग्यसौभाग्यशोभोच्चभावाद्भुतं
संस्तुवे गौतमस्वामिनं ज्ञानिनम् ॥ (स्त्रग्विणी) १

वीरसेवारसास्वादसम्पादितागाधचारित्रपावित्र्यलब्धिप्रथम् ।
सौवसद्दर्शनेनैव सन्दर्शितो दाससन्दर्शनं नौम्यहं गौतमम् ॥ २
(स्रग्विणी)

मगधेषु गोर्बर इति प्रथितं पदमस्ति तत्र सुभवं विभवम् ।
गुणरत्नरोहणगिरिं सुगिरं प्रणमामि गौतमगणप्रगुणम् ॥ ३
(प्रतिमाक्षरा)

नतनाकिमौलिमुकुटप्रकटप्रसरन्मणीरुचिविधूतपदम् ।
भविकेक्षणमृतसदञ्जनभं गणधारणं श्रयत भो भविकाः ! ॥ ४
(प्रतिमाक्षरा)

महाशालशालौ विशालौ यशोभि-
र्यदीयार्यचर्यां विभाव्यातिभाव्याम् ।
क्षणात् प्रापतुः केवलालोकलक्ष्मीं
स्तुमस्तं गुरुं गौतमं दीप्रधर्मम् ॥ (भुजङ्गप्रयात) ५

गणाधीश ! पृथ्वीसुतोऽपि क्वचित्त्वं
न धत्से गतिं वक्ररूपां कदाचित् ।
न रागाकृतिर्नातिचारोपचारी
सुसौभाग्यभोगप्रतिष्ठानिधानम् ॥ (भुजङ्गप्रयात) ६

सदष्टापदारोहचर्येक्षणेनाश्रितास्-
तापसा विस्मिताः पायसान्नम् ।
स्वदन्तः सुभावेन कैवल्यमीयु-
र्यदेकप्रभावात्स जीयाद् गणेन्द्रः ॥ (भुजङ्गप्रयात) ७

चरित्रं पवित्रोरु केचिद्यदीयं
निरीक्ष्य प्रपन्ना हि कैवल्यलीलाम् ।

त्रयश्चातुरीं केचिदास्यं च केचिद्
गतिं केचिदस्तु श्रियेऽसौ मुनीशः ॥ (भुजङ्गप्रयात) ८

प्रथमगणधरोऽयं भाग्यसौभाग्यसम्प-
न्निधिरुचितमिहास्तु स्वस्तिभाजो भवेयुः ।
सुभविकनिकरा यद्दर्शनेनैव शश्वद्
वचनसुरसपानात् किं पुनः सिद्धिसिद्धौ ॥ (मालिनी) ९

जननमरणवेलालोलकल्लोलमाला-
हतिविरतिभृतानामात्मभान्तावतास्तु ।
भयदभवपयोधेर्भीभरो व्याप्तलोकः,
प्रथमगणपतेः सद्दर्शनं स्यान्न यावत् ॥ (मालिनी) १०

तदुचितमिह यच्छ्रीगौतमस्याभिधाने
निवसति जगतीस्थाशेषसम्पत्प्रभुत्वम् ।
कथमनुदिनमेतन्मन्त्रजापप्रभावात्
श्रयति सकललक्ष्मीरन्यथा भक्तभव्यात् ॥ (मालिनी) ११

गणधरवरलब्धिर्विश्वविश्वोपकारा
